प्रास्ताविक वक्तव्य ।

"महेन्द्रोदय" नामक काव्य नेपालका प्रतिभाशाली कवि पण्डित श्री भरतराज शर्मा शास्त्री काव्यतीर्थको संस्कृत भाषामा मनोहर रचना हो ।

प्रसङ्ग वशतः यसमा हिमालय पर्वत मेची सप्तकौशिका त्रिशूली महाकाली वाग्वती आदि, देवी देवताहरू तथा नेपालका प्राचीन राजाहरूको पनि वर्णन गरिएको छ ।

प्रकृत रचना केवल काव्य होइन न इतिहासनै, यसमा ऐतिहासिक तथ्य घटनाहरूको मनोहर शैलीले कविताको रूपमा सङ्कलन गरिएको छ । एले न पाए पनि कालान्तरमा यसले "हर्ष चरित" "विक्रमाङ्कदेव चरित" र "शिव भारत" आदि काव्यको समान ऐतिहासिक काव्यहरूमा प्रशंसनीय स्थान पाउनेछ भन्ने म आशा गर्दछु ।

लेखक मेरा प्राचीन छात्र हुन् । उनी संस्कृतका प्रतिभाशाली प्रबुद्ध पण्डित हिन्दी र अङ्ग्रेजी आदि भाषाका अभिज्ञ, देशभक्त, देश काल र परिस्थितिका जानकार एवम् संस्कृत र नेपालीमा काव्यरचनामा सिद्धहस्त छन् । लेखकले

आफ्नो कवित्व र देशभक्तिको प्रदर्शनका लागि उपयुक्त विषयको अवलम्बन गरेका छन् ।

अनेक भागमा विभक्त हिमालय पर्वतको एक अंशलाई एकसूत्रमा बद्ध गरी आर्यसंस्कृतिको प्रमुख केन्द्रको रूपमा नेपाल राष्ट्रको निर्माण गर्ने श्री ५ बडा महाराजाधिराज पृथ्वीनारायण शाह देवलाई हामी नेपालीले मात्र होइन प्रत्युत धर्मसापेक्ष हिन्दूमात्रले महापुरुष मान्न कर्‍यै लागदछ । संसारमा कुनै राष्ट्रमा पनि परम्पराप्राप्त लोकानुमोदित आफ्नू स्वत्व लाई प्रजाहितको लागि परित्याग गर्ने पुरुष स्वर्गवासी श्री ५ महाराजाधिराज त्रिभुवनवीरविक्रम शाहदेव बाहेक अरू कुनै शासक देखिएका छैनन् । अतः निःसङ्कोच भन्न सकिन्छ कि मौसूफ स्वर्गबासी श्री५ महाराजाधिराजको स्थान त्रिभुवनमा अद्वितीय छ ।

"प्रातः काल दिनको सूचक हुन्छ" भन्ने लोकोक्तिको अनुसार वर्तमान नेपालेन्द्र, श्री ५ महेन्द्रवीरविक्रमशाह देवको आफ्ना पूज्य बुवाको समय देखि नै शासन विषयमा प्रबुद्धता परिलक्षितहुन्थ्यो, योग्य पिताका योग्य पुत्र मौसुफबाट पनि प्रजातन्त्रको लागि पूर्णरूपले स्वार्थत्याग गरिबक्सिदा "आकरे पद्मरागाणां जन्म काचमणेःकुतः" यो लोकोक्तिलाई सर्वतो भावेन सफल गरि बक्सिएको छ ।

धराधीश भोजको समान नेपाल महीश श्री ५ महेन्द्रबाट पनि साहित्य गोष्ठीको स्थापन गरि बक्सिएको

आफ्नो कवित्व र देशभक्तिको प्रदर्शनको लागि उपयुक्त विषयको अवलम्बन गरेका छन् ।

अनेक भागमा विभक्त हिमालय पर्वतको एक अंशलाई एकसूत्रमा बद्ध गरी आर्यसंस्कृतिको प्रमुख केन्द्रको रूपमा नेपाल राष्ट्रको निर्माण गर्ने श्री ५ बडा महाराजाधिराज पृथ्वीनारायण शाह देवलाई हामी नेपालीले मात्र होइन प्रत्युत धर्मसापेक्ष हिन्दूमात्रले महापुरूष मान्न करै लाग्दछ । संसारमा कुनै राष्ट्रमा पनि परम्पराप्राप्त लोकानुमोदित आफ्नू स्वत्व लाई प्रजाहितको लागि परित्याग गर्ने पुरुष स्वर्गवासी श्री ५ महाराजाधिराज त्रिभुवनवीरविक्रम शाहदेव बाहेक अरू कुनै शासक देखिएका छैनन् । अतः निः सङ्कोच भन्न सकिन्छ कि मौसूफ स्वर्गबासी श्री५ महाराजाधिराजको स्थान त्रिभुवनमा अद्वितीय छ ।

"प्रातः काल दिनको सूचक हुन्छ" भन्ने लोकोक्तिको अनुसार वर्तमान नेपालेन्द्र, श्री ५ महेन्द्रवीरविक्रमशाह देवको आफ्ना पूज्य बुवाको समय देखि नै शासन विषय मा प्रबुद्धता परिलक्षितहुन्थ्यो, योग्य पिताका योग्य पुत्र मौसुफबाट पनि प्रजातन्त्रको लागि पूर्णरूपले स्वार्थत्याग गरिबक्सिदा "आकरे पद्मरागाणां जन्म काचमणेःकुतः" यो लोकोक्तिलाई सर्वतो भावेन सफल गरि बक्सिएको छ ।

धराधीश भोजको समान नेपाल महीश श्री ५ महेन्द्रबाट पनि साहित्य गोष्ठीको स्थापन गरि बक्सिएको

छ, जसवाट अति शीघ्र नेपाली साहित्यको ठूलो उन्नतिको साथ नेपाल राष्ट्रको पुन रुत्थानको आशा गरिएको छ। मौसूफ़ महाराजाधिराज स्वयम् प्रतिभाशाली एक भावुक कवि भइ बक्सिन्छ।

संघर्ष शील विश्वमा मौसूफबाट नेपालको संरक्षणको अभिभार वहन गरियक्सेदेखि नै के स्वदेश सबैतिरवाट मोसूफको योग्यताको साहसको अग्निपरीक्षा भइसकेको छ, परन्तु " भद्र कृत्प्राप्नुयाद्भद्रम " यो उक्तिको अनुसार प्रजाजन मौसूफको पूर्ण विजयको कामना गरिरहेका छन्।

यस्तो स्थितिमा तरुण कवि भरतराजजीले आफ्नू काव्यमा शाह वंशको, त्यसमा पनि पूर्वोल्लिखित स्वर्गवासी दुई श्री५ महाराजाधिराजको विशेष चर्चा गरी महेन्द्रोद-यलाई प्रधान रूपले अवलम्बन गरी आफ्नू परिश्रमलाई सफल बनाएका छन।

यो ग्रन्थमा आरम्भदेखि स्वर्गवासी श्री५ महारा-जाधिराज त्रीभुवन वीर विक्रम शाह देव सम्मको वर्णन महाकाव्यको रूपमा र वर्तमान नेपाल नरेन्द्र श्री ५महेन्द्रको जीवनको एकदेशको वर्णन हुनाले त्यो अंशको रचना शैली खण्डकाव्यको रूपमा रहेको छ। जो होस्, सरल, सरस तथा अलङ्काराऽलङ्कृत रचना हुनाले तथा कठोर चित्रकाव्य को समावेश रहनाले " सर्गा अष्टाधिका इह " विश्व नाथ कविं राजको यो उक्तिको अनुसार यसमा दश सर्गरहेका

हुनाले पनि प्रकृत कृतिलाई "महाकाव्य" भन्न केही बाधा देखि दैन ।

यसमा ठाउं ठाउंमा महाकवि कालिदास भारवि वाण भट्ट र श्रीहर्ष आदि महाकविको जस्तो वर्णनच्छटा परिलक्षित भएको छ । स्थाली पुलाक न्यायले यसका मनोहर स्थलका केही उदाहरण प्रस्तुत गर्दछु:—

लघुस्फुलिङ्गोऽप्यनलो दवायते
दवोऽपि पाषाणतले प्रशाम्यति ।
तथाहि कालः कुरुते बलाबलं
भवेदसौ बाल नृपोऽपि बीर्य वान्
(२—५)

वधूवरौ तौ दधतुःसरत्न-
काञ्चीकलापं मणिशृङ्खलं च ।
नक्षत्रपुष्पोपचिताऽभ्र गङ्गां
ततो नभः सारसनं चकार ॥
(३—४)

महीन्द्रं तं महेन्द्रं सा महेन्द्र मिव वीक्ष्य दिक् ।
प्रसन्नाऽभून्न का वा स्त्री पत्यु र्योगेन तुष्यति ॥
(१०–२)

अवकाशको अभावले संक्षेपमा यो केही निदर्शन गरेको छु।

कविवाट शीघ्र नेपाली भाषामा महाकाव्य प्रस्तुत होला भन्ने आशाराखी म आफ्नू लघु वक्तव्य समाप्त गर्दछु।

दुर्गाघाट, वाराणसी   प्रा. शेषराज शर्मा
१०–४–२०१७

ॐ स्वस्ति

महेन्द्रोदयपरिचयः

गोरक्षकाली वरलब्धमृद्धं गोरक्षराष्ट्रं प्रथयन् पृथिव्याम् ॥
श्रीपृथ्विनारायण साहदेवो यश्चक्रवर्ती गिरिराज चक्रे ॥१॥
तस्यान्वयेऽयं दशमो महेन्द्रः पित्रा प्रजातन्त्रकृताऽभिषिक्तः
शाकेऽद्रिशैलोरग चन्द्र युक्ते पूर्व प्रयाणं विदधे विधिज्ञः। २॥
श्रीमानदेवस्य पथोऽनुयायी श्रीपृथ्वि नारायण साहदेवः॥
श्रीपृथ्विनारायण मार्ग गामी महेन्द्र वीरो नृपनीति धीरः ॥३॥
द्विलक्ष्यदेशे निज गेहमूले तं स्वागतं वीक्ष्य स मन्थलीस्थः ॥
साहित्य शास्त्री किल काव्यतीर्थः कवि र्घिमीरे भरतादिराजः॥४॥
अध्यापकत्वं विदध च्छिशूनां श्रीशेपराजादधिगत्य विद्याम्॥
हृद्यै श्च पद्यै रभिनन्द्य वन्द्यं लोकोदयायोदय शैल भाजम्॥५॥
नवोदयं प्राप्य महेन्द्रवीरं चक्रे महेन्द्रोदयकाव्य मेतत् ॥
राज्ञां दशानां दशमासमध्ये विभिन्न वृत्तं दशसर्ग बद्धम्। ६॥
जाग्रज्जगज्ज्येष्ठ हिमालयस्य सिंहावलोकोऽत्र समासतोऽस्ति
नागह्रदस्यो दधि सन्निभस्य किरातकालस्य च लिच्छवीनाम् ॥७॥
वैशालि मल्लादि जनाधिपानां साहान्वयस्याधिक मस्तिवृत्तम् ॥
श्री पृथ्विनारायण साहदेवः प्रतापसिंहो रणबहादूरः ॥८॥
गीर्वाण-राजेन्द्र-सुरेन्द्र पूर्वस्त्रैलोक्यवीरो नृपपृथ्विवीरः ॥

अष्टौ समासोदिह वर्णिता स्ते व्यासा दुभावन्तगतौ निरुक्तौ ॥९

त्रिभुवने प्रथितः पृथिवीकुले
त्रिभुवनो नृपतिः प्रकृतिप्रियः॥
तदनु तत्तनयो नयकोविदः
कविगतिश्च महेन्द्र महीपतिः॥१०॥

देशेतिहास मवलम्ब्य समासतोऽपि
दिव्योपदेश विशदं सदसद्विवेकः॥
खड्गादिबन्ध लसितं रसभावपूर्णं
काव्यं व्यधान्नवकवि र्भरतः प्रकृष्टम् ॥११॥

टीका कृता लसति मन्थलि वासिनैव
सत्याल वंश तिलकेन च शङ्करेण॥
विद्यार्थिभिः कविजनैर्विबुधै र्नरेन्द्रैः
काव्यं शुभं नरहरि र्भणतीद मीक्ष्यम् ॥१२॥

श्री पृथ्विनारायण कालिकानां
कवीश्वराणां सरणीं प्रशस्ताम्॥
पुन र्महेन्द्रोदयकाव्य बन्धात्
समुद्धृतां मञ्चतु विद्ववोघः ॥१३॥

योगी नरहरिनाथः
मृगस्थली गोरक्षपीठ निष्ठः
२०१७।५।५।७.

आमुद्रणाद्‌द्रुतमदल्पमतेरनल्पाः
सन्तीह चेच्छ्रुतिकटुत्रुटयस्तदर्थम् ।
विज्ञान् क्षमां सविनयं गुणपक्षदृष्टीन्
संयाचते भरतराज उदारबुद्धीन् ॥

लेखकः—



नेपाल-देशः

महेन्द्रोदयम्

ताम्रकौशिकीतटस्थ – मन्थली ग्रामवास्तव्येन सत्यालोपाध्येन शङ्करप्रसादाख्येन साहित्य शास्त्रिणा विरचितया 'कुञ्चिका' समाख्यया टीकया सहितम् ।

प्रथमः सर्गः

अथ तत्र-भवान् नेपालराज्यान्तर्गत मन्थलीग्राम वास्तव्य आङ्गलसंस्कृतादिभाषावित् प्रतिभाशाली महाकवि र्भरतराजशर्मा " काव्यं यशसे ऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपयुजे । " इत्याद्यालङ्कारिक वचन प्रामाण्यात् काव्यस्या ऽनेक श्रेयः साधनतां 'काव्यालापां-श्च वर्जयेत्' इत्यस्य निषेध शास्त्रस्या ऽसत्काव्य विषयतां च पश्यन् 'महेन्द्रोदया' ख्यं महाकाव्यं विधित्सु श्चिकीर्षितार्थविघ्नसमाप्त्यर्थम् 'आशीर्नमस्क्रियो वस्तुनिर्देशो वाऽपि तन्मुखम्' इति शास्त्रोक्ते रादौद्विसहस्रजिह्वं शेषनागं तथैक मीश्वरं प्रणम्य नमस्कारात्मकं मङ्गलं करोति --।

अशेषनागेशशिरोविशेषका-
वनीविशेषप्रलयावशेषकम् ।
विपश्चितः शेष इति ब्रुवन्ति यं
विशेषतस्तं प्रणमामि चेतसा ॥१॥

प्रणम्य भक्त्याऽशेषेशं शेषेशं साध्यसिद्धये ।
उद्घाट्यते काव्यपेटी 'कुञ्चिका' टीकयाऽनया ॥१॥

अशेष इति। अशेषनागेशशिरोविशेषकावनीविशेषप्रलयावशेषक मशेषाः सम्पूर्णा ये नागा स्तेषां य ईशः स्वामी तस्य यच्छिर स्तस्य विशेषकं तिलकं तत्सदृशी शिरो भालयो रति सान्निध्यात् , याऽवनी पृथ्वी तस्या विशेषप्रलयो महा प्रलय स्तस्मादवशेषको यस्तं तथोक्तम् । मूर्धन्यर्पितमणुवत् सहस्र मूर्ध्नो भूगोलं सगिरि सरित्समुद्रसत्त्व' मिति भागवतो क्तत्वात्। विशेषक मित्यत्र स्वार्थेकः। ये विपश्चितो विद्वांसः 'शेष' इतिब्रुवन्ति वदन्ति । तं द्विसहस्रजिव्हं शेषनागं पृथिव्याः प्रलयेतदाधार भूतस्य शेषनागस्यैवाऽवशिष्टत्वात्, वा तमेकमीश्वरं प्रलय एकस्यैवेश्वरस्य सत्त्वा दित्याशयः। विशेषतोऽसामान्यत्वेन चेतसा हृदाप्रणमामि। पृथिव्याः प्रलयस्य पश्चात् कल्पान्तरेऽपि मे काव्यं द्विसहस्ररसनः शेषो ब्रूया दुतेश्वर एव ब्रूया दित्याशयेन काव्यस्याऽमरत्वं चिकीर्षुः कवि स्तत्स्मरणं

कुरुते । आदौ स 'शेष' शब्दस्य प्रति सर्गान्तं 'राज' शब्दस्य च प्रयोगं कराति । एतेन शेषराजाभिधानानां विदुषा मन्ते वासी कविः स्वगुरूं स्मरतीत्यनुमीयते वा सर्गान्ते 'राज, शब्द प्रयोगेण स्वनाम्न एकदेश ग्रहणं करोति । 'देवता वाचका शब्दा ये च भद्रादिवाचकाः ते सर्वे नैव निन्द्याःस्यु र्लिपितो गणतोऽपिवे' त्युक्तेरत्र जगणस्य दोषत्वेऽप्यकारस्य वासुदेवा भिधानान्नैव दोषत्वं यथा 'अकारो वासुदेवः स्यात्' । इति अत्र शेष शब्दस्य पुनरावृत्या छेकानुप्रासोऽलङ्कारः सर्गेऽस्मिन् वंशस्थंवृत्तम् । "जतौ तु वंशस्थमुदीरितं जरौ" इति लक्षणात् । श्लोक द्वयेन कविः स्वकायगर्वं परिहरति—

क्व रम्यदेशेऽमरगीतकीर्तयः
क्षितीश्वरास्ते क्व च मन्दधी र्मम ।
कथं भवेदत्र यथार्थ वर्णनं
तथापि वाक्केलि रियं वितन्यते ॥२॥

क्वेति ॥ रम्यदेशे रमणीय जनपदे नेपाल इत्यर्थः । अमरगीत कीर्तयो न म्रियन्त इत्यमरा देवास्तैं र्गीता कीर्तिर्येषांते । अमरै र्गायमानत्वा दमर कीर्तय इत्यर्थः । ते प्रसिद्धाःक्षितीश्वरा महीशाः पृथ्वीनारायणादयो राजान इत्यर्थः क्व कुत्र । मम मन्दधी स्तुच्छ

मतिः क। देवैस्तुत्यानां नेपाल महीपालानां कीर्ति वर्णनेऽसमर्थो ऽस्मीति भावः। अत्रास्मिन्काव्ये यथार्थवर्णनं कथं भवेन्न भवेदेव। तथापीयं वाक्केलि र्वाचां केलिर्लीला वितन्यते विस्तायतेऽतो गुणैक पक्षपातिनः सज्जना गरीयसां मपि त्रुटिं मा मतिपथ मानयन्त्वितिभावः। अत्रपूर्वार्धे विषमालङ्कार स्तल्लक्षणं यथा "विरूपयो स्तद्घटनासा च तद्विषयं मतम् इति।

स कालिदासेन पुरैव वर्णितो
विशालकायो धरणीधरेश्वरः।
भविष्यति प्रागगते हि मे मते
रलङ्घ्यदुर्गं कवितायने स्थितम् ॥३॥

स इति ॥ कालिदासेन तदाख्य महाकविना पुरा प्रागेव वर्णितोऽतो विस्तोरण साम्प्रतं तद्वर्णनाऽप्रयोजन मित्यर्थः। कालिदास प्रणीत कुमार सम्भव महाकाव्ये हिमालयस्य वर्णना दितिभावः। विशालकायो विशालः स्थूलः कायः शरीरं यस्य सः। स प्रसिद्धो धरणीधरेश्वरो धरणी धराणां महीभृता मीश्वरः स्वामी हिमालय इत्यर्थः। प्राक् पूर्वं मेऽगते नास्ति गतिर्यस्या स्तस्या मते बुद्धेः 'धीः प्रज्ञा शेमुषी मति' रित्यमरः। कवितायने कवितैवाऽयनं वर्त्म तस्मिन्। स्थितम्। अलङ्घ्यदुर्गं दुर्लङ्घ्यप्राकारो भविष्यति। अयनं वर्त्ममार्गाध्व पन्थानः

पदवी सृति' रितिचामरः। कवितो वर्त्मनि जिगमिषो र्मे पङ्गु मते र्लङ्घ्य विशाल हिमालय एव गति रोधो भवेदित्याशयः। सदैव हिमालयः कवे र्नयन गोचर श्चेति बुध्यते।

साम्प्रतं दशभिः श्लोकै र्हिमालयं वर्णयति –

समन्ततः सन्ति समुन्नताद्रयः
परन्तु ते यान्ति न यस्य तुल्यताम् ।
सउच्च दीर्घो विपुलो हिमालयो
धनाधिनाथस्य दिशोऽस्ति मण्डनम् ॥४॥

समन्तत इति ॥ समुन्नताद्रयः समुच्च गिरयः। समन्ततः सन्ति परन्तु तेऽद्रयो यस्य हिमालयस्य तुल्यतां सादृश्यं न यान्ति न प्राप्नुवन्ति। उच्चदीर्घ उच्च श्चासौ दीर्घश्चोच्चदीर्घ उन्नतायतः। विशेषणयो रपि कुपाणिखञ्जवदैच्छिकोपसर्जनत्वविवक्षया विशेषणसमासः। विपुलो विशालः स यच्छब्दनिर्दिष्टः प्रसिद्धो हिमालय स्तुषाराचलो धनाधिपस्य कुवेरस्य दिशः काष्ठाया उत्तरस्या दिश इत्यर्थः। 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्चता' इत्यमरः। मण्डनं भूषण मस्ति। अन्ये गिरयः केवल मुन्नता वा दीर्घा वा विपुला एवाऽसौतु दीर्घोन्नतो विपुलश्चात एव तेभ्यो विशिष्टः पुन र्धनाधिपस्य दिशो मण्डन त्वेन रत्नादिपूर्ण श्चेति बुध्यते।

यदीयया सह्ययोत्तरानिलो
निषिध्यते शीतमरुस्थलागतः ।
समुद्रसम्भूतमरुन्निरोधनात्
प्रसूतपर्जन्य उपास्यते च यः ॥५॥

यदीययेति ॥ यदीयया यस्येयं यदीया तया हिमाद्रि-सम्बन्धिन्या सह्यया सुकृपया शीतमरुस्थलागतः शीतमरुस्थलं तिब्बताख्य मरुभूमिस्तत आगतः। उत्तरानिल इति नामधेय उत्तरदिशो वहन् वायु रतिशीतस्समीर इत्यर्थः । निषिध्यते निरूध्यते हिमालयस्य पूर्व पश्चिमस्थितित्वात् । अन्यथा भारत बर्ष मपि शीत मरुभूमिर्भवेत । समुद्रसम्भूतमरुन्निरोधना-त्समुद्रा द्वङ्गोपसागरात्सम्भूतो यो मरुत् पवनो दक्षिणदिशो वहन् वायुरित्यर्थः। 'समीरमोरुतमरुज्जगत्प्राणसमीरणा' इत्यमरः । तस्य निरोधनात् रोधात प्रसूतपर्जन्यः प्रसूतमेघः पर्जन्यो मेघ शब्देऽपि ध्वनदम्बुदशक्रयो रिति विश्वः । यो हिमालय पास्यतेऽखिलै रितिशेषः। उक्तवायो रोधादेव भारतादिदेशेषु जल वृष्टि र्भवतीति भौगोलिकी प्रसिद्धिः । हिमालयेन भारता-दि देशा उत्तरानिलात् रक्ष्यन्ते तैश्च वृष्टिदो हिमालयः सेव्यते इति बोद्धव्यम् । यत्तदोर्नित्यसम्बन्ध ' इतिन्यायस्योल्ल ङ्घितत्वे नाऽत्र दोषत्वं शङ्क्यम, पूर्वमेवोदाहृतेन तच्छब्देन

हिमालयशब्देनैवाकाङ्क्षानिवृत्तेः । एतादृशः प्रयोगो यथा कालिदासकृतौ कुमार सम्भवे " यं सर्व शैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे । भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहु र्धरित्रीम् ॥ "

हिमोद्भवा नीलतडाग सम्भवा
वहन्त्यनन्ताः सरितो यदङ्गतः ।
विभान्ति तासां तरलोर्मयः सदा
स्रजो यथा भारतभूवधूरसि ॥६॥

हिमोद्भवा इति ॥ यदङ्गतो हिमालयावयवतो हिमोद्भवास्तुषारोद्भूता नील तडागसम्भवा नीलाः श्यामला गभीरत्वात् तेच ते तडागाः कासारा स्तेभ्यः सम्भवो जनि र्यासां ताः । ‘ पद्माकर स्तडागो ऽस्त्री कासारः सरसी सरः’ इत्यमरः । अनन्ता अनेकाः सरितो नद्यो गङ्गादिनद्य इत्यर्थः । वहन्ति तासां नदीनां तरलोर्मय श्चपलवीच्यो भारत भूवधूरसि भारतस्य भारत वर्षस्य या भू र्भूमिः सैव वधूः सभर्तृका स्त्री तस्या उरसि वक्षसि । रूपकोलङ्कारः । स्रजो यथा माला इव । सदा सर्वदा द्वादशसु मासे ष्वित्यर्थः, सदा हिमाभावत्वेन गभीरसरसां जलाभावत्वेन च विभान्ति राजन्ति । यथा सभर्तृकाणां नारीणा मुरसि चपला मालाः शोभन्ते तथा भारत भुवो वक्षस्थले सरित्तरलोर्मयः सदा राजन्ते ।

समुद्गते भास्वति य स्तमोऽर्णवाद्
गतश्च दुर्वर्णमयः सुवर्णताम् ।
सुवर्णवर्णैः कविभिश्च वर्ण्यते
"न वर्णभेदस्य कथाऽत्र वर्तते ॥७॥

समुद्गत इति । भास्वति विवस्वति 'भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मय' इत्यमरः । तमोर्णवात्तमोऽन्धकार एवार्णवः समुद्र स्तस्मात् । समुद्गत उद्गते सति भावे सप्तमी । दुर्वर्णमयो रजतमयो हिमप्राचुर्येणेतिज्ञेयम् । तत्प्रकृत वचने मय 'डिति मयड् प्रत्ययः ।' दुर्वर्णं रजतं रूप्यमित्यमरः । यो हिमालयः सुवर्णतां कनकत्वं च "तस्य भावस्त्वतला" विति तल्प्रत्यय "स्त्वलन्तं स्त्रिया" मिति स्त्रीत्वम् गत इतः सन् । सूर्योदयेन पीतीभूतः सन्नित्यर्थः । दुर्वर्ण मयोऽपि कथं सुवर्णतां गत इति विरोधाभासः । कविभिः सुवर्णमयैः कनकाक्षरैः । अत्र हिमालये वर्ण भेदस्य वर्णानां भेद स्तस्य कथा वार्ता न वर्तते न विद्यते । हिमप्राचुर्याच्छुक्लवर्ण एवात्र विद्यते, नान्ये कृष्णहरितादिवर्णाः सन्ति । वा 'अफ्रिका' ख्ये देश इव गौराङ्ग कृष्णाङ्ग भेदोऽत्र नास्ति, प्राणिनः समभावा एवेत्यर्थः इत्थं वर्ण्यते प्रशंस्यते । हि निश्चयार्थे । अत्र वर्णानां पुनरावृत्त्या छेकानुप्रासोऽलङ्कारः ।

दिनावसानेऽशुमतोऽरुणैः करै-
विलोहिता पीनपयोधराम्बराः
विलासवापीष्ववतीर्य नन्दनात्
सुराङ्गना यत्र लसन्ति सालसम् ॥८॥

दिनेति ॥ दिनावसाने दिवसान्तेऽशुमतः सूर्यस्याऽरुणैः शोणैः करैः किरणैः विलोहितापीनपयोधराम्बरा विलोहितानि रक्तीकृतान्यासमन्तात् पीनानां कठिनानां पयोधराणां स्तनाना मम्बराणि वस्त्राणि यासांताः। सुराङ्गना देवयोषितो यत्र हिमालये नन्दनात् स्वर्गोद्यानादवतीर्याऽऽगत्य विलासवापीषु विलासार्थं विश्रमार्थं या वाप्य स्तडागा स्तासु। सालस मलसेन सहितं यथा स्यात्तथा लसन्ति विलसन्ति। नायक कृत स्तनमर्दनाद्धेतो र्नखक्षतेन रक्तकञ्चुकाभि : स्त्रीभी रक्तप्रक्षालनार्थं विलास वापीषु गम्यत इत्यपि व्यज्यते!

यदुत्तमाङ्गे चरणौ निधाय हि
व्यलोकि भूः केन विदेशिना कदा ?
स दैशिक स्तेनजिङः कृती ध्रुवं
य आरुरोहाऽचलराज मूर्धनि ॥९॥

यदिति। यदुत्तमाङ्गे यन्मस्तके केन विदेशिना विदेशवासिना कदा

1 (२६ ने १९५३ ई०)

कस्मिन् दिने चरणौ निधाय संस्थाप्य भूः पृथ्वी व्यलोकि विलोकिता न विलोकितेत्यर्थः। हीति निश्चयत्वे। एतेन 'हिलारिनामा विदेशी पर्वतशिर आरुरोहे' ति वादिनोऽसत्याः प्रतिभान्ति। दैशिकः स्वदेशोत्पन्नो नेपालभूजात इत्यर्थः। स प्रसिद्धस्तेनजिङ स्तदाख्यः पुरुषः कृती पुण्यवान्। ध्रुवम्। यस्तेनजिङोऽचलराजमूर्धनि पर्वत राजशिरसि व्योमकूट इतियावत् (२९०२८ फिट देव दुङ्गा सगरमाथा वेति भाषायाम्) आरुरोह।

जितं जितं तच्चरणेन चुम्बितं
हिमालयस्याऽपि समुन्नतं शिरः।
यश स्तदीयं गिरिराज गर्वजित्
सुमेरुशृङ्गं विकचीचकार किम्॥१०॥

जितमिति। तच्चरणेन तेनजिङपादेन हिमालयस्य तुषाराद्रेः समुन्नतं समुच्च मपि शिर श्चुम्बितं तेनजिङचरणाभ्यां हिमाद्रे रुन्नतं शिर स्पृष्ट मित्यर्थः। जितं जितं मानव चरणेनाऽगम्याद्रेः शिरोऽपि विजितं, हर्षार्थे द्विरुक्तिः। तदीयं तेनजिङसम्बन्धि गिरिराजगर्वजित् गिरिराजस्य तुहिनाचलस्य गर्वं 'शिरो मे कोऽपि नरःपादेनाऽऽक्रान्तुं नशक्नोती' त्यभिमानं जयतीति तथोक्तम्। यशः कीर्तिः। कर्तृ पदं चैतत्। सुमेरुशृङ्गं मेरुशिखरम्। विकचीचकार व्यकाशयत्। "कृभ्व

स्ति योगे सम्पद्य कर्तरिच्वि" रिति च्विप्रत्ययः। किमु- त्प्रेक्षायाम्। तेनजिङ्गस्य यशः केवलं हिमालयशिखापर्यन्त- मेव नागच्छ दपितु स्वर्गपर्यन्त मारुरोह किमित्यर्थः।

अहो द्विवारं धरणीधरेश्वरो
　निजापमानेन मलीमसोऽभवत्।
नगारिबाहु र्मनुजस्य पादकौ
　बभूवु रद्रीश्वरमानभञ्जनाः ॥११॥

अहो इति॥ धरणीधरेश्वरो धरन्तीति धराः। पचाद्यच्। धरण्या धराः पर्वतास्तेषा मीश्वरो हिमालय इत्यर्थः। निजाप- मानेन निजस्य स्वस्याऽपमानोऽनादर स्तेन। द्विवारं समयद्वये मलीमसो म्लानोऽभवत्। यतो नगारिबाहु र्नगानां पर्वतानां योऽरिः शत्रु रिन्द्र इत्यर्थ स्तस्य बाहुः करः। पुरा वज्री पर्वतानां पक्षान् निजायुधेनाऽच्छिनदिति पुराणप्रसिद्धिः। मनुजस्य तेनजिङ्गस्य पादकौ चरणौ चैते त्रयः। अद्रीश्वरमानभञ्जनाः शैलेशगर्वापहारका बभूवु रभवन्। अहो आश्चर्यार्थे।

न वा हिमाद्रे र्महिमाऽपहीयते।
　कदा कलङ्केन शशी न गीयते?।
सहोमया यत्र वसन् सदा शिवः
　करोत्यहो गौरवरक्षणं गिरेः ॥१२॥

न वेति ॥ वा हिमाद्रे र्महिमा गौरवं नापह्रीयते न तिरस्क्रियते दृष्टान्त माह-कलङ्केन लाञ्छनेन। हेतौ तृतीया। शशी चन्द्रः कदा न गीयते न स्तूयते? अपितु गीयत एव। पक्षच्छेदन-नरपादशिखास्पर्शनरूपकलङ्कद्वये सत्यपि हिमाचलस्य गौरवं, लाञ्छने सत्यपि चन्द्रस्य महिमेव विद्यत एवत्यर्थः। यत्र हिमालये। उमया पार्वत्या सह सदा वसन् तिष्ठन् शिवः शम्भुर्गिरे हिमालयस्य गौरवरक्षणं महिमत्राणं करोति। अहो आश्चर्यार्थे।

नवभिः श्लोकैः कवि र्नेपालं वर्णयति—

रवेः प्रतापाद् द्रवता मितं हिमं।
दिने दिने पातयतो गिरेरधः।
विभाति 'नेपाल' इतीरितं जनैः
सुराष्ट्रकं पूर्वदिशोऽपरां ततम् ॥१३॥

रवेरिति ॥ रवेः सूर्यस्य प्रतापा त्तेजसो द्रवतां द्रवत्त्वं तारल्यमित्यर्थः। इतं गतम्। 'इण् गतौ धातोः क्तः। हिमं तुहिनं दिने दिने पातयतो गिरेः पर्वतस्य पूर्वोक्तस्य हिमालयस्येत्यर्थः। अधो नीचैः हिमालयस्य दक्षिण इति बोद्धव्यम्। जनैर्लोकै 'र्नेपाल' इतीरितं कथितं नेपालाख्य मित्यर्थः। पूर्व

दिशः पूर्वा चासौ दिक् पूर्वदिक् तस्याः प्राच्यकाष्ठायाः। अपरां पश्चिमां दिशं ततं विस्तृतं सुराष्ट्रकं सुष्ठु च तत् राष्ट्रं सुराष्ट्रं तदेव तथोक्तम्। स्वार्थे कन्। विभाति चकास्ति।

गिरीशसव्याङ्क मितः सुरक्षितो
लघुः स देशोऽस्ति गुणै र्ध्रुवं गुरुः।
अकिञ्चनोऽपी–हमहद्भि रादृतो
लभेत वन्द्यं भुवि गौरवं यतः॥१४॥

गिरीशेति॥ गिरीशसव्याङ्कं गिरीणां पर्वतानां य ईशः स्वामी हिमालय इत्यर्थः। तस्य सव्याङ्को दक्षिणोत्सङ्गस्तं तथोक्तम्। "सव्यं तु दक्षिणे। वामे च प्रतिकूले चे" तिविश्वः। इतो गतो हिमाद्रिदक्षिणाङ्के स्थित इत्यर्थः। अत एव सुरक्षितः सुत्रातः शत्र्वाक्रमणभीतिंविना स्थित इतिभावः। लघुरविशालःस प्रसिद्धोदेशो जनपदो नेपाल इत्यर्थः। गुणैः प्रकृतिदत्तै र्गुणै र्गुरु र्महान्। अस्ति। ध्रुवम् निश्चये। नेपालो भूमिदृष्ट्या लघुरपि गुणदृष्ट्या गुरु रस्तीत्यर्थः। अर्थ ममु मर्थान्तरेण दृढयति— यतो यस्मात् कारणेन। इह भुव्यत्र पृथिव्यां महद्भिः श्रेष्ठै रादृतो मानितोऽकिञ्चनोऽपि दरिद्रोऽपि वन्द्यं स्तुत्यं गौरव मुत्कर्षं लभेत प्राप्नुयात्। अत्रार्थान्तरन्यासोऽलङ्कारः।

सुदीर्घ'चूडा गिरि' रत्र भारता
ततो 'महाभारत' शैल शेखरः ।
तत स्तुषाराचल इत्यगैःकृता
वसुन्धरायां वसुदा अमी त्रयः ॥१५॥

सुदीर्घेति ॥ अत्र वसुन्धरायां नेपाल भुवि । भारतात् भारतवर्षाच्चूडागिरि स्तदाख्यपर्वतः ('चुरे' इति भाषायाम्) भारतमारभ्य चुरेपर्यन्तमित्यर्थः । प्रथमोऽयं भागः । तत श्चूड़ा गिरे र्महा भारत शैलशेखरः शैलानां शेखर आपीडः शैलशेखरो महाभारत एव 'महाभारत' इति प्रसिद्धः शैल एव शैल शेखर स्तथोक्तः । चूड़ा गिरिमारभ्य महाभारतशैलपर्यन्त मित्यर्थः । द्वितीयोऽयं भागः । ततो महाभारत शैला त्तुषाराचलो हिमालयो महाभारतशैल मारम्भ हिमालयपर्यन्त मित्यर्थः । तृतीयोऽयं भागः । इतीत्थमगै र्नगैः कृता विहिता अमी त्रयो विभागा वसुदा धनदायिनः सन्तीतिशेषः ।

हरिद्वरे रत्र ससप्तकौशिकी
विभाति बालेव ससप्तसप्तकी ।
सशारदा सारदया दिगप्पते-
श्चकास्ति कर्णालिकया विशालया ॥१६॥

हरिद्दिति ॥ अत्र नेपाले ससप्तकौशिकी सप्त सप्तसंख्यका याः कौशिक्यः कौशिकीति प्रसिद्धा नद्य स्ताभिः सहिता तथोक्ता । हरे रिन्द्रस्य हरिद्दिक् पूर्वादिगि त्यर्थः । " दिशस्तु ककुभः काष्ठा आशाश्च हरितश्चता' इत्यमरः । ससप्तसप्तकी सप्त याः सप्तक्यो रशना स्ताभिः सहिता तथोक्ता । ' स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथे' त्यमरः । बालेव बालिका यथा विभाति शोभेत । अभिज्ञा स्त्री त्वेका मेव रशनां दधात्यनभिज्ञा बाला त्वनेका अपि रशना धत्तेऽत एव बालैवोपमायोमुचिता । सशारदा शारदया तदाख्यया नद्या सहिता । अप्पते रपां जलानां पतिः स्वामी वरूण इत्यर्थस्तस्य दिक् काष्ठा पश्चिमा दिगित्यर्थः । सारदया सारंबलं ददातीति सारदा तया तथोक्तया विशालया महत्या कर्णालिकयो कर्णालीति प्रसिद्धया नद्या । हेतौ तृतीया । चकास्ति राजते । नेपालस्य पूर्वदिशि सप्तकौशिक्यः सन्ति पश्चिमदिशि सशारदा कर्णालीति ख्याता नदी विद्यत इति भावः ।

विभाति 'काली' हरिति प्रभो रपां
तथाऽस्ति 'मेची' च शचीपते र्दिशि ।
तदन्तरे शैलसमस्थली युता
स्वतन्त्रनेपालधरा विराजते ॥१७॥

विभातीति । अपां जलानां प्रभोः स्वामिनो वरुणस्येत्यर्थः ।

हरितिदिशि पश्चिमदिशीत्यर्थः काली महाकाली विभाति शोभते। तथा मेची तदाख्या नदी च शचीपतेः शक्रस्य दिशि पूर्वदिशीत्यर्थः। अस्ति। तदन्तरे कालीमेची मध्ये शैलसमस्थली युता पर्वतसमभू (तराई) युक्ता स्वतन्त्रनेपालधरा अपरतन्त्र-नेपालमही विराजते।

अमुष्य देशस्य च मध्यमे स्थले
सदैव या हार इव प्रदृश्यते।
अगण्यपुण्या खलु सैव गण्डकी
सह त्रिशूल्या वहते प्रवाहिणी ॥१८॥

अमुष्येति। अमुष्य देशस्य नेपालस्य मध्यमे स्थले मध्य भागे च या सदैव द्वादशमासेषु हार इव दीर्घत्वात् प्रदृश्यते विलोक्यते। अगण्य पुण्याऽसङ्ख्यधर्मा पवित्रेत्यर्थः। प्रवाहिणी प्रवाहा ऊर्मयः सन्ति यस्यांसा गण्डकी तदाख्या सरिदेव त्रिशूल्या तदाख्यया नद्या सह। वहते खलु। नेपालस्य मध्य भागे गण्डकीति ख्याता सरिद्वहत इत्यर्थः।
युग्मकम्

किरातका द्वादश, लिम्बका दश.
त्रयश्च मल्ला अथ पञ्च सेनकाः।
दशाधिक द्वादशराज्यपालका
स्तथाचतुर्विंशतिराज्य-रक्षकाः॥१९॥

लियापचाः पञ्च च भिन्नभूमिपाः
पुरा यआसन्निह दिक्षु विस्तृताः ।
ध्रुवं तदेकीकरणेन सम्प्रति
स्वतन्त्र'नेपाल' इतोऽस्त्यखण्डताम्॥२०॥

किरातका इति ॥ द्वादश किरातकाः किराताः पूर्वदिक्स्था राजान इत्यर्थः । दश लिम्बकाः 'लिम्बु' इति प्रसिद्धा राजानः पूर्व दिक्स्था एते ऽपि । त्रयो मल्ला श्चोपत्यकावर्तिभूपाः । अथ पञ्च सेनकाः सेनवंशीया माकन्दोदिप्रदेशस्था राजान इत्यर्थः । दशाधिकद्वादशराज्यपालका द्वाविंशतिसंख्यका राजानः (भाषायाम् 'बाइसे' इति प्रसिद्धा राजानः) पश्चिमप्रदेशस्था राजान इति बोद्धव्यम् । तथो चतुर्विंशति राज्य रक्षका श्चतुर्विंशंति राज्य पालकाः (भाषायाम् 'चौबिसे' इति ख्याता राजानः) एतेऽपि पश्चिम प्रदेशस्था एव ।

लियापचा इति ॥ पञ्च लियापचा स्तज्जातिविशेषनृपाः (भाषायां 'ल्यापचा' इति प्रसिद्धा राजानः) च एतादृशा दिक्षु हरित्सु विस्तृताः । ये भिन्नभूमिपा विभिन्न मही-पालाः । पुरा । इह नेपाले । आसन् । तदेकीकरणेन तेषां राज्ञा मेकीकरणं तेन । स्वतन्त्रनेपालेऽपरतन्त्रनेपालाख्य देशः सम्प्रति वर्तमानसमये) अखण्डतामक्षुण्णता मितो

गतो ऽस्ति । ध्रुवम् निश्चयार्थे ।

इहौष्ण्यशैत्यादिकतीव्रपीडया
न मानवाः सन्ति कदाऽऽपदङ्गताः ।
सदा समासाद्य च मध्यमां स्थितिं
भजन्ति सानन्द मृतून् सुखावहान् ॥२१॥

इहेति ॥ इह नेपाले मानवा मनुष्या औष्ण्यशैत्यादिकतीव्रपीडयोष्णस्य भाव औष्ण्यं शीतस्य भावः शैत्यं । गुण वचन ब्राह्मणादिभ्यः ष्यञ् ' इत्यनेनोभयत्र ष्यञ् प्रत्ययः, औष्ण्यं च शैत्यं चौष्ण्य शैत्ये ते आदयो य औष्ण्यशैत्यादय स्तएवौष्ण्य शैत्यादिका स्तेषां या तीव्रा पीडा तयौष्ण्यशैत्यादिकतीव्र पीड़या तापशैत्यप्रभृत्यतिबाधयाऽऽदिशब्देनाऽतिवृष्ट्यादि र्ज्ञायते । आपदं गता विपद्ग्रस्ताः कदाऽपि न सन्ति । सदा मध्यमां स्थिति मुचिता मवस्थां समासाद्य सम्यक् प्राप्य च सुखावहान् सुखप्रदानृतून् सानन्दं भजन्ति प्राप्नुवन्ति पृथिव्याः समशीतोष्ण कटिबन्धे नेपालस्य स्थिते रिह सर्वर्तवः सुखकरा इत्यर्थः ।

नेपाल वर्णन प्रसङ्गात तद्राज धानी मुपत्यकां पञ्चभिः श्लोकै र्वर्णयति—

अरण्यलेखामयमेखलान्विता
समन्ततो दुर्गमशैलवेष्टिता ।
पुरत्रयेण प्रथितेह सुन्दरी
ह्युपत्यका राजति राजवल्लभा ॥२२॥

अरण्येति । इह नेपालेऽरण्यलेखामयमेखलान्विताऽरण्यानां वनानां लेखा पङ्क्तिः सैवाऽरण्यलेखामय्येतादृशी या मेखला काञ्ची तयाऽन्विता युक्ता । समन्ततोऽभितो दुर्गमशैलवेष्टिता दुर्गमै रगम्यै रत्युच्चै रित्यर्थः शैलै र्वेष्टिता परिवृता । पुरत्रयेण कान्तिपुर ललितपुर भक्तपुराख्यै र्नगरैः प्रथिता प्रख्याता सुन्दरी चारू राजवल्लभा नृपप्रियोपत्यकाऽद्रीणामासन्ना भूमिः 'उपत्यकाद्रे रासन्ना भूमि' रित्यमरः । उपत्यकेतिख्याता राजधानीत्यर्थः । ' उपाधिभ्यांत्यकन्नासन्नारूढयो ' रिति त्यकन् प्रत्ययः । हि निश्चये ।

पुरा तु साऽऽसी दुरगहदोऽम्मयः
स्वयंभुवोज्योति रभाद् यदम्बुजे ।
यदम्भसां निर्गमना दनुत्तमं
विनिर्मितं मञ्जुल 'मञ्जुपत्तन'म् ॥२३॥

पुरेति "तुकिन्तु पुरा प्राचीनकाले सत्ययुग इत्यर्थः ।

सोपत्यकाऽम्मयो जलमय 'आपस्त्री भूम्नि वा वारि' त्यमरः। उरगहृदो नागहृद आसीत्। यदम्बुजे यस्य नागहृदस्याऽम्बुजं कमलं तस्मिन्। स्वयं भुवो भगवतो ज्योति स्तेजः। अभादशोभत। कृतयुगे 'विपश्वी' ति नाम्नोपलक्षितः कश्चित् बुद्धधर्मावलम्बी जनो नागहृदेऽलौकिकप्रेरणया कमलवीज मवपत्। षड्मासानन्तरं कार्तिकशुक्ल पूर्णिमायां तिथौ तद्बीजादलौकिकं कमल मुद्भूतम। तत्कमल दलान्तरे स्वयं भुवो ज्योतिर्मयी मूर्तिः प्रादुरासीत्। ता मेव मूर्तिं शैवाः पशुपते ज्योंतिरिति ब्रुवत इतीतिहासोक्तिः। यदम्भसां यस्य नागहृदस्याम्भांसि जलानि तेषाम्। निर्गमना न्निर्याणात। हेतौ पञ्चमी। अनुत्तमं श्रेष्ठं मञ्जुल मञ्जुपत्तनं मञ्जुलं सुन्दरं च तन्मञ्जुपत्तनं तथोक्तं मञ्जुपत्तनाख्यं नगरं मञ्जुश्रिया निर्मितत्वा त्तन्नाम्ना प्रथितं नगर मित्यर्थः। साम्प्रतं तु तदेव पत्तनं 'देवपत्तन' [देउपाटन इति भाषायाम्] मित्याख्यया प्रसिद्ध मस्ति। 'कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुल' मित्यमरः। विनिर्मितं विरचित मासीदितिपूर्वेणान्वयः। त्रेता युगे 'मञ्जुश्री' नामा-कश्चित् बुद्धधर्मावलम्बीजनो 'वरदां' मोक्षदां च द्वे निजे शक्ती फुल्लोच्चध्यानोच्चाख्ययो: पर्वतयो र्निधाय तदन्तरवर्तिनं गिरिं विच्छेद्य च नागहृदजलगमनवर्त्म निर्ममौ। साम्प्रतं तदेव स्थलं 'चक्रतीर्थम्' इति प्रथित मस्ति नागहृदाज्जले

निर्गते सति स गुह्येश्वरीं स्थापयित्वा मञ्जुपत्तनाभिधान मेकं नगरं च निर्माय तत्र धर्माकराख्यं क्षत्रियं राजत्वेनाप्यभिषिषेच । कोलान्तरे ' अशोक ' तनया ' चारुमती ' तन्नगरं पुन र्निर्माय पत्यु र्देवपालस्य नाम्ना ' देवपत्तन ' मित्य घोषयदितीतिहासोक्तिः ।

इह 'क्रकुच्छन्द' निवेदिते 'श्वरी'

ससर्ज लोकाय हिताय 'वाग्मती'म् ।

मनोरमोपत्यकयाऽनुमोदिता

अमेयतोयाः सरितोऽभवन् ततः ॥२४॥

इहेति॥ इहोपत्यकायां क्रकुच्छन्दनिवेदिता क्रकुच्छन्देन तदाख्येन बुद्ध धर्मिणा जनेन निवेदिता ऽऽ वेदिता तथोक्ता । ' ईश्वरी देवी गुह्येश्वरीत्यर्थः । लोकाय हिताय जनोद्धरणाय ' हितयोगे चे ' ति चतुर्थी । वाग्मतीं तदाख्यां नदीं ससर्जाऽसृजत् उपत्यकायां जलाभावं दृष्ट्वा पुरा क्रकुच्छ न्दनामा धर्मिष्ठो जलार्थं गुह्येश्वरी माराधितवान् । ततः प्रसन्ना देवी शिव पुर्या उत्तर प्रदेशात् वाग्मतीं ससर्जेतीतिहासोक्तिः । तत स्तदनन्तरं मनोरमोपत्यकया मनोरमा चेतोहरा योपत्यका तयाऽनुमोदिता अङ्गीकृता उपत्यकाया मुचिता इतिकवे स्तात्पर्यां

र्थः । अमेयतोया मपरिमेयं तोयं जलं यासु ता स्तथोक्ताः। सरितो नद्यो ऽभवन् ।

सरित्तटे देवगणेन संस्थितः
सदा 'पशूनां पति' रत्र पालकः ।
सनातनालम्बिजनैश्च बौद्धकैः
समाश्रिता तीर्थ वरेय मस्त्यपि ।।२५।।

सरिदिति। अत्रो पत्यकायां सरित्तटे नदीतीरे वाग्व-तीकूल इत्यर्थः। देव गणेन सुरसमूहेन सह । सहार्थे तृतीया ।सदा संस्थितः पशूनां पतिः पशुपतिरिति विख्यातः शिव एव पालको रक्षकः। अस्तीत्यपरेणान्वयः । इय मुपत्यका सनातना लम्बिजनैः सनातनं वैदिक धर्म मासमन्तात् लम्बन्ते तच्छीला एतादृशा जना स्तै र्बौद्धकै र्बुद्ध धर्मिभि र्जनैश्च समाश्रिता संसे विता तीर्थवरा तीर्थेषु वरा श्रेष्ठाऽप्यस्ति ।

इयं पुरा 'ने' मुनिनाऽनुपालिता
तदीयनाम्ना किमु भाति सन्ततम् ।
हेमालयादुत्तरवर्तिभि र्नृभिः
स्वभाषयोर्णालय मीरिताऽस्ति वा ।।२६।।

इयमिति ॥ पुरा प्राचीनकाले । 'ने' मुनिना 'ने' समाख्येन मुनिनाऽनुपालिताऽनुशासिता । पुरा तदाज्ञयैव राजानो देशशासनं कुर्वन्तिस्मेतीतिहासज्ञानामुक्तिः । इय मुपत्यका तदीयनाम्ना तस्येदं तदियं तच्च तन्नाम तेन 'नेपाल' इत्यभि धेयेनेत्यर्थः सन्ततंनित्यं भाति किमु । वा हिमालया त्तुषाराद्रे रुत्तरवर्ति भि रुत्तरदिक्स्थैः 'तिब्बता' ख्यदेशवास्तव्यै रित्यर्थः । नृभिर्जनैः स्वभाषयोऽऽत्मभाषयोर्णालय मूर्णागृह मितीरिता कथिताऽस्ति ! तिब्बतवास्तव्यजनभाषायां 'ने' शब्दस्यार्थो गृहं 'पाल' शब्दस्य चोर्णा खलु । ऊर्णा निर्मित वस्तूनां प्राचुर्या दुपत्यकां तिब्बतस्था जना 'नेपाल' ऊर्णालय मिति वदन्ति स्मेतीतिहासोक्तिः ।

किरातशासनं वर्णयति-

विजित्य भूपं 'भुवना'भिधानकं
'यलम्बरो' नाम किरातवंशजः ।
पुराऽभवद् भूपतिरत्र वीर्यवान्
ततः किरातैश्चिरमेव शासितम् ॥२७॥

विजित्येति । अत्रो पत्यकायां पुरो किरात वंशजः किरात कुलोत्पन्नो यलम्बरो नाम तदाख्यो वीर्यवान् वीरो भुवना भिधानकं भुवनसिंहाख्यम् । नामैकदेशे नामग्रहणम् ।

भूपं राजानमाभीरवंशजं नृप मितीतिहासाज्ज्ञेयम् । विजित्य पराजित्य भूपति रभवत् । तत स्तदनन्तरं चिरमेव चिरकाल पर्यन्तमेव किरातैः शासितं शासनं कृतम् । किरात वंशस्य द्वात्रिंशद्राजान उपत्यकायां राज्यं चक्रुरिवीतिहासज्ञाः ।

तदीयकाले विविधाः कला ययु-
वणिज्यया साकमहो समुन्नतिम् ।
अतो हि नेपालनिवासिनां नृणां
स आदिकालोऽभ्युदयस्य संस्कृतेः ॥२८॥

तदीयेति । तदीयकाले किरातराज्यसमये । विविधा बहुप्रकाराः कला गृहवस्तुनिर्माणादिकलाः । वणिज्यया साकं वाणिज्येन सह समुन्नतिं समुत्कर्षतां ययु र्जग्मु रहो इत्याश्चयम् । किरातराज्यसमये बहुविधानां कलानां वाणिज्यस्य चोन्नतिरासीदितिभावः । अतो ऽस्मात् कारणात् । नेपाल निवासिनां नेपाल देश वास्तव्यानां नृणां जनानां संस्कृते रभ्युदयस्या ऽऽदिकालः प्रथमसमयः स किरातकाल आसीदितिशेषः । हीतिनिश्चयत्वे ।

महीमशासु र्नयनत्रिसङ्ख्यकाः
किरातवंशोद्भवभूमिवल्लभाः ।
विशालराज्ये तु विखण्डितेऽभवन्
दशाधिकद्वादशसङ्ख्यका हि ते ॥२९॥

महीमिति । नयनत्रिसङ्ख्यका द्वात्रिंशत्संख्यकाः किरात वंशोद्भवभूमिवल्लभाः किरातकुलोत्पन्ना राजानो महीं भूमिं मशासुः । तु किन्तु विशालराज्ये पृथुसाम्राज्ये । विखण्डिते विशेषेण खण्डतां गते सति । ते पूर्वोक्ताः किरातमहीपालाः । दशाधिक द्वादशसङ्ख्यका द्वाविंशतसङ्ख्यका दश 'लिम्बु' द्वादश 'किराताः' इति बोद्धव्यम् । अभवन् । हि निश्चयार्थे प्रयुक्तम् ।

दशैव 'लिम्बवाः' प्रथिता हि तेषु, यैः
श्रिताऽरुणक्षालितशक्रदिग्वधूः ।
वसुन्धराशासनभारवाहका-
स्ततो बभूवुः किल सोमवंशकाः ॥३०॥

दशेति । तेषु द्वाविंशति सङ्ख्यकेषु किरातनृपेषु 'लिम्बवाः' स्तदाख्यजातिविशेषा दशैव प्रसिद्धाः । हि । ये लिम्ब जातिभि

रुणक्षालितशक्रदिग्वधूररुणक्षालिताऽ रुणसरिद्धौता या शक्रस्येन्द्रस्य दिक् पूर्वादिक् सैव वधूःस्त्री। श्रिता सेविता। लिम्बाः पूर्व दिशि निषण्णा इतिभावः। ततः किरातराज्यानन्तरं वसुन्धराशासनभारवाहका वसुन्धरायाः पृथ्व्या नेपाल भूम्या इत्यर्थः शासनमेव यो भार स्तस्य वाहका राज्य शासका इत्यर्थः। सोमवंशकाः सोमकुलोत्पन्ना भूपा बभवुः। किल॥ उपत्यकायां लिच्छविशासनावस्थां दर्शयति–

ततः स्वदेशोद्भवलिच्छवीश्वरै–
रकारि यद्राज्यमिह प्रतापिभिः।
अभूत्तदा तद्धिमवत्सुसंस्कृते–
र्निदानमेकं प्रमुखं किल स्थितेः॥३१॥

ततइति। ततः सोमवंश्यशासनानन्तरम्। प्रतापिभिः स्वदेशोद्भवलिच्छवीश्वरैः स्वदेशोद्भवा नेपालदेशोत्पन्ना ये लिच्छवीति प्रसिद्धा भूपा स्तैः। केचि त्तु लिच्छविभूपा विदेशागता इति कथयन्ति। इहोपत्यकायां यद्राज्यमकारि व्यधायि तच्च तदा तत्समये हिमवत्सुसंस्कृते हिमवत्सभ्यतायाः स्थितेः स्थानस्यैकं प्रमुखं निदान मादिकारण मभूत् किल। 'हेतुर्ना कारणं बीजं निदानं त्वादिकारण' मित्यमरः।

[i]यदांऽशुवर्मा नृपनीतिकोविदो
गुणोदधिर्धर्म उदारधीः सुधीः।
प्रतीपभूपान्तकरः शशास गां
तदाऽभवत् स्वर्णयुगोदयो ध्रुवम् ॥३२॥

यदेति। नृपनीतिकोविदो राजनीतिमनीषी गुणोदधिर्गुणसागरः। धर्मप्रजाधर्मे। जातावेकवचनम्। उदारधीरुदारा सरला धीर्बुद्धिर्यस्य सः। स्वधर्मनिष्ठः परधर्मानिन्दकश्चेतिभावः। अतएव सुधीः सुमतिः प्रतीपभूपान्तकरो विपक्षध्वंसकः। अंशुवर्मा तदाख्यो नृपो यदा यस्मिन् समयो गां भुवं शशास। तदा तस्मिन् समये। स्वर्णयुगोदयः स्वर्णस्य कनकस्येव युगस्योदय ओविर्भाव स्तथोक्तः। सुन्दरयुगोदय इत्यर्थः। सत्ययुगोदय इतियावत्। ध्रुवंनिश्चय मभवत्।

स मोचयित्वा निखिलाः प्रजा ऋणा-
च्चकार संवत्सरमेव नूतनम्।
अतस्तदीया भुवने मनोहरा
मरालमालेव बभौ यशोलता ॥३३॥

[i] -५७१ ई०।

स इति । सोऽशुवर्मा निखिलाः समग्राः प्रजा जनताः । ऋणान्मोचयित्वा संवत्सरमेव नूतनं चकार । स्वनाम्ना संवत्सरोऽङ्कित इत्यर्थः । अतस्तदीया यशोलता कीर्तिवल्लरी मनोहरा चेतोहरा मरालमाला हंसपङ्क्तिरिव भुवने जगति । बभौ शुशुभे ।

स दक्षिणस्यां दिशि हर्षवर्धनं
तथोत्तरस्यामपि शुद्धजीवकम् ।
स्वदेशरक्षां परिचिन्त्य नीतिवित्
समैहता ऽऽनेतु महो स्वकं वशम् ॥३४॥

सइति । नीतिविद्राजनीतिज्ञः स्वदेशरक्षां परिचिन्त्य विचार्य । सोंऽशुवर्मा दक्षिणस्यां दिशि हरिति हर्षवर्धनं तदाख्य भूपालं भारत भूप मित्यर्थः । तथा उत्तरस्या मपि शुद्रजीवकं शुद्धजीवोभिधानं तिब्बताख्यदेशे श्वरम । 'स्रोङ्चङ गम्पो' इति तिब्बत भाषायाम । स्वक मात्मकं वश माधीन्य मानेतुं समैहतैच्छत् । अहो इत्याश्चर्ये । दक्षिणोत्तरवर्ति विशालदेशाधिपमैत्र्यैव स्वदेश रक्षा भवतीति विचारयामासेत्यर्थः ।

अमुष्य दृष्ट्वाऽऽत्मसमं पराक्रमं
सखाऽञ्जसाऽभूत् किल भारतेश्वरः ।
न को लभेतैकपदेन मित्रतां
समानवीर्येषु नृपेषु भूतले ॥३५॥

अमुष्येति। अमष्यांऽशुवर्मण आत्मसमंस्वतुल्यं पराक्रमं वीर्यं दृष्ट्वा विलोक्य भारतेश्वरो हर्षवर्धनोऽञ्जसा झटिति सखासुहृद्भूत किल। यदा हर्षवर्धनो राजाऽभूत् तदैवांशुवर्माऽपि राजमुकुटं दधारेतीतिहासोक्तिः। देशद्वये मैत्रीसम्बन्धो बभूवेतिभावः। तमेवार्थं मर्थान्तरेण द्योतयति। भूतले को नृपो समान वीर्येषु तुल्यपराक्रमेषु नृपेषु राजसु। एकपदेन मित्रतां सौहार्दं न लभेत न प्राप्नुयात् ।

स शुद्धजीवाय नृपाय धीमते
कलत्रधर्मार्थमदात् सुतां ततः।
स्वभूः प्रगुप्तोत्तरदेशकेष्वपि
ससार नेपालपवित्रसंस्कृतिः ॥३६॥

सश्रुति। सोंऽशुवर्मा। धीमते मनीषिणे शुद्धजीवाय नृपाय सुतां तनयां भृकुटीनाम्नीं पुत्रीमित्यर्थः। कलत्रधर्मार्थं पत्नीत्वायाऽदात् ददौ। ततस्तस्मात्कारणात् स्वभूः स्वदेशो नेपाल देश इत्यर्थः। प्रगुप्ता रक्षिता तदाक्रमणभयाभावत्वेन। नेपालपवित्रसंस्कृतिरप्युत्तरदेशकेषु तिब्बतचीनादिदेशेषु ससार प्रसृतवती भृकुट्याः सम्बधादितिबोद्धव्यम्।

तत स्तदीयान्वयजा महीश्वरा
महीमशासुश्चिरमुग्रतेजसः ।
अथो नुवाकोटनिवासिभिः क्षितिः
प्रशासिता नैकनृपैः प्रतापिभिः ॥३७॥

तत इति । ततोंऽशुवर्मानन्तरम् । तदीयान्वयजास्तत्कुलोत्पन्ना उग्रतेजसो महौजसो महीश्वरा राजानो मही चिर मशासुः। अथो तेषां शासनानन्तरम् । नुवाकोटनिवासिभि र्नुवाकोटाख्यवास्तव्यैः प्रतापिभि नैकनृपैः बहुभूपैः । भास्करदेवादिभि र्नृपै रित्यर्थः।क्षिति ने पालमही प्रशासिता ।

न[3] राजपूतान् रविवंशशोभिन-।
स्तथा च कर्नाटकुलोद्भवान् नृपान् ।
स्मरेन्न नेपालवसुन्धरा यतः
प्रशासिता जातु बभूव तैरियम् ॥३८॥

नेति । नेपाल वसुन्धरा नेपालभू रविवंशशोभिनः सूयवंशिनो राजपूतान् तदाख्यजातिविशेषान् वामदेवादीन्

२–(१०४७-१०७८ ई०) ३- (१०८०ई० आरम्भकालः)। ..
(४- नान्यदेव (१०९७ई० ?)

नृपानित्यर्थः। तथा च कर्नाट कुलोद्भवान् कर्नाटाख्य कुलजान् नृपान् नान्यदेवादीन्नृपानित्यर्थः। न स्मरेदितिन, स्मरेदेवेत्यर्थः। यत इयं भूर्जातु कदाचित्तौ नृपैः प्रशासिता बभूव।

तत श्चिरं मल्लकुलप्रदीपकैः
सुशासिताऽभूदियमुत्तमै र्नृपैः।
जगाम साहित्यकला ससंस्कृति-
र्विकाशतामत्र जगद्विमोहिनी ॥३९॥

ततइति। ततस्तदनन्तरम्। इयमुपत्यकोत्तमैः श्रेष्ठै र्मल्ल वंशदीपस्वरूपै नृपैर्महीपैरारिमल्लदेवादिभिर्नृपैरित्यर्थः। चिरं बहुकाल पर्यन्तं सुशासिताऽभूत्। अत्राऽस्मिन् समये मल्ल नृपशासनकाल इत्यर्थः। अथवाऽत्रोपत्यकायाम्। ससंस्कृतिः संस्कृत्या सहिता तथोक्ता; जगद्विमोहिनी भुवनाश्चर्यकारिणी साहित्यकला साहित्येन सहिताकला साहिकला विकाशतो मुत्कर्षतां जगाम।

तदा सुराणां सरसा सरस्वती
ससार लोके सरसीव सारसी।
यतो रसाया अधिपा रसप्रियाः
ससारलेखा लिलिखु रसावहाः ॥४०॥

तदेति । तदा तस्मिन् समये । मल्लकाल इत्यर्थः । सुराणां देवानां सरसा रसयुक्ता सरस्वती भारती 'गीर्वाक् वाणी सरस्वती' त्यमरः । संस्कृतभाषेत्यर्थः । सरसि तडागे सारसी सारस योषिदिव लोके जगति ससार प्रसृतवती । यतो यस्मात् कारणात् रसप्रिया रसः शृङ्गारादिरसः प्रियो येषां ते । रसाया धरायाः "भूर्भूमि रचलाऽनन्ता रसा विश्वम्भरा स्थिरे" त्यमरः । अधिपाः स्वामिनो राजान इत्यर्थः । मल्लमहीपा इतियावत् । रसावहाः शृङ्गारादिरससमन्विताः ससारलेखाः सारेण सहिता ससारा एतादृश्यो या लेखा स्तास्तथोक्ताः । लिलिखुः । अत्र छेकानुप्रासोऽलङ्कारः ।

प्रतापमल्लः कविषूत्तमो नृपो
लिलेख काव्यानि बहूनि कोविदः ।
रसस्य भावस्य च गौरवादसौ
परां प्रतिष्ठां समवाप भूतले ॥४१॥

प्रतापेति । कविषूत्तमः श्रेष्ठः प्रतापमल्ल स्तदाख्यः कोविदो विद्वान् नृपो बहूनि नैकानि काव्यानि लिलेख । असौ प्रताप मल्लः । रसस्य शृङ्गारादिरसस्य भावस्य चाऽर्थबाहुल्यस्या

५ (१६३६–१६८६ई०)

ऽपि गौरवात् महिम्नः। हेतौ पञ्चमी। भूतले पृथ्वीतले। परामुत्कृष्टां प्रतिष्ठां समादरं समवाप लेभे।

न केवलं मल्लकुलोद्भवा नृपाः
कलासु साहित्यवनेषु चाऽभ्रमन्।
अहो विदित्वाऽखिलतन्त्रशास्त्रकं
व्यधुर्जगद्विस्मयकारि कर्म ते ॥४२॥

नेति। मल्लकुलोद्भवा मल्लवंशोत्पन्ना नृपाः कलासु चतुःषष्टिकलासु साहित्यवनेषु साहित्यारण्येषु च केवलं नाऽभ्रमन् अपि तु ते प्रसिद्धा राजानः। अखिल तन्त्र शास्त्रकं सम्पूर्ण तन्त्र स्मृतिं विदित्वा ज्ञात्वा जगद्विस्मयकारि भुवनाश्चर्यकृत कर्म व्यधुश्चक्रुः। अहो आश्चर्यार्थे।

परन्तु तद्वंशजभूमिपेष्वहो
बभूव पारस्परविग्रहो महान्।
अंतो हि 'गोरक्ष'महीभुजोऽमलं
तदीययाऽभाजि नृपश्रिया कुलम् ॥४३॥

परन्त्विवति। परन्तु तद्वंशजभूमिपेषु तेषां मल्लानां वंशेऽन्वये जाता ये भूमिपा राजान स्तेषु तथोक्तेषु। महान्

१- (मध्यरात्री, रविवार २५ सितम्बर १७६८ ई०)

पारस्पर विग्रहो ऽन्योन्य कलहो बभूव । अहो इत्याश्चर्यम् । अतस्तदीयया मल्लसम्बन्धिन्या नृपश्रिया राजलक्ष्म्या गोरक्षमहीभुजो 'गोरक्षा' (भाषायां—गोरखा) ख्य देशपालस्याऽमलं विमलं कुलं वशोऽभाजि । हि निश्चयार्थे । गोरक्षनृपालकुलोद्भूतः पृथ्वीनारायणसाहाभिधो वीरो मल्लनृपवंशोद्भूतं जयप्रकाशाभिधानं राजानं विजित्य तद्देश शासनाधिकारं जग्राहेतीतिहासज्ञाः ।

पृथ्वीनारायणसाहं वर्णयतिः-

प्रसिद्धगोरक्षनृपालनन्दनो
य आस नारायणसन्निभः क्षितौ ॥
स पृथ्विनारायणसाहदेवकः
शशास नेपालमखण्डमेककः ॥४४॥

प्रसिद्धेति । यः प्रसिद्धगोरक्ष नृपालनन्दनः प्रसिद्धस्य प्रख्यातस्य गोरक्षस्य गोरक्षाख्यदेशस्य यो नृपालो राजा नरभूपालसाह इत्यथ स्तस्य नन्दनः पुत्रः क्षितौ पृथिव्यां नारायणसन्निभो नारायणतुल्य आसाऽऽसीत् । स यच्छब्दनिर्दिष्टः पृथ्विनारायणसाहदेवक स्तदाख्योनृपः । संज्ञायां विकेल्पेन ह्रस्वः । एककःसन्नेक एवैककः । अद्वितीयो वीरः सन्नित्यर्थः । अखण्डं समग्रं नेपालं शशास ।

अवाप्य गोरक्षपते र्वरं वरं
विजित्य भूरीन् नृपतीन् रणाग्रणीः ।
विधाय राष्ट्रं कलहेन वञ्चितं
विशालनेपालमहो शशास सः ॥४५॥

अवाप्येति । रणाग्रणी युद्धाग्रगामी स पृथ्वीनारायणसाह गोरक्षपते र्गोरक्षनाथात् (भाषायां गोरखनाथ) वरं श्रेष्ठं वरं वृतिं 'वरो वृता' वित्यमरः । अवाप्य प्राप्य । पृथ्वीनारायणसाहाय तदिष्टदेवो गोरक्षनाथ 'स्तवपाद स्पर्शिता भूं स्त्वदधीना भवे' दितिवरं ददाविति जनश्रुतिः । अव एव भूरीन् बहून् नृपतीन् राज्ञो विजित्य पराजित्य राष्ट्रं राज्य नेपालराज्यमित्यर्थः । कलहेन विग्रहेण वञ्चितं शून्यं विधाय सकलान् भूपान् विजित्य तान् वशांचानीयेत्यर्थः । विशालनेपालं शशास । अहो ! ।

प्रतीच्यधीशोपनिवेशवादता—
प्रवेशमारोद्धुमनार्यवैरिणा ॥
असंहतान् ग्रामनृपान् विनाश्य यद्
व्यधायि राष्ट्रं बलशालि तन्महत् ॥४६॥

प्रतीच्येति । अनार्यं वैरिणा नाऽऽर्या अनार्या म्लेच्छादय स्तेषां वैरीशत्रुस्तेन तथाक्तेन । पृथ्वीनारायणेनेतिबोद्धव्यम् । प्रतीच्यधीशोपनिवेशवादताप्रवेशं प्रतीच्यां पश्चिमायां दिशि यूरोपादिदेश इत्यर्थः, येऽधीशाः शासका स्तेषां योपनिवेश वादता साम्राज्यनीतित्वं तस्याः प्रवेश स्तं तथोक्तम । आरोद्धुं निवारयितुम् । असंहतान् परस्पर मेलरहितान् ग्रामनृपान् विनाश्य यत् राष्ट्रं नेपाल राष्ट्रं बलशाली सबलमेकीकरणत्वात, व्यधायि कृतम्। तत् कार्यं महत वृहदासीदितिशेषः ।

न कैरकारि श्रुतिकन्दरोदरे
सुवापिका यस्य कथामृतामृतैः ॥
शशाङ्कशोभां यशसाऽवधीरय-
न्नभूत् स नेपाल वसुन्धराप्रियः ॥४७॥

न कैरिति। यस्य पृथ्वीनारायणसाहस्य कथामृतैः कथा अमृतानी व कथामृतानिः तान्येवाऽमृतानितैस्तथोक्तैः। 'पीयूष ममृतं सुधा' 'पयः कीलाल ममृतंजीवनं भुवनं वन' मित्युभमत्राप्यमरः । कैः पुरुषैः। श्रुतिकन्दरोदरे श्रुतिरेव यः कन्दरोदरी तस्योदर मन्तर्भाग स्तस्मिन तथो क्ते । सुवापिका सुन्दरतडागो नाऽकारि

सर्वैरकार्येव । यस्य कथाः सर्वैः श्रुता एवेत्यर्थः । यशसा कीर्त्या शशाङ्कःशोभां चन्द्रद्युति मवधीरयन् तिरस्कुर्वन् स नेपाल वसुन्धराप्रियो नेपालभूवल्लभोऽभूत् ।

विधेर्जराक्तं वदनं सकिल्बिषं
निरीक्ष्य यूनोऽस्य तु चारु पावनम् ।
सरस्वती कल्मषमोचनाय वा
व्रते गते सुन्दरमेव शिश्रिये ॥४८।

विधेरिति । सरस्वती शारदादेवी विधेर्ब्रह्मणः सकिल्विषं सकल्मषं तनयां सरस्वतीं ' प्रति कामासक्तत्वात् । ' वाचं दुहितरं तन्वीं स्वयंभू हरतीं मनः । अकाम्या चकमे क्षत्ताः सकाम इति नः श्रुत ' मिति भागवतवचनात् । ' पापं किल्बिष कल्मष ' मित्यमरः । जराक्तं विस्रसान्वित मसुन्दर मित्यर्थः । वदनं मुखं निरीक्ष्याऽवलोक्य । अस्य यून स्तरुणस्य तु चारु सुन्दरं पावनं पवित्रं वदनं निरीक्ष्य पूर्वेणान्वयः । कल्मषमोचनाय कल्मषस्य पितृकृत सम्भोग सम्भावित किल्बिषस्यमो चनाय क्षयाय । अस्य राज्ञः पावन वदनत्वत । पुण्यवतां सहवासात् पापानां पापानि नश्यन्त इति शास्त्रवचनम् । वाऽथवा व्रतेकौमार्ये वतेगते नष्टे सति । भावे सप्तमी । सुन्दरं रमणीयमेव वदनं शिश्रिय आश्रितवती पितृकृतसम्भोग

सम्भावित कल्मष क्षयोयोत कौमार्ये व्रते नष्टे सति सुन्दरस्थानस्यैवाऽऽश्रयाय धातृतनया सरस्वती सकल्मषं जराक्तं विधेर्वदनं विहाय तरुणस्याऽस्य राज्ञः पावनं चारु च मुखमाश्रितवतीतिभावः। अस्य राज्ञो वदने स्वयमेव सरस्वत्युवासेति सङ्क्षिप्तोऽर्थः।

स दीर्घबाहुः कठिने निजोरसि
कथं दधौ कोमलभावमुत्तमम्।
किमत्र चित्रं भुवि दृश्यतेऽथवा
पदार्थकोऽक्षोटफलोदरे भवः ॥४९॥

स इति। दीर्घबाहु र्दीर्घावायतौ बाहू भुजौ यस्यसः। स पृथ्वीनारायणसाहः कठिने दृढे निजोरसिस्ववक्षसि स्वहृदय इत्यर्थः। उत्तमं श्रेष्ठं कोमलभावं मृदलाशयं दयादाक्षिण्यादियुक्तं भावमित्यर्थः। कथं दधौ। कठिनवस्तुनः कोमलभावग्रहणाऽसम्भवत्वादाश्चर्यम। अथवाऽत्राऽस्मिन विषये। किंचित्रं किमाश्चर्यम्। आश्चर्यं नास्तीत्यर्थः। भुवि पृथिव्या मक्षोटफलोदरे कन्दरालफलान्तरे 'अक्षोटः कन्दरालौ द्वा' वित्यमरः। भवः स्थितः पदार्थको वस्तु स्निधमृदुल वस्त्वित्यर्थः। दृश्यते। कठिनेऽप्यक्षोट फले तत्रत्यं वस्तु कोमलं स्निग्धं चेत्यर्थः। ...

स्वधर्मनिष्ठश्चतुरोऽपहेलया
परस्य धर्मं न कदा निनिन्द सः ।
अतः स्वदेशे जनवल्लभोऽभव—
दनुत्तमो ह्येष नयोऽवनीभुजाम् ॥५०॥

स्वधर्मेति। चतुरो निपुणोऽतएव स्वधर्मनिष्ठः स्वधर्मस्थः सोऽपहेलया घृणया परस्याऽन्यस्य धर्मं कदापि न निनिन्द न निन्दां चक्रे। अतः स्वदेशे जनवल्लभो जनानां वल्लभः प्रियोऽभवत्। हि यतोऽवनीभुजां भूभुजामेष नयः स्वधर्माचलन परधर्मानिन्दनरूपानीतिः । अनुत्तमो न विद्यत उत्तमो यस्मात् स तथोक्तोऽद्वितीय इत्यर्थः। अस्तीति शेषः।

समस्तवर्णेभ्य इदं मनोरमं
मदीयराज्यं खलु पुष्पवाटिका ।
न कोऽपि मर्त्यो लभतां तिरस्क्रिया—
मितीरयित्वा स जनानतोषयत् ॥५१॥

समस्तेति। इदं मनोरमं सुन्दरं मदीय राज्यं मत्सम्बन्धि राज्यं समस्तवर्णेभ्यः सकलजातिभ्यो ब्राह्मणक्षत्रियवैश्य शूद्रेभ्य इत्यर्थः। निर्मिता पुष्प वाटिका कुसुमोद्यानं खलु। यथा

कुसुमोद्यानप्रवेशान्न कश्चिदपि वर्णो निषिध्यते, तथा मामकीने राज्ये सर्वे वर्णा स्तुल्याधिकारा एवेत्यर्थः। कोऽपि कश्चिदपि मर्त्यो मनुष्यो 'मनुष्या मानुषा मर्त्या मनुजा मानवा नरा" इत्यमरः। तिरस्क्रियां हेलां न लभताम्। इतीरयित्व। कथयित्वा स जनान्। अतोषयत् तोषयामास। एतेनाऽस्य राज्ञः प्रजातन्त्रेऽभिरुचिरासीदिति बुध्यते।

विदेशिविक्रेतृजने स्वराज्यके
समागते, दीनदशा स्वदेशिभिः।
अवाप्यते नून मितीरयन् सुधी-
र्निषेधयामास स तादृशान् जनान्॥५२॥

विदेशीति। विदेशिविक्रेतृजने विदेशी परदेशी चासौ विक्रेतृजनो वणिग्जनस्तस्मिन्। जातावेक वचनम् स्वराज्यके निजराज्ये नेपाल इत्यर्थः। समागते प्रविष्टे सति स्वदेशिभिःस्वजनपद वासिभि र्नेपालवासिभिरित्यर्थः। जनै र्दीनदशा दीनस्येवाऽकिञ्चनस्येव दशाऽवस्था नूनं ध्रुवमवाप्यते प्राप्यत इतीरयन् कथयन् स सुधी विद्वान्। तादृशान् तथाभूतान् जनान् मनुष्यान् विदेशिविक्रेतृ जनानित्यर्थः। निषेधयामास वारयामास।

बभूव नेपालधरातले तदा
समृद्धिरुत्पाद्यसमस्तवस्तुनः ।
बणिग्जना भारतचीनदेशयो:
स्ववस्तु विक्रेतुमयुर्विशालयोः ॥५३॥

बभूवेति । तदा तस्मिन् समये नेपाल धरातले नेपालभूम्या मुत्पाद्य समस्त वस्तुन उत्पादनीयाखिलपदार्थस्य । जातावेकवचनम् । समृद्धिः प्राचुर्यं बभूव । वणिग्जना व्यापारिवर्गा विशालयोर्भारतचीनदेशयो भारतश्च चीनदेशश्च भारतचीन देशौ तदाख्यराष्ट्रे तयो स्तथोक्तयोः । स्ववस्तु निजपदार्थं विक्रेतु मयुर्जग्मुः ।

मृगेन्द्रसत्त्वोरुरगम्यमानसो
युवा मनस्वी मितवाग्गुणार्णवः ।
स्वतन्त्रनेपालभुवीह दीप्तिमा-
नभूत् स राजा समयोचितः खलु ॥५४॥

मृगेन्द्रेति । मृगेन्द्रसत्त्वोरु मृगेन्द्रस्य सिंहस्येव सत्त्वं वीर्यं तदूरौ सक्थिनि यस्य सः । "सिंहो मृगेन्द्रः पञ्चास्यो

हर्यक्षः केशरी हरिः” ‘द्रव्यासु व्यवसायेषु सत्त्व मस्त्री तु जन्तुषु’ ‘सक्थि क्लीवे पुमानूरु’ रिति सर्वत्रामरः। अगम्य मानसो ऽगम्यं बुद्ध्याऽवेद्यं मानसं मनोयस्य सः। युवा तरुणः। मनस्वी प्रशस्तं मनो यस्य सः। ‘अस्मायामेधा स्रजो विनि’ रिति विनि प्रत्ययः। मितवाक् मितो परिभिता वाक् वाणी यस्य स मितभाषीत्यथः। गुणार्णवो गुणानां दयादाक्षिण्यादिगुणाना मर्णवः सागर स्तथोक्तः। इह स्वतन्त्रनेपालभुवि स्वतन्त्रा या नेपालस्य भूः पृथ्वी तस्याम्। दीप्तिमान् प्रतापवान् स राजा समयोचितः कालानुकूलः। अभूत् खलु।

समापितं तेन रणेषु जीवितं
तथापि शिष्टेर्विदधे स्थितिर्नवा।
तदीयकृत्यैरधुनाऽपि भूतले
बिभर्ति नेपालमही स्वतन्त्रताम् ॥५५॥

समापितमिति। तेन पूर्वोक्तवीरेण रणेषु युद्धेषु जीवितं जीवनं समापितम्। तस्य जीवनं रणेनैव व्यतीतमित्यर्थः। शासनसम्बन्धिविषये दृष्टिं पातयितुं तस्याऽधिकसमयो नासीदिति बोद्धव्यम्। तथापि समयाभावेऽपि शिष्टेः शासनस्य ‘अववादस्तु निर्देशो निदेशः शासनं च सः। शिष्टिश्चाज्ञे

त्यमरः। स्थिति र्मर्यादा नवा नूतना विदधे विहिता। अधुनेदानी मपि नेपाल मही नेपाल वसुन्धरा तदीयकृत्यैः पृथ्वीनारायणसाह सम्बन्धिकार्यै भूतले पृथ्वीतले स्वतन्त्रता मपारतन्त्र्यं विभर्ति धत्ते।

अनेन दासत्वविमुक्तये नृणां
व्यधायि या बन्धुरयोजना नवा।
न पूरिता सा यदसौ पतिः क्षिते—
रकालमृत्योः करपिञ्जरं गतः ॥५६॥

अनेनेति। अनेन नृपेण नृणां दासत्वविमुक्तये दासत्वस्य सेवकत्वस्य या विमुक्ति र्विमोचनं तस्मै (भाषायां कमरा अमलेख)। या नवानूतना बन्धुरयोजना सुन्दरयोजना व्यधायि विहिता। सा योजना पूरिता न। यत्। असौ क्षितेः पृथिव्याः पतिः। अकालमृत्योरसामयिकमरणस्य करपिञ्जरं बाहुपिञ्जरं गतः। अकाले मृत इत्यर्थः।

विदेशिसङ्घर्ष परायणैर्न सा
कृता तदीयान्वयजैश्च भूमिपैः।
अमात्य 'देवे'न पुनः प्रवर्तिता
परन्तु 'चन्द्रे'ण बभूव पूरिता ॥५७॥

विदेशीति । स। योजना। विदेशि सङ्घर्ष परायणै र्विदेशिभिः सह यः सङ्घर्षः युद्धादि कर्म तस्मिन परायणास्तैः । तदीयान्वयजैस्तद्वंशोत्पन्नै र्भूमिपै र्नृपैश्च न कृता । विदेशिसङ्घर्षवशात्तदुत्तराधिकारिभिः कर्तुमपारितेत्यर्थः । अमात्यदेवेन देव शमशेराख्यमन्त्रिणा पुनः प्रवर्तिता उत्थापिता । परन्तु चन्द्रेण चन्द्रशमशेराख्यामात्येन । पूरिता बभूव ।

अथाऽऽसर्गान्तं साहवंशोद्भूतानां नृपाणां संक्षिप्तेतिहासं वक्ति-

प्रतापसिंहस्तदुरस्यको भुवं
शशास तस्मिन्नृपतौ दिवङ्गते ।
स तन्त्रविद्याकुशलो महीपति—
र्मुमोच हा ! यौवन एव भूतलम् ॥५८॥

प्रतापसिंह इति । तस्मिन्नृपतौ राजनि दिवङ्गते मृते सति प्रतापसिंहः प्रतापसिंहाभिधान स्तदुरस्यक उरस्य एवोरस्यक स्तस्योरस्यक स्तदुरस्यक स्तदौरसः 'स्वाजाते त्वौ रसोरस्यौ' वित्यमरः । भुवं शशास । तन्त्र विद्याकुशलस्तन्त्रशास्त्रनिपुणः स प्रतापसिंहो महीपतिः । यौवने तारुण्य एव भूतलं पृथ्वीतलं मुमोचाऽत्यजत् । यौवन एव मृत इत्यर्थः । हा शोकार्थे ।

---

१ [१० जनवरी १७७५ ई०]

अथात्मजः [१]श्रीरणवाहदूरक-
स्त्रिहायन स्तस्य बभूव भूपतिः ।
अतो गृहीत्वा नृपशिष्टियष्टिकां
तदाख्यया तज्जननी शशास गाम् ॥५९॥

अथ प्रतापसिंहमरणानन्तरम् । तस्य प्रतापसिंहस्य त्रिहायन स्त्रिवर्षीयः श्रीरणवाहदुरको रणबाहदूर (वहादुर) संज्ञ आत्मजः सूनु र्भूपति र्बभूव । अतोऽस्य वाल्यावस्थाया हेतोः । तज्जननी तन्माता राजेन्द्रलक्ष्मीरित्यर्थः । नृपशिष्टियष्टिकां राजशासन दण्डं गृहीत्वा । तदाख्यया तन्नाम्ना गां पृथ्वीं शशास 'स्वर्गेषु पशु' वाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्या स्त्रियां पुंसि गौ' रित्यमरः ।

स्वदेशभक्त्याऽविपरीतचेतसं
'बहादुरा'ख्यं निजदेवरं वरम् ।
विशङ्क्य सा प्रत्यपकारिणं यथा
न्यवेशयत्तं ननु बन्धसद्मनि ॥६०॥

स्वदेशेति । सा राजेन्द्रलक्ष्मीः । स्वदेशभक्त्या नेपाला-

---

१ [१७७७ ई०]

नुरागेणाऽविपरीत चेतस मप्रतिकूलमानसं वरं श्रेष्ठं वहादुराख्यं वहादुराभिधानं निजदेवर मात्मभर्तृभ्रातरं 'देवृदेवरा' वित्यमरः। प्रत्यपकारिणं यथा प्रतिकूल गामिन मिव विशङ्क्याऽऽशङ्क्य। आत्मानं प्रति भर्तृकृतदुर्व्यवहारं नूनं स स्मरिष्यति तथा भ्रातृसूनु रणबहादुरं (वाहदूर वा) प्रत्यपि तथैव व्यवहरिष्यतीति विशङ्क्यत्यर्थः। पुरा बहादुरः प्रतापसिंहेन तद्भ्रात्रा नुवाकोटाख्ये प्रदेशे कारागृहे स्थापित आसीदितीतिहासोक्तिः। तं वाहदूरं बन्धसद्मनि कारागारे न्यवेशयत् स्थापितवती। ननु निश्चयार्थे।

ततो विमुक्तेन कथञ्चनाऽमुना
न्यधायि कारागृह एव साऽप्यहो।
शिशो नृपीयाधिकृतावलुब्धधी--
बभार भूभारमसौ तदाख्यया ॥६१॥

तत इति। ततःकारागारात् कथञ्चन केनाऽपि प्रकारेण विमुक्तेनाऽमुना वहादुरेण साऽपि भ्रातृजायाऽपि कारागृहे बन्धसद्मन्येव न्यधायि अहो इत्याश्चर्यम्। शिशो बालस्य रणबहादुरस्येत्यर्थः। नृपीयाधिकृतौ नृपाय हिता नृपीयैतादृशी-याऽधिकृतिरधिकार स्तस्यां तथोक्तायाम्। 'तस्मै हित' मिति छप्रत्ययः। अलुब्धधीरनासक्तमतिरसौ बहादुर स्तदाख्यया

रणवहादुर नाम्ना भूभारं बभार राज्यशासनमकरोत्। अनेन कर्मणाऽपि बहादुर उदारचेता आसीदित्यवगम्यते।

परन्तु रुष्टेषु सुधीवरेष्वसौ
विहाय राज्यं वत 'बेतियाँ' ययौ।
प्रतापकान्ता पुनरुत्थिता सती
प्रतीपभूपान् विजिगाय सत्वरम् ॥६२॥

परन्त्विति। परन्तु सुधीवरेषु विद्वत्सु प्रासादस्थितेषु विद्वत्स्विति बोद्धव्यम्। रुष्टेषु क्रुद्धेषु राजमातरं प्रति कृतेन व्यवहारेण क्रुद्धेष्वित्यर्थः। असौ बहादुरो राज्यं विहाय त्यक्त्वा 'बेतियाँ' बेतियाख्यं स्थलं ययौ जगाम। बतेति खेदे। प्रतापकान्ता प्रतापसिंहमहिषी राजेन्द्रलक्ष्मीरित्यर्थः। पुनर्भूय उत्थिता कारागृहोन्मुक्ता सती प्रतीपभूपान् प्रतिकूलभूपतीन् सत्वरं यथातथा विजिगाय विशेषेण जिगाय।

दिवङ्गतायामथ राजमातरि
बहादुरो वीरवरः सुधीवरः।
उपत्यकायां हि निवृत्य सुन्दरं
शशास धीरो जनवल्लभो भुवम् ॥६३॥

दिवङ्गताया मिति । अथ शत्रुविजयानन्तरम् । राजमातरि राज्ञो रणवाहदूरस्य माता तस्याम् । दिवङ्गतायां मृतायां सत्यां सुधीवरः सुधियां विदुषां वरः श्रेष्ठः । वीरवरो वीरश्रेष्ठो धीरो धैर्यवान् । जनवल्लभः प्रजाप्रियो बहादुर उपत्यकायां निवृत्य भुवं पृथ्वीं सुन्दरं यथातथा शशास हि ।

स्वराष्ट्रसीमां च वितन्वताऽमुना
व्यधायि राज्यं त्रिगुणं पितुः पृथु ।
पराजिते आङ्गलचीनसैन्यके
समेधितं चोत्तमदेशगौरवम् ॥६४॥

स्वराष्ट्रेति । स्वराष्ट्रसीमां स्वराज्यसीमानं च वितन्वता विस्तारयताऽमुना बहादुरेण पितुः पृथ्वीनारायणसाहस्य राज्यं त्रिगुणं यथातथा पृथु विशालं व्यधाय्यकारि । आङ्गल चीन सैन्यके आङ्गलश्च तदाख्यजातिविशेषो गौराङ्गम्लेच्छ इत्यर्थः, चीन सैन्यकं च पीताङ्गजातिविशेषबलंचाङ्गलचीन सैन्यके ते तथोक्ते । प्रगृह्यसंज्ञात्वेन न सन्धिः । पराजिते विजिते । हि । उत्तम देश गौरव मुत्तमः श्रेष्ठ श्चासौ देशो जनपद स्तस्य गौरव मुत्कर्षः समेधितं बर्द्धितं च ।

स जातु यूनेऽग्रजसूनवे ददौ
स्थितं महीशासनभारमात्मनि ।
विचारयामास यतो मतिर्भवे-
च्छुचिस्तदीयाऽखिलशक्तिलब्धितः ॥६५॥

स इति। स बहादुरो जातु कदाचित्। यूने तरुणायाऽग्रजसूनवे ज्येष्ठभ्रातृपुत्राय प्रतापसिंहात्मजायेत्यर्थो रणबहादुरायेतियावत्। आत्मनि स्वस्मिन् बहादुर इत्यर्थः। स्थितं महीशासनभारं महीशासनं पृथ्वीपालनमेव भार स्तं तथोक्तम्। ददौ दत्तवान्। यतो यस्मात् कारणत् तदीया तत्सम्बन्धिनी मतिर्बुद्धि रखिल शक्तिलब्धितोऽखिला समग्रा या शक्तिः सामर्थ्यं तस्या लब्धिः प्राप्तिस्ततः। सम्पूर्णराज्यशासनाधिकारप्राप्तेरित्यर्थः। शुचिः पवित्रा भवेदिति विचारयामास।

परन्तु तेनैव ततो 'बहादुरो'
न्यधायि काराभवने विनाऽऽगसा।
स तत्र नेपालवसुन्धरोरसि
विहाय देहं पितृसन्निधिं ययौ ॥६६।

परन्त्विति। परन्तु ततः शक्त्यवाप्त्यनन्तरम्। तेन

रणवहादुरणैव बहादुर स्तत्पितृभ्यो विनाऽगसाऽपराधेन विना। विनायोगे तृतीया। काराभवने कारागारे न्यधायि निहितः। स बहादुर स्तत्र काराभवने नेपालवसुन्धरोरसि नेपालस्य या वसुन्धरा भूमिस्तस्या उरो वक्षस्तस्मिन्। देहं शरीरं विहाय त्यक्त्वा पितृसन्निधिं पृथ्वीनारायणसमीपं ययौजगाम। कारागार एव मृतवानित्यर्थः। पितृसन्निधिगमनकारणं तु पितृ तुल्यपराक्रमत्वेन।

अवाप 'गीर्वाण' इतीरितस्ततः
सुतः कनीयान् युवराजतां पितुः।
प्रतापसूनो हृदयं जिगाय या
स आस तस्यास्तनुजः प्रियो यतः ॥६७॥

अवापेति। ततो गीर्वाणइतीरितो गीर्वाणवीरविक्रमाख्यः कनीयान् कनिष्ठः सुतः पितू रणवहारात युवराजतां युवराजस्यभावो युवराजता तथोक्तां मुत्तराधिकारित्व मवाप लेभे। यतो यस्मात्कारणात्। स गीर्वाणवीरविक्रमः। या स्त्री प्रतापसूनो रणवाहदुरस्य हृदयं जिगाय तस्याः स्त्रियः कान्तिमत्या इत्यर्थः प्रिय स्तनुज आत्मज आसाऽऽसीत्।

प्रधानमन्त्रित्वपदोपलब्धये
प्रताड्य संघर्षरतान् बहूञ्जनान् ।
स भीमसेनाय मनीषिणे सुधीः
पदं प्रधानं समदाद्धितैषिणे ॥६८॥

प्रधानेति । सुधीर्विद्वान् स रणवहादुरः प्रधानमन्त्रित्व पदोपलब्धये प्रधानमन्त्रित्वं मुख्यामात्यत्व मेव यत्पदं स्थानं तस्यो पलब्धिः प्राप्ति स्तस्यै । सङ्घर्षरतान् कलह परायणान बहून् जनान् प्रताड्य प्रताडनं कृत्वा हितैषिणे विदुषे भीमसेनाय तदाख्याय जनाय स्वहितपरायणाय प्रधानामात्यकार्यक्षमाय चेत्यर्थः । प्रधानं पदंमुख्यामात्यपदं समदात् ददौ ।

स वल्लभाया निधनेन खिन्नधीः
सुरादरं नैव चकार पूर्ववत् ।
स्वदेशभक्त्या तु तदीयमानसं
सदा बभूवाऽऽकुलमुच्चभावया ॥६९॥

स इति । स रणवहादुरः । वल्लभायाः प्रेयस्याः कान्ति मत्या इत्यर्थः । निधनेन मरणेन खिन्नधीर्विषण्णधीः सन् पूर्ववत् प्रागिव वल्लभाया जीवितावस्थायामिवेतितात्पर्यम्

सुरादरं देवसम्मानं नैव चकार। तु किन्तूच्चभावयोन्नताशयया स्वदेश भक्त्या निज देशानुरागेण तदीयमानसं रणबहादुर चित्तं सदा सर्वदाऽऽकुलं बभूव।

विलोक्य कोषं च धनेन वर्जितं
स देशमाशङ्क्य च सङ्कटे स्थितम्।
स्वभूप्रगुप्त्यै धनसञ्चयोन्मना
जहार दत्तामपि विप्रमेदिनीम् ॥७०॥

विलोक्येति। स कोषं च राजकोषं च धनेन वर्जितं धन शून्यं रणभारव्ययत्वात्, विलोक्य दृष्ट्वा देशं सङ्कटे विपदि स्थितं चाऽऽशङ्क्य विचार्य स्वभूप्रगुप्त्यै स्वदेशरक्षायै धन सञ्चयोन्मना धनसञ्चयायार्थसञ्चयार्थ मुन्मना उत्कण्ठितः सन् दत्तां स्वदत्तां परदत्तां वा (बीर्ता इतिभाषायाम्) विप्र-मेदिनीं ब्राह्मण भूमिं जहार। स्वदेश हितायपापमपि नागण-यदिति भावः।

अनार्यशत्रो र्बलिनो मनीषिणः
स्वदेशभक्तस्य तपस्विनोऽवनौ
प्रतीच्यधीशोपनिवेशनादृता-
विरोधिनस्तस्यकृतिर्महाकृतिः ॥७१॥

अनार्येति। अनार्यशत्रो र्नाऽऽर्या अनार्यास्तेषां शत्रुस्तस्याऽनार्यशत्रो र्म्लेच्छादिरिपोः। बलिनः शक्तिमतः। मनीषिणो बुद्धिमतः स्वदेश भक्त स्याऽऽत्मजनपदानुरागिण स्तपस्विन स्तापसवेषस्य (स्वामी महाराज इति कथ्यते भाषायाम्) प्रतीच्यधीशोपनिवेशवादताविरोधिनः प्रतीच्यां पश्चिमायां दिशि यूरोपादिदेशेष्वित्यर्थो भवा येऽधीशाः शासका स्तेषां योपनिवेदशवादता साम्राज्यनीतित्वं तस्या विरोधी वैरी तस्य तथोक्तस्य। तस्य रणबहादुरस्य कृतिः कार्यम्। अवनौ पृथिव्यां महाकृति र्बृहत् कार्य मासीदितिशेषः।

अहो तदाज्ञामवधीरयन्नरः
ससाहसः शेरबहादुराभिधः।
असिं तदीये जठरे हि संसदि
प्रहारयामास च तेजितं भृशम् ॥७२॥

अहो इति। तदाज्ञां रणबहादुरादेशमवधीरयन् तिरस्कुर्वन्। युद्धाय राज्ञा नियुक्तेन शेरबहादुराभिधेन जनेन राजाज्ञा नामानीतीतिहासोक्तिः। शेरबहादुराभिधः शेरबहादुरोभिधा नाम यस्य स तथोक्तः। ससाहसः सोत्साहो नरः। संसदि

१ (१८०५ ई०)

सभायाम्। तदीये रणबहादुरसम्बन्धिनि जठर उदरे भृश मत्यर्थं यथा तथा तेजितं तीक्ष्णीकृत मसिं खड्गं प्रहारयामास। अहो इत्याश्चर्यम् ।

तमुद्धतं कश्चिदपेतभीर्बली
जघान खड्गेन नृपाङ्गरक्षकः ॥
दशोन्मदानां भवतीदृशीति किं
सभाऽपि सा सूचयतिस्म शोणिता ॥७३॥

तमिति ॥ अपेतभी र्निभीको बली बलवान् कश्चित् कोऽपि नृपाङ्गरक्षको नृपस्य भूपस्य रणबहादुरस्येत्यर्थः, अङ्गरक्षकः पारिपार्श्वकः। केचित्तु सोऽङ्गरक्षको बालनरसिंह आसीदिति वदन्ति, तेऽसत्याः। उद्धतं मानिनं तं शेरबहादुरं खड्गेन करवालेन जघान। शोणिता शोणं रक्तं सञ्जात मस्या इति शोणिता। "तदस्य सञ्जात इतच्" इतीतच्। सा पूर्वोक्ता सभा संसदपि। उन्मदाना मुन्मत्तानां दशाऽवस्थे दृशीत्थं मरणरूपेत्यर्थः। भवतीति किं सूचयति स्माऽसूचयदिति कवेस्तर्कः। उत्प्रेक्षालङ्कारोऽत्र

य आबबाधेऽ'मर' 'भक्ति' 'भद्र' तो
मुहुः समृद्धाङ्गलवाहिनीर्मृधे ।
स 'भीमसेने'न पुरा निरीक्षितो
बभूव '[१]गीर्वाण' इहाऽधिभूर्भुवः ॥७४॥

य इति । योऽमरभक्तिभद्रतोऽमरश्चाऽमरसिंहाख्यो वीरश्च भक्तिश्च तदाख्यो वीरश्च भद्रश्च बलभद्राख्यो वीरश्च तेभ्योऽमरभक्तिभद्रेभ्यस्तत स्तथोक्तः । हेत्वर्थे पञ्चम्या स्तसिल् ।' नामैकदेशो नामग्रहण' मितिन्यायान्नामैकदेशग्रहणम् । समृद्धाङ्गलवाहिनीः समृद्धा या आङ्गलवाहिन्य आङ्गलसेना स्ता स्त थोक्ताः । 'ध्वजिनी वाहिनी सेने'त्यमरः । मुहुर्वारम्वार माबबाध उदपीडयत् । भीमसेनेन तदाख्येन मन्त्रिणा पुरो बाल्यकाले निरीक्षितः संरक्षितः स यच्छब्दनिर्दिष्टो गीर्वाण स्तदाख्यो रणबहादुरसूनुरिह नेपाले भुवः पृथिव्या अधिभूर्नायकः स्वामीत्यर्थः । 'अधिभूर्नायको नेते'त्यमरः । बभूव ।

तदात्मजो वीरवराङ्गनस्ततो
बभूव[२] 'राजेन्द्र' इतीरितो नृपः ।
अनेकदेशैः सह कूटनीतितां
विधाय धीमान् प्रशशास यः क्षितिम् ॥७५॥

---

१ (१८०५ ई०) २ (८ दिसम्बर १८१६ ई०)

तदिति । ततो गीर्वाणानन्तरम् । 'राजेन्द्र' इतीरितो 'राजेन्द्र' इति कथितः । नामैकदेशे नामग्रहणात् राजेन्द्रवीर विक्रमाभिधान इत्यर्थः । वीरवराङ्गनो वीरेषु वरा श्रेष्ठा वीरवरैताहृश्यङ्गना स्त्री यस्य स तथोक्तः । तदात्मजो गीर्वाणसूनुर्नृपो बभूव । धीमाननेकदेशैः सह विभिन्नजनपदैः साकम्। कूटनीतितां राजनीतित्वं विधाय कृत्वा क्षितिंमहीं प्रशशास प्रकर्षेण शिष्टवान् ।

परन्तु सौधे सचिवत्वलब्धये
जनेषु पारस्परविग्रहोऽभवत् ।
अथाङ्गलानां प्रविरोधिनोऽपि नो
युधे दधुः साहसमस्य सैनिकाः ॥७६॥

परन्त्विवति । परन्तु सौधे प्रासादे जनेषु पुरुषेषु राजपुरुषेष्विति निर्गोद्धव्यम् । सचिवत्वलब्धये मन्त्रित्वप्राप्तये पारस्परविग्रहोऽन्योन्य कलहोऽभूत् । अथानन्तरम् ।आङ्गलाना माङ्गलजातीनां प्रविरोधिनोऽत्यन्तविपक्षिणोऽप्यस्य राजेन्द्रस्य सैनिका भटाः। युधे रणाया ऽऽङ्गलैः सह योद्धुमित्यर्थः । साहसं नो दधुः ।

शनैरजेया रिपवोऽभवन् ततः
सुतः स्वकीयोऽपि वशं न हाऽऽययौ ।
स 'राजलक्ष्म्या' निजजायया कृता-
मनौचितीं रोद्धुमहो शशाक नो ॥७७॥

शनैरिति। तत स्तस्माद्धेतोः। रिपवः शत्रवः शनैः क्रमशो ऽजेया जेतु मशक्याः। अभवन्। स्वकीय आत्मीयः सुतःपुत्रः सुरेन्द्र वीरविक्रम इत्यर्थः। वशमाधीन्यं नाऽऽययावाजगाम। न वशीभूता इत्यर्थः। निजजाययाऽऽत्मभार्यया राजलक्ष्म्या तदाख्यया महिष्या कृतां विहितां मनौचितीं मनौचित्यं रोद्धुं निषेधयितुं नो शशाक। अहो इत्याश्चर्यम्। पुरा राजलक्ष्मी स्वसुताय रणेन्द्रविक्रमाय राज्यं दातु मनेककुष्कर्माणि चकारेति विहासज्ञाः।

> वधेन वामाहितकस्य दुर्मते–
> रजायतैका स्थिति राशु या ततः।
> न स स्वपत्नीप्रगृहीतशासनः
> शशाक तां रोद्धुमलं कथञ्चन ॥७८॥

वधेनेति। तत स्तदनन्तरम्। दुर्मते र्दुर्बुद्धे र्वामाहितकस्य राजेन्द्रलक्ष्मीहितचिन्तकस्य गगनसिंहाभिधानस्य जनस्येत्यर्थः। वधेन व्यापादनेन। हेतौ तृतीया। आशु शीघ्रं यथा तथा यैका स्थिति रवस्थाऽजायत। स्वपत्नीप्रगृहीतशासनः स्वपत्न्या राजलक्ष्म्या प्रगृहीतशासनः प्रकर्षेण गृहीतं शासनं यस्य स तथोक्तः। स राजेन्द्रस्तां स्थिति मलं पर्याप्तं यथातथा कथञ्चन केनापि प्रकारेण रोद्धुं न शशाक

१ (१४ सितम्बर १८४६ ई०)

छलेन भूरीन्नरपुङ्गवानथो
जघान हा ! जङ्गबहादुरश्छली ।
ददावमुष्मै निजकार्यकाङ्क्षिणी
प्रधानमामात्यपदं मुदैव सा ॥७९॥

छलेनेति । अथो गगनसिंहवधानन्तरम् । छली जङ्गबहादुर स्तदाख्यः कश्चित् पुरुषः । छलेन छद्मना भूरीन् बहून् नरपुङ्गवान् मनुष्य श्रेष्ठान् । जघान व्यापादयामास । हेति खेदे । निजकार्य काङ्क्षिणी निजकार्यं सुरेन्द्रवीर विक्रमं हत्वा रणेन्द्रविक्रमाय स्वतनयाय राज्याधिकारदानरूपं कार्यं काङ्क्षते वाञ्छते तच्छीला तथोक्ता । ताच्छिल्ये णिनिः । सा राजेन्द्र पत्नी गृहीतराज्य शासनाधिकारेतीतिहासाज्ज्ञेया । अमुष्मै जङ्गबहादुराय । सम्प्रदाने चतुर्थी । प्रधानं मुख्य मामात्य पद ममात्यस्येद मामात्यं चतत्पद मामात्यपदं मन्त्रिपदं प्रधानमन्त्रिपदमित्यर्थः । मुदा हर्षेणैव ददौ ।

परन्तु तस्यास्तनयं निवेश्य नो
स तत्सपत्न्यास्तनुजं नृपासने ।
निवेशयामास ततो हि वञ्चको
जनाधिपत्यं च समाददे स्वयम् ॥८०॥

परन्त्विति। परन्तु किन्तु वञ्चको धूर्तः स जङ्गबहादुरस्तस्या राजेन्द्रलक्ष्म्यास्तनयं पुत्रं रणेन्द्रविक्रममित्यर्थः। नृपासने सिंहासने नो निवेश्य तत्सपत्न्यास्तस्या या सपत्नी तुल्यभर्तृका साम्राज्यलक्ष्मीदेवीत्यर्थः, तस्यास्तथोक्तायाः। तनुजं पुत्रं सुरेन्द्रवीरविक्रममित्यर्थः। नृपासने निवेशयामास संस्थापयामास। ततः सिंहासनारोपणानन्तरम्। स जङ्गबहादुरः पूर्णान्वयः। स्वयमात्मनैव। जनाधिपत्य मधिपतेर्भाव आधिपत्यं जनानामाधिपत्यं जनाधिपत्यं तत तथोक्तम् प्रजास्वामित्वं समाददे गृहीतवांश्च।

प्रजाधिपत्यग्रहणाय या क्षतिः
कृता नृणां स्वार्थरतेन तेन सा।
न निन्दनीया न, तथापि शासनं
स्थिरं भुवोऽभूत्तदनन्तरं ध्रुवम् ॥८१॥

प्रजेति। स्वार्थरतेन स्वार्थपरायणेन तेन जङ्गबहादुरेण प्रजाधिपत्यग्रहणाय जनस्वाम्यादानाय या नृणां क्षतिर्मारणक्रिया कृता विहिता सा क्षति र्निन्दनीया, हेया नेति न, हेयैव। तथाऽपि हेयत्वेऽपि तदनन्तरं नृक्षतेरनरन्तरम्। भुवो धरायाः शासनंस्थिरं दृढ मभूत ध्रुवम्। भारते आङ्गलस्थिरता पर्यन्तं जङ्गबहादुरनिर्मितस्थितिरत्र स्थिरेति बोद्धव्यम्।

स्वराज्यसीमापरिवर्धनोत्सुका—
न्निरुध्य मैत्र्याऽऽङ्गलशासकानसौ ।
स्वतन्त्रतां यत् प्रजुगोप नीवृत-
स्तदत्र कृत्यं स्मरणोयमीर्यते ॥८२॥

स्वेति । स्वराज्यसीमापरिवर्धनोत्सुकान् स्वस्याऽऽत्मनो यद्राज्यं राष्ट्रं तस्य या सीमा तस्याः परिवर्धने विस्तारण उत्सुका उत्कास्तान् । आङ्गलशासकोनाङ्गलजातिशासकान मैत्र्या सौहार्देन निरुध्य निरोधनं कृत्वा नीवृतो देशस्य नेपालस्येत्यर्थः । स्वतन्त्रता मपारतन्त्र्यं यदसौ जङ्गबहादुरः प्रजुगोप संररक्ष । तत कृत्यं कर्म । अत्र नेपाले । स्मरणीयं स्मर्तुं योग्यमासीदितीर्यते कथ्यते ।

गताधिपत्यस्तु [i]सुरेन्द्रविक्रमो
बभूव राजा किल नामत स्ततः ।
तदग्रजोपार्जितया नृपश्रिया
शतं समानां सचिवान्वयः स्थितः ॥८३॥

गतेति । तु किन्तु गताधिपत्योऽपेतप्रभुत्त्वोऽधिकारवर्जित इत्यर्थः । सुरेन्द्र विक्रम स्ततो नामतोऽभिधानतो राजा बभूव ।

---

[i] (१२ मई १८४७ ई०)

असौ संज्ञयैव राजा बभूव कस्मिंश्चित् विषयेऽपि नास्याधिकार आसीदितिभावः । तदग्रजोपार्जितया तस्याग्रजः पूर्वजः पृथ्वीनारायणस्तेनोपार्जितयाऽऽसादितया नृपश्रिया राजलक्ष्म्या सचिवान्वयो मन्त्रिवंशः समानां शतमेकशताब्दीपर्यन्तं श्रित आश्रितः 'संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा' इत्यमरः। आजङ्गबहादुरान्मोहनशमशेरपर्यन्तं राज्यशासनाधिकारो मन्त्रिकुल आसीदितीति हासाज्ज्ञेयम्।

तस्मिन् भूते राजनि राजान्वयजाते
त्रैलोक्योऽभूत्तस्य तनूजो युवराजः।
स्वामैच्छद् गां कर्तुमथेहाऽपरतन्त्रां
प्राणानौज्झत् किन्तु युवा हा! सहसा सः ॥८४॥

तस्मिन्निति। राजान्वयजाते राज्ञो भूपस्याऽन्वयो वंशस्तस्मिन् जात उत्पन्न स्तस्मिन्। तस्मिन् सुरेन्द्रे राजनि भूपतौ भूते सति।। भावे सप्तमी। तस्य सुरेन्द्रस्य त्रैलोक्यस्त्रैलोक्याख्य स्तनूजः पुत्रो युवराजो राज्योत्तराधिकारी। अभूत्। अथाऽनन्तरम्। इह नेपाले स युवा तरुणः स्वामात्मीयां गां पृथ्वीमपरतन्त्रां स्वतन्त्रां सचिवहस्तमुक्तामित्यर्थः कर्तुमैच्छदियेष

१- १८७७ ई०)

किन्तु सहसाऽकस्मात प्राणा नसूनौज्झत तत्याज यौवन एव मृता
इत्यर्थः। विषेण मारित इतिकेचित्। हेतिखेदे। सर्गान्तत्वाद् वृ-
त्तभेदः। मत्तमयूरं वृत्तम्। 'वेदै रन्ध्रैम्तौ यसगा मत्तमयूरम्'
इतिलक्षणात्।

पौत्रः 'पृथ्वीवीर' उदाराखिलवृत्तः
[१]स्वर्याते तत्पीठ मवापाऽऽशु सुरेन्द्रे।
[२]सोऽपि त्यक्त्वा सूर्यसमानं शिशु मुर्व्यां
स्ववेंश्याभिर्देवनगर्यां विर 'राज' ॥८५॥

इतिश्रीभरतराजशास्त्रिकृतौ महेन्द्रोदये महाकाव्ये राजाङ्के राजवंशवर्णनक्रमेण प्रासङ्गिकवस्तुविषयनिर्देशनं नाम प्रथमः सर्गः ॥१॥

पौत्रइति। सुरेन्द्रे सुरेन्द्राख्येनृपे। स्वर्याते दिवङ्गते सति। भावेसप्तमी। 'स्वरव्ययं स्वर्गनाक त्रिदिव त्रिदशालया' इत्यमरः। उदाराखिलवृत्त उदाराणि सरलान्यखिलानि समस्तानि वृत्तानि चरित्राणि यस्य तथोक्तः। 'दक्षिणे सरलोदारा' वित्यमरः। पृथ्वीवीरः पृथ्वीवीरविक्रमाख्यः पौत्रः सुरेन्द्रपौत्र स्त्रैलोक्य वीर विक्रमस्य पुत्र इत्यर्थः। तत्पीठं सुरेद्रासन माशु शीघ्रं यथोतथा

१ (दिसम्बर १८८१ ई०) २ (११ दिसम्वर १६११ई०)

बाल्यकाल एवेत्यर्थः ; त्रैलोक्यस्य यौवनावस्थायामेव दिवङ्गतत्वात । ' पीठमासन ' मित्यमरः । अवाप प्राप्तवान् । राजाऽभूदित्यर्थः । स पृथ्वीवीरविक्रमोऽपि सूर्यसमानं रविप्रतिमं शिशुं बालकं त्रिभुवनवीरविक्रममित्यर्थः । उर्व्यां धरायां त्यक्त्वा परित्यज्य भूशासनायेतिबोद्धव्यम् । देवनगर्य्यां सुरपुरे स्वर्वेश्याभि र्दिव्यवाराङ्गनाभी रम्भामेनकादिभिरित्यर्थः । सहार्थे तृतीया । विरराज शुशुभे मृत इतिभावः । राजशब्द प्रयोगेण कवेः कविगुरोर्वा नामैकदेशग्रहणमिति बुध्यते ।

इतिशङ्करशास्त्रिणा विरचिते महेन्द्रोदय-
काव्यव्याख्याने कुञ्चिकाख्ये प्रथमः सर्गः ॥१॥

द्वितीयः सर्गः

अथ त्रिपूर्वो भुवनाभिधोऽर्भकः

प्रियंवदः केवलपञ्चहायनः ।

अमात्यवंशानुगताधिपत्यकं

~~निवर्तिषुः संस्थितवा[१]न्निवासवे ॥१॥~~

निवर्तयिष्यन् स्थितवान्निवासने ॥१॥

अथेति । अथ पृथ्वीवीरविक्रमस्वर्गारोहणानन्तरम् । त्रिपूर्वस्त्रिशब्द पूर्ववर्ती भुवनाभिधो भुवनोऽभिधा संज्ञा यस्य सः । त्रिभुवननामेत्यर्थः । त्रिभुवनवीरविक्रमसाहदेव इतियावत् । केवल पञ्चहायनः केवलाः पञ्च हायना अब्दा यस्य स पञ्चवर्षीय इत्यर्थः । 'संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा' इत्यमरः । अत एव प्रियंवदो मिष्टभाषी । 'प्रियवशेवदः खच्' इति खच् । 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागमश्च । अर्भकः शिशुः 'पोतः पाकोऽर्भकोडिम्भः पृथुकः शावकः शिशु' रित्यमरः । अमात्यवंशानुगताधिपत्यकमधिपतेर्भाव आधिपत्य माधिपत्यमेवाऽऽधिपत्यकं 'पत्यन्त पुरोहितादिभ्यो यक्' इति यक् ।

---

१ (२० फरवरी १९१३ ई० राज्याभिषेक कालः)

स्वार्थे कश्च। अमात्यस्य वंशोऽमात्यवंशस्तमनुगतं यदाधिपत्यं तदमात्यवंशानुगताधिपत्यकं मन्त्रिकुलानुसृतजनप्रभुत्वं 'मन्त्री धीसचिवोऽमात्यो' 'वंशोऽन्वायः सन्तान' इत्युभयत्राप्यमरः। निव ~~र्विषुः प्रवर्तयितुमिच्छुः 'सनाशंस भिक्षउः' इत्यनेन सन्नन्तादुः~~। इव यथा। आसनेसिंहासने संस्थितवान् तस्थौ पञ्चवर्षीयो मिष्टभाषी त्रिभुवनो मन्त्रिकुलानुयातां राज्यलक्ष्मीं निवर्तिषुरिव नृपासने स्थितवानिति भावः। अत्रोत्प्रेक्षाऽलङ्कारेण कविस्त्रिभुवनस्य भाव्युत्कर्षं सूचयति। सर्गेऽस्मिन् वंशस्थं वृत्तम्। लक्षणमुक्तमेव।

तदुच्चकाशे कनकासनं ततो
यथोदयाद्रिर्नवभानुनाऽमुना।
प्रभाकरेणेव जगत्सु गौरवं
यशस्करेणाऽप्युपलप्स्यते ध्रुवम् ॥२॥

तदिति। ततः सिंहासनारोहणानन्तरम्। अमुना शिशुना बालकत्रिभुवनेनेत्यर्थः। हेतौ तृतीया। तत् प्रसिद्धं कनकासनं सुवर्णपीठं सिंहासन मित्यर्थः। 'पीठ मासन' मित्यमरः। नव भानुना बालार्केण। अत्राऽपि हेतौ तृतीया। उदयाद्रि रुदयाचलो यथोच्चकाशे रराज। अत्र पूर्णोपमालङ्कारः। प्रभाकरेण विभाकरेणेव 'भास्कराहस्करब्रध्नप्रभाकरविभाकरा' इत्यमरः यशस्करेण यशोविधायिना राज्ञेत्यर्थः। जगत्सु भुवनेषु गौरवं महिमोपलप्स्यते प्राप्स्यते ध्रुवम्। अत्रापि पूर्णोपमालङ्कारः।

स्वयं महीशोऽपि तदाऽऽत्ममन्त्रिणा
निवारितोऽभूत् स तु सोधुशिक्षणात्
अतो व्यतीतं बत लीलया लस-
न्मनस्विनो बालनृपस्य शैशवम् ॥३।

स्वयमिति । तु किन्तु स त्रिभुवनः स्वयंमहीशः पृथ्वीश्वरोऽपि साधु शिक्षणात नृपं चितशिक्षाया राजनीतिशिक्षाया इत्यर्थः। तदा तस्मिन् समये । आत्ममन्त्रिणा स्वसचिवेन । निवारितो निषिद्धोऽभूत्। राजनीतिशिक्षां नाप्तवान् केवलं साधारण शिक्षामेव लेभ इतिभावः। अत उचितशिक्षाप्राप्त्यभावात्। मनस्विनः प्रशस्तं मनो यस्यतस्य 'अस्माया मेधास्रजो विनि' रिति विनि प्रत्ययः। बालनृपस्य शिशुराजस्य शैशवं बाल्यं 'शिशुत्वं शैशवं बाल्य' मित्यमरः। लीलया क्रीडया लसच्छोभमानं सत् व्यतीतं गतमासीदितिशेषः। बतेति खेदे।

तथापि साहित्यसुधा सुधाधरो-
धराश्रयायां गिरि तेन सेविता।
नयी नृपाणां सचिवैरलक्षितं
व्यभाजि पाश्चात्यसरस्वतीष्वपि ॥४॥

तथापीति । तथापि राजनीतिशिक्षाभावेऽपि । तेन त्रिभुवनेन साहित्यसुधा साहित्यामृतम् । सुधाधराधराश्रयायां सुधायाः धराः सुधाधरा देवा स्तेषा मधरेष्वोष्ठेष्वा श्रयो वसतिर्यस्या सा तस्यां तथोक्तायोम । गिरि वाण्यां देववाण्यामित्यर्थः संस्कृतभाषायामिति यावत् । सेविता शुश्रूषिता । त्रिभुवनेन संस्कृतसाहित्यमपाठीतिभावः । ' ब्राह्मीतु भारती भाषा गीर्वाग वाणी सरस्वती ' त्यमरः । नृपाणां राज्ञां नयो नीतीराजनीतिरित्यर्थः । पाश्चात्यसरस्वतीषु पश्चाद्भवाः पाश्चात्याः 'दक्षिण पश्चात्पुरसस्त्य' गिति त्यक्प्रत्ययः , पूर्वभूगोलस्य पश्चिम भागे स्थिता 'यूरो' पाख्यदेशवासिन आङ्गलजना इत्यर्थ स्तेषां या स्वरस्वत्योभाषा स्तासु तथोक्तासु । आङ्गलभाषास्वित्यर्थः । बहु वचनप्रयोगेण ' ऊर्दू ' 'आङ्गला'दिभाषास्वितिबोद्धव्यम् । सचिवै र्मन्त्रिभि रलक्षित मदृष्टं यथातथा व्यभाजि भेजेऽपि । त्रिभुवनेन राजनीति राङ्गलादि भाषासु मन्त्रिभिरज्ञातमपाठीति भावः ।

लघुस्फुलिङ्गोऽप्यनलो दवायते
दवोऽपि पाषाणतले प्रशाम्यति ।
तथा हि कालः कुरुते बलाबलं
भवेदसौ बालनृपोऽपि वीर्यवान् ॥५॥

लघ्विति। लघुस्फुलिङ्गोऽल्पाग्निकणोऽप्यनलो बह्निर्दवायते दव इवाचरति। 'कर्तुः क्यङ्सलोपश्चे' ति क्यङ्प्रत्ययः। 'त्रिषु स्फुलिङ्गोऽग्निकणः' 'कृशानुः पावकोऽनलः' दवो वनहुताशनः' इति सर्वत्रचामरः। दवो वनाग्निरपि पाषाणतले प्रस्तरतले प्रशाम्यति प्रशान्तो भवति। दाह्यवस्त्वभावात्। तथाहि तादृगेव कालः समयो बलाबलं बलाबले। "चार्थे द्वन्द्व' इति समासः विप्रतिषिद्धं चानधिकरणवाचि' इति विकल्पात् द्वन्द्व कवद्भावः करोति विधत्ते। समयादेव बलवान् दुर्बलो, दुर्बलोऽबलवान् भवतीत्यर्थः। अतोऽसौ बालनृपः शिशुभूपालो दुर्बलोऽपीत्यर्थः। वीर्यवान् बलवान् भवेदिति कविर्नृपस्य भाव्युन्नतिं सूचयति।

शनैः शनैस्तस्य तनौ मनोरमा
कुमारयन्ती शिशुता तिरोहिता।
विकाशयन्नूतनलोमलेखिकां
जये पताकामिव यौवनं स्फुटम् ॥६॥

शनैरिति। तस्य बालनृपस्य तनौ शरीरे। कुमारयन्ती कुमारवदाचरन्ती 'कुमारक्रीड़ायां' मितिधातो र्णिजन्तात् शतृप्रत्ययः 'उगितश्चे' ति ङीप्। मनोरमा चेतोहरा शिशुता शैशवं

शनैः शनैस्तिरोहिताऽन्तर्हिता । नृपस्य बाल्यावस्था शनैर्यया वि-त्यर्थः । जये युद्धविजये पताकां वैजयन्ती मिव नूतनलोमलेखिकां नूतना या लोमलेखिका तां तथोक्तां नवरोमराजिं विकाशयत् प्रकटयत् यौवनं तारुण्यं स्फुटं प्रकटित मभूदिति शेषः । तारुण्यं यौवनं सम मित्यमरः । नृपस्य शरीरे शैशवानन्तरं तारुण्य मा-जगामेतिभावः । अत्रोपमा ।

नयेन युक्तो विनयेन चान्वितः
शशास भूमिं न सुशासकोऽपि सः ।
अबाल एवाऽपि बभूव बालवान्
यतो बली नाप बलं मनागपि॥७॥

नयेनेति । नयेन नीत्या युक्तः सहितः । विनयेन नम्रभा वेनाऽन्वितो युक्तश्च । नययुक्तोऽपि विनय- (विगतो नयो विनय स्तेन) युक्तः कथं भवेदिति विरोधः । सुशासकः सुशासिताऽपि स त्रिभुवनो भूमिं पृथ्वीं न शशास । आत्मसचिवेन राज्यशा-सनाधिकारग्रहणात् । सुशासके सत्यपि राज्याशासनात् वि-रोधः । अबालो न बालोऽबालोऽनर्भक स्तरुण एवापीत्यर्थः । बालवान् केशवान् बभूव । चूडाकर्मणः पूर्वं बाल एव केशान् धत्ते तरुणस्तु चूडाकर्मणः पश्चादवस्थायां भूतत्वादल्पकेश एव । असौ

त्तु मनसो विरक्त स्तारुण्येऽपि केशवान् बभूवेत्यर्थः। अथवाऽबालो युवा सन् बालवानपि केशवानपि बभूव। 'कलौ केशेषु मण्डन' मिति शास्त्रोक्त स्तरुणो भूपः केशमण्डनधारी बभूवेत्यर्थः। अबालो (न विद्यते बालो यस्य सः) ऽपि कथं बालवान् (बालयुक्तः) बभूवेति विरोधः। "चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः" इत्यमरः। भूपशासनकेशधारणादिकारण माह-यतो यस्मात् कारणात् बली बलवान् तारुण्य सम्पन्नत्वात् मनागीषदपि बलं सैन्यं नोऽऽप न लेभे। मन्त्रिणा वशीकृतत्वात् बलिनोऽपि बलाभावे विरोधः। 'वरूथिनी बलं सैन्यं चक्रं चानीक मस्त्रियाम्' इत्यमरः। अत्र विरोधाभासोऽलङ्कारः।

रतैर्हृदाकृष्य महीभृतश्चिरं
दिधीर्षुभिः शिण्व्यधिकारमात्मनि।
स्वमन्त्रिभिः प्रेषितकामिनीजने
दधौ मनो मा नयविन्नरोत्तमः॥८॥

रतैरिति। महीभृतो भूपस्य तारुण्यारूढभूपस्येति बोद्धव्यम्। हृन्मनः 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः।' इत्यमरः। रतै निंधुवनैः 'व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रत' मित्यमरः। आकृष्याऽऽकृष्टं कृत्वा। आत्मनि स्वस्मिन्।

' शिष्टयधिकारं राज्यशासनरूपाधिकृतिम् । ' अववादस्तु निर्देशो निदेशः शासनं च सः । शिष्टि श्चाज्ञे ' त्यमरः । चिरं बहुकालपर्यन्तं दिधीर्षुभिर्धर्तुमिच्छद्भिः । स्थिरीकर्तुं विधित्सुभिरित्यर्थः । ' सनाशंस भिक्षउः ' इतिसन्नन्तादुः । स्वमन्त्रिभिरात्मामात्यैः । प्रेषितकामिनीजने प्रेषितो यः कामिनीजनो विलासिनीजनस्तस्मिन् । नयविन्नीतिज्ञो नरोत्तमो नृवरस्त्रिभुवन इत्यर्थः । मनश्चित्तं मा दधौ न दधार । माङिलुङिति सूत्रेणाऽत्र लुङ्लकारस्तु न शङ्कनीयः । अयं माशब्दो नतु माङ्शब्दः ।

परस्परप्रेमनिबद्धमानसे
सुवंशजे भारतवर्षकन्यके ।
उवाह भूपः कुलरीतिपूर्वकं
विहाय राणातनये नये पटुः ॥९॥

परस्परेति । नये नीतौ पटुश्चतुरः स भूपो महिप स्त्रिभुवन इत्यर्थः । राणातनये राणात्मजे विहाय त्यक्त्वा । परस्परप्रेमनिबद्धमानसेऽन्योन्यस्नेहैकचित्ते सुवंशजे सत्कुलजाते 'सप्तम्यां जने डः ' इतिडप्रत्ययः । भारतवर्षकन्यके भारतवर्षस्य भारताख्यदेशस्य कन्यके कुमार्यौ ते तथोक्ते । पञ्चनदजात कन्यके इत्यर्थः । कुलरीतिपूर्वकं वंशरीत्यनुसारेण । उवाहोपयेमे ।

तयोर्महिष्योस्तनयत्रयं क्रमाद्
धराधिपस्याऽजनि रूपभाग्यभाक् ।
अमीषु पुत्रेषु महेन्द्रसंज्ञको
बभूव सूनुर्युवराज उत्तमः ॥१०॥

तयोरिति। धराधिपस्य पृथिवीन्द्रस्य तयोः पूर्वोक्तयो र्महिष्यो राज्ञ्यो रूपभाग्यभाक् सौन्दर्य सुनियतिसम्पन्नं तनयत्रयं पुत्रत्रयम्। अजन्युदपद्यत। जनधातोः कर्तरि लुङ् 'दीप जनबुधे' त्यादिसूत्रेण चिण्। अमीषु पुत्रेषु महेन्द्रसंज्ञको महेन्द्राख्य उत्तमोज्येष्ठो वा सूनुः पुत्रो युवराजो बभूव।

अशक्नुवन् प्रापयितुं कथञ्चन
स्वशिष्टिहंसीं करकञ्जपिञ्जरे।
पुरौकसां स्वंप्रति हृद्यभावना-
मियेष लब्धुं स्थिरधीः सुधीवरः ॥११॥

अशक्नुवन्निति। स्थिरधीर्निश्चलबुद्धिः सुधीवरो विद्वद्वर स्त्रिभुवनइत्यर्थः स्वशिष्टिहंसीं स्वस्याऽऽत्मनः शिष्टिः शासनमेव हंसी

वरटा तां तथोक्ताम्। 'अववादस्तु निर्देशोनिदेशः शासनं च सः। शिष्टिश्चाज्ञे ' त्यमरः। करकञ्जपिञ्जरे करौ कञ्जे इव करकञ्जे तयोः पिञ्जर स्तस्मिन् करकञ्जपिञ्जरे भुजाम्बुजपिञ्जर कथञ्चन केनाऽपि प्रकारेण प्रापयितु मासादयितु मशक्नुवन्नपारयन् सन्। पुरौकसां नगरवासिनां स्वमात्मानं प्रति राजानं प्रतीत्यर्थः। हृद्यभावनां हृद्यां हृदिभवा सा चासौ भावना तां हृद्य भावनां हृदयस्थविचारं वा प्रियविचारं लब्धुं मां मन्त्रिनियन्त्रितं राजानं प्रति पौराणां कीदृशो विचारोऽस्तीतिज्ञातुमित्यर्थः। इयेषैच्छत्। अत्र पूर्वार्धे रूपकोपमे दृश्येते।

वसन्नलङ्घ्यैर्वरणैश्च वेष्टिते
निकेतने बन्धनमन्दिरे यथा।
दशा प्रजानां भुवि कीदृशीत्यसौ
महीपतिर्ज्ञातुमलं शशाक नो ॥१२॥

वसन्निति। असौ महीपतिः पृथ्वीशोऽलङ्घ्यैर्वरणैः प्राकारैः 'प्राकारो वरणः साल ' इत्यमरः। वेष्टिते परिवृतेऽत एव बन्धन मन्दिरे यथा कारागार इव वसंश्च भुवि पृथिव्यां स्वराज्य भूम्या मित्यर्थः। प्रजानां जनानां दशाऽवस्था कीदृशी कथंभूताऽस्तीति ज्ञातु मवगन्तु मलं पर्याप्तं यथातथा नो शशाक।

अमात्यवंशक्रमतो यवीयसा-
ऽनुजेन शिष्टेरधिकार आपि यत् ।
ततोऽचलद् भूरभ्रशन् पुरे गृहा
अमान्यवन्या ननु शासको न सः ॥१३॥

अमात्येति । अमात्यवंशक्रमतो मन्त्रिकुलपरम्परायाः। यवीयसा कनिष्ठेनाऽनुजेन भ्रात्रा जुद्धशमशेराख्येन राणावंशजेनेत्यर्थः। 'जघन्यजे स्युः कनिष्ठयवीयोवरजानुजा' इत्यमरः। मन्त्रिकुले शासनाधिकारोपलब्धि र्भ्रातृक्रमेण भवतिस्म। भ्रातृक्रमो यथेतिहासे—जङ्गबहादुरस्य पश्चात्तद् भ्राता रणोद्दीपाख्यः प्रधानामात्योऽभूत्। ततोधीरशमशेरसूनु र्वीर शमशेरः पितु पूर्वजं रणोद्दीपं व्यापाद्य प्रधानमंत्री बभूव। ततस्तस्य सप्त दशसु भ्रातृषु देवशमशेर चन्द्र शमशेर भीमशमशेर जुद्धशमशेराभिधाना जनाः क्रमेण प्रधानामात्या बभूवुः। जुद्धशमशेरस्तु तेषां कनिष्ठ आसीत्। स एवेह कविनोद्दिष्टः। अतः परं भीमात्मजः पद्मशमशेरः प्रधानामात्यो भविष्यति। शिष्टेः शासनस्याऽधिकारो यदापि प्राप्तः तत स्तस्माद्धेतोः। भूः पृथ्वी। अचलच्चचाल। भकम्पोऽभूदित्यर्थः। पुरे नगरे। गृहा भवनानि। 'गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालया' इत्यमरः। अभ्रशन् विनष्टा अ-

भवन्। स जुद्धशमशेरोऽवन्या भूम्या शासकः शासिता नाऽमानि नाङ्गीकृतः। ननु तर्के।

मनः स्वमाश्वासयितुं स चिन्तितं
ततो महेन्द्रस्य विवाहमैहत।
कुमारिकाणां गुणरूपवर्णनं
चकार सौधे ललिताङ्गनागणः ॥१४॥

मन इति। स त्रिभुवनस्तत स्तदनन्तरम्। चिन्तितं चिन्तायुक्तं स्वमात्मीयं मन श्चित्तमाश्वासयितु माश्वास्तं कर्तुं महेन्द्रस्य तज्ज्येष्ठसूनो र्विवाहं पाणिपीडनमैहतेयेष। सौधे प्रासादे ललिताङ्गनागणो ललिता रुचिरा या अङ्गनाः प्रमदास्तासां गणः समूहः। कुमारिकाणां कन्यकानां गुणरूपवर्णनं गुणरूपयो र्वर्णनं गुणरूपवर्णनं गुणसौन्दर्यव्याख्यानं चकार।

अहो महेन्द्रस्य मनो जिगाय नो
कथाऽन्यदीया ललिताऽपि सम्प्रति
तमित्थमारात् सरलैःप्रियैं कृतै-
र्वचोभिरेका निजगाद सुन्दरी ॥१५॥

अहो इति। ललितारुचिराऽप्यन्यदीया हरिशमशेरसुतेतरा सम्बद्धा कथावार्ता महेन्द्रस्य मनो हृदयं नो जिगाय। अहो इत्याश्चर्यम्। तं महेन्द्रवीरविक्रममारान्निकटात् 'आराद्दूरसमीपयो' रित्यमरः। 'दूरान्तिकार्थेभ्यो द्वितीयाचे' त्यनेन द्वितीया। सरलै ऋजुभिरुदारैर्वा प्रियै रभीष्टै ऋतैः सत्यैर्वचोभिर्वचनैरेका सुन्दरीत्थं निम्नप्रकारेण निजगाद कथयामास।

महेन्द्र,ते चित्तविनोदने क्षमा
गुणेन कान्त्या च पुलोमजासमा।
अमोघशिल्पं नु कलाविदो विधे-
र्विभर्ति नव्यं हरिनन्दिनी वयः ॥१६॥

महेन्द्रेति। महेन्द्र, महेन्द्रेण माननीयायाः स्त्रियाः सम्बोधनमेतत्। गुणेन दयादाक्षिण्यादिगुणेन कान्त्या रूपेण च पुलोमजासमा शचीसदृशी 'पुलोमजा शचीन्द्राणी' त्यमरः अत एव ते तव चित्तविनोदने मानसविनोदकर्मणि क्षमा कुशला। कलाविदः शिल्पकलाज्ञस्य विधेर्ब्रह्मणः 'स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधि' रित्यमरः। अमोघशिल्पं सफल क्रियाकाशलं तद्रूपेतिभावः। नु तर्के। एतादृशी हरिनन्दिनी हरिशमशेरतनया। इन्द्रराज्यलक्ष्मीरित्यर्थः। नव्यं नवीनं बाल्यात् पर-

त्वात्। वयोऽवस्थां तारुण्यमित्यर्थः। विभर्ति धत्ते।

चतुर्भिः श्लोकैर्मुखमण्डलं वर्णयति—

तदुत्तमाङ्गेऽमितसैत्यमेकत-
स्तथाऽन्यतः कार्ष्ण्यमनुत्तमं विधिः।
विधाय वर्णद्वयचारुतोच्चयं
प्रदर्शयत्यत्र जनाय किं क्षितौ॥१७॥

तदिति। विधिर्वेधा। तदुत्तमाङ्गे तस्या उत्तमाङ्गं गलोपरि भाग स्तस्मिन्। एकत एकत्र मुखमण्डले इत्यर्थः। अमितसैत्यं सितस्य भावः सैत्यं 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ्प्रत्ययः। अमितं न मित ममित तच्च तत्सैत्य ममितसैत्य मपरिमितशौक्ल्यमतिगौरवर्णमित्यर्थः। 'अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुन' इत्यमरः। तथा तेनैवप्रकारेणाऽन्यतोऽन्यत्र मुखमण्डलेतरभाग इत्यर्थः। अनुत्तमं न विद्यत उत्तमं यस्मात्तत् तथोक्त मत्युत्तमं कार्ष्ण्यं कृष्णस्यभावःकार्ष्ण्यं मसैत्यं कृष्णवर्णमित्यर्थः। अत्राऽपिष्यञ्। विधाय कृत्वाऽत्र क्षितौ पृथिव्याम्। जनाय मनुष्याय। जातावेकवचनम्। वर्णद्वयचारुतोच्चयं वर्णयोः सितासित वर्णयो द्वयं तस्य चारुता सौन्दर्यं तस्या उच्चय उन्नतराशिस्तंतथोक्तम्। प्रदर्शयति किम्। अत्रोत्प्रेक्षालङ्कारः।

विधूपकण्ठस्थघनाभकुन्तलै-
स्तदाननं चारु विभाति चन्द्रवत्।
मुखेन्दुभेदं न विलोक्य वेधसा
शशी कलङ्केन मलीमसीकृतः ॥१८॥

विधिवति । चारु सुन्दरं तदाननंतद्वदनं तस्या मुखमण्डल मित्यूह्यम् । विधूप कण्ठस्थघनाभ कुन्तलै विधोश्चन्द्रमस उपकण्ठे समीपे स्थिता ये घनामेघास्तेषामिवाभाकान्तिर्येषांते विधूपकण्ठस्थघनाभा एतादृशा ये कुन्तलाः कचास्तैः । करणैः । हेत्वर्थे तृतीया । 'उपकण्ठान्तिकाभ्यर्णाभ्यग्रा' इत्यमरः । चन्द्रवदिन्दु सदृशं 'तेन तुल्यंक्रियाचेद्वति' रित्यनेनवतिप्रत्ययः विभाति शोभते । वेधसा विधात्रा मुखेन्दुभेदं मुखं चेन्दुश्च मुखेन्दू तयो र्भेदस्तंमुखेन्दुभेदं वदनसुधांशुपार्थक्यं न विलोक्य न समीक्ष्य । शशी चन्द्रः । कलङ्केन लाञ्छनेन । मलीमसीकृतो मलिनीकृतस्ततएवेदंमुखमयं शशीतिज्ञानं सञ्जातम् । 'ज्योत्स्नातमिस्रे' त्यादि सूत्रेण निपातनादीमन्चिप्रत्ययः । अभूततद्भावेच्विः । पूर्वार्धे उपमालङ्कारः । उत्तरार्धे उत्प्रेक्षा ।

शिरोजकालद्वयकाननान्तरा-
गतैकसौन्दर्यझरैधितोर्मिका ।
ललाटलावण्यसरित् तता ननु
विभिद्य तस्या दृढबन्धनं भ्रुवोः ॥१९॥

शिरोजेति । शिरोजफालद्वयकाननान्तरागतैकसौन्दर्य भरैधितोर्मिका शिरोजानां शिरोरुहाणां यत् फालद्वयं भागद्वयं सीमन्तरेखाविभक्तभागद्वयमित्यर्थः । तदेव कानने वने तयोरन्तरं मध्यभाग स्तत आगतो य एकः सौन्दर्यभरो लावण्यवारिप्रवाह स्तेनैधिताः प्रवृद्धा ऊर्मय यस्या स्तथोक्ता । "शेषाद्विभाषा" इति कप् । 'वारिप्रवाहो निर्भरो भरः' इत्यमरः । ललाटलावण्यसरित् भालसौन्दर्यनदी । तस्या हरिनन्दिन्या भ्रूवो भ्रूरेखयो र्दृढबन्धनं कठिनबन्धनं विभिद्य भेदयित्वा तता विस्तृता । कपोलादिप्रदेशेष्वित्यूह्यम् । ननूत्प्रेक्षायाम् ।

प्रवृद्धसौन्दर्यतरङ्गरिङ्गिता
लतोपमा भ्रूः श्रुतिधाविलोचनम् ।
तिलप्रसूनाकृतिचारुनासिका
विभान्ति चास्या वदनेन्दुमण्डले ॥२०॥

प्रवृद्धेति । प्रवृद्धसौन्दर्यतरङ्गरिङ्गिता प्रवृद्धा एधिता ये सौन्दर्य तरङ्गा लावण्य भङ्गा स्तैरिङ्गिता चपलीकृता । लतोपमा व्रततितुल्या भ्रू भ्रूरेखा । श्रुतिधाविलोचनं कर्णान्तिक यायि दृक् विशाले लोचने इतिभावः । तिलप्रसूनाकृतिचारुनासिका तिल

प्रसूनस्याऽऽकृतिरिव चारुस्तिलप्रसूनाकृतिचारुरेतादृशी नासिका तथोक्ता । तिलपुष्पाकारसुन्दरनासा च । अस्या हरिनन्दिन्या वदनेन्दुमण्डले मुखचन्द्रचक्रवाले 'चक्रवालं तु मण्डलम्' इत्यमरः । विभान्ति शोभन्ते ।

साम्प्रतं कर्णवर्णनं कुरुते –

सदा स्मृतीनां श्रवणेन पावने
श्रुती तदीये ननु तीर्थवापिके ।
विभाति मग्नेषु नृनामपत्त्रिषु
'महेन्द्र' मंज्ञाऽत्र मरालशाडिव ॥२१॥

सदेति । सदा सवदा स्मृतीनां धर्मशास्त्राणां श्रवणेनाऽऽकर्णनेन पावने पवित्रे तदीये हरिसुतासम्बन्धिन्यौ श्रुती कर्णौ 'कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रव' इत्यमरः । तीर्थवापिके तीर्थाल्पसरसी । अल्पार्थे कप्रत्ययः । धार्मिकजनसेवितत्वात्, तीर्थवापी सदा शास्त्रोक्तैः पूता भवति । अतएव साम्यम् । 'निपानागमयोस्तीर्थमृष्टिजले गुरौ' वेशन्तः पल्वलं चाल्पसरी वापी तु दीर्घिके' त्युभयत्रामरः । ननूत्प्रेक्षायाम् । अत्र तीर्थवापीसदृशश्रुत्योर्मग्नेषु जलान्तर्गतेषु नृनाम पत्त्रिषु नृणां नामान्येव प-

त्रिण स्तेषु नृनामपत्त्रिषु मनुष्याभिधानपक्षिषु 'पतत्त्रिपत्त्रि पतगपतत्पत्र रथाण्डजा' इत्यमरः। महेन्द्रसंज्ञा महेन्द्र इतिसंज्ञा महेन्द्रसंज्ञा महेन्द्रइतिनाम। मरालराड् राजहंस इव विभाति शोभते। जलाशयप्रविष्टपक्षिषु राजहंस इव तत्कर्णविवरान्तर्गत नृनामसु 'महेन्द्र' इति नामाधिकतरं शुशुभ इति भावः। तच्छ्रु तनृनामसु 'महेन्द्र' इति नाम्नैव तस्याहृदयमाकृष्टमभूदित्याशयः। पूर्वार्धे उत्प्रेक्षालङ्कार उत्तरार्धे तु रूपकोपमालङ्कारौ।

नवारुणारक्तहिमावधीरिणी
कपोलभित्तिर्नवनीतकोमला।
वयःसखैः स्वेदलवैः समञ्चिता
प्रतीक्षतेऽस्यास्तव पाणिलालनम् ॥२२॥

नवेति। नवारुणारक्तहिमावधीरिणी नवो नूतनो योऽरुणः सूर्यो बालार्क इत्यर्थः, तेनाऽऽसमन्तात् रक्तं शोणितं यद्धिमं तुहिनं तदवधीरयति तिरस्करोति तच्छीलेति तथोक्ता। अतिशयित रक्त भरित गौरवर्णेति यावत्। ताच्छील्ये णिनिः। नवनीतकोमला हैयङ्गवीन मृदुला 'नवनीतं नवोद्धृतम्। तत्तु हैयङ्गवीनं यत् ह्योगोदोहोद्भवं घृत' मित्यमरः। अस्याः सुन्दर्याः कपोल भित्ति र्गण्डस्थलम्। वयःसखैः यौवनसहचरिभि स्तारुण्ये कामभावे

नोद्गतै रित्याशयः । स्वेदलवै र्निदाघकणैः । 'घर्मोनिदाघः स्वेदः स्या ' दित्यमरः । समञ्चिता सम्यगञ्चितोपचिता सती । काम भावोद्गतनिदाघ कणपूर्णा सतीत्यर्थः । तव ते पाणिलालनं पाणे र्भुजस्यलालनं प्रीणनं तत् तथोक्तम् । प्रतीक्षते प्रतीक्षां कुरुते तत्पाणिस्पर्शादेव तत्सुन्दरकपोलजन्मसाफल्यं भवतीतिभावः ।

नेत्रं वर्णयति–

विधूदयप्रस्फुटितोत्पलोपमा
मनोरमापाङ्गगतागतैश्चला ।
तदीयदृक् खञ्जननिन्दिनी रुचा
स्वरुपगर्वाद् भवतीव मानिनी ॥२३॥

विधित्विति । विधूदयप्रस्फुटितोत्पलोपमा विधोश्चन्द्रमस उदय आविर्भावे प्रस्फुटितं प्रकर्षेण विकचितं यदुत्पलं कुवलयं तदुपमा सादृश्यं यस्यास्तथोक्ता । आकृतिवर्णनमिदम् । स्यादुत्पलं कुवलय' मित्यमरः । मनोरमापाङ्गगतागतै रमत इतिरमो 'नन्दि ग्रहिपचादिभ्योल्युणिन्यच' इतिरमु धातो रच् । मनसो रमौ सुन्दरावेतादृशौ यावपाङ्गौ नेत्रान्तभागौ तयो र्गतागतानि यातायातानि तै स्तथोक्तैः । 'अपाङ्गौ नेत्रयोरन्तौ' वित्यमरः । चला चञ्चला । स्वभाव वर्णनमिदम् । रुचाकान्त्या खञ्जननिन्द-

नी नेत्रोपमान भूततदाख्य पक्षिविशेष तिरस्कारिणी। सौन्दर्यंवर्णनमिदंम् तदीयदृक् तल्लोचनम। स्वरूपगर्वात स्वरूपस्यगर्वः स्वरूप गर्व स्तस्मात् यद्वा रूप्यते निश्चीयतेऽनेनेति रूपं ज्ञानं तस्मात् स्वरूपगर्वात्। हेत्वर्थे पञ्चमी। मानिनी मानवतीव भवती। उपमा प्रतीपोत्प्रेक्षाणां संसृष्टिः।

अधरं वर्णयति-

कृता सुदत्या दशनच्छदान्तरे
नवेन रेखा वयसा स्मितस्य या।
श्रियोल्लसन्तीं किमु कैतकीं नवां
समीकरोत्यात्मरुचैव सा शिखाम् ॥२४॥

कृतेति। सुदत्याः शोभनादन्ता यस्यास्तस्याः सुन्दरदशनायाः। 'वयसिदन्तस्पदत्' इतिदत्रादेशः। 'उगितश्चे' तिङीप्। दशनच्छदान्तरे दशनच्छदयो रन्तरं दशनच्छदान्तरं तस्मिन् तथोक्तेऽधरान्तरे। नवेन नवीनेन वयसाऽवस्थया तारुण्येनेत्यर्थः। या स्मितस्य मन्दहासस्य 'स्मिङ् ईषद्धसने' इतिधातोः क्तप्रत्ययः स्मितलक्षणं यथा साहित्यदर्पणे- 'ईषद्विकासिनयनं स्मितं स्यात् स्पन्दिताधरम्' इति। रेखा लेखा कृता विहिता। सा यच्छब्दनिर्दिष्टाऽऽत्मरुचा स्वसौन्दर्येणैव। श्रिया शोभया। "श्रीवेषरचना

शोभा भारती सरल द्रुमे । लक्ष्म्यां त्रिवर्गसम्पत्तौ वेषोपकरणे मता" विति विश्व मेदिन्यौ। उल्लसन्तीं दीप्यमानां नवां प्रत्यग्रां सद्योजाता मित्यर्थः । कैतकीं केतक पुष्पसम्बन्धिनीं शिखा मङ्कुरं समीकरोति तुल्यतां नयति। किमु तर्के। तत्स्मितरेखा नवा केतकी शिखेवाऽस्तीतिभावः। अत्रोत्प्रेक्षालङ्कारः ।

स्वरं वर्णयति--

न कम्बुकण्ठ्या पिक एव निर्भरं
स्वरेण माधुर्यभरेण निर्जितः ।
स्वरस्य संस्कारकरः स यौवने
स्मरोऽपि तेनाऽऽशु पराजितो गुणे ॥२५॥

नेति । कम्बुकण्ठ्या कम्बुशङ्खइव कण्ठो गलो यस्यास्तया। 'शङ्खः स्यात् कम्बु रस्त्रिया' वित्यमरः । माधुर्यभरेण माधुर्यपूर्णेन। स्वरेण शब्देन। पिकः कोकिल एव निर्भर मत्यर्थं न निर्जितो न पराजितः । अपितु तेन स्वरेण यौवने तारुण्ये स्वरस्य संस्कारकरः परिष्कारकरः स्मरोऽपि कामदेवोऽपि । आशुशीघ्रं यथातथा योवनारम्भ एवेत्यर्थः । गुणे स्वरमाधुर्यवर्धनात्मकगुण विषये । पराजितो निर्जितः। काम भावमिश्रणादेव युवतीनां यूनां च स्वरा यौवने मधुरा भवन्ति। अतःस्मर एव स्वरमाधुर्यवर्ध-

कः। परन्तु तस्याः स्वरमाधुर्येण स्वरमाधुर्य वर्धनात्मक गुणविषये स पराजित इति भावः। तस्याः स्वरे माधुर्यातिशयो वर्तत इति मुख्यार्थः।

पयोधरौ वर्णयति--

शनैः शनैर्भावनया समं ह्रिया-
मुदीयमाने तदुरोजयोर्द्वये।
नवव्रतत्याः कुसुमोद्गमोऽपि नो
समादृतः पुष्पशरेण पूर्ववत्॥२६॥

शनैरिति तदुरोजयो स्तस्या उरोजौ तदुरोजौ तयोस्तदुरोजयो स्तद्वक्षोजयो द्वये युग्मके स्तनद्वय इत्यर्थः। भावे सप्तमी। ह्रियां लज्जानां भावनया विवेकेन समम्। सहार्थे तृतीया। शनैः शनैः क्रमेणोदीयमान आविर्भूते सति लज्जयासह स्तनद्वये वक्षसि प्रकटिते सतीतिभावः। नवव्रतत्या नूतनलतायाः 'कुसुमोद्गमः पुष्पोद्भूति रपि पुष्पशरेण प्रसूनवाणेन कामेनेत्यर्थः। पूर्ववत् नो समादृतो न मानितः स्तनाविर्भावेन कुसुमोद्गमस्य लाघवत्वात्। नवव्रतति कुसुमोद्गमाधिक सुन्दरं ततस्तन द्वयमस्तीत्यवगम्यते।

"कृशोदरीं वीक्ष्य न मामकी कथा
स्मृताऽपि भूया" दिति शङ्कयाकुलम्
हरिं न बुध्वा हरिनन्दिनी मुधा
करोति तस्योदरवर्णनं मुहुः ॥२७॥

कृशोदरीमिति । कृशोदरीं क्षीणकटिं हरिनन्दिनी मित्यर्थः । वीक्ष्य दृष्ट्वा मामकी मदीया कथावार्ता 'सिंहस्योदर मति कृशमस्ती 'ति वार्ता स्मृताऽपि जनैश्चिन्तिताऽपि न भूयात्' इति शङ्कयेत्थंभूतेन भयेन 'शङ्का वितर्कभययो' रितिविश्वः । आकुलं व्याकुलं हरिंसिंहं न बुध्वा नविदित्वा । हरिनन्दिनीकृशोदरे जनै र्दृष्टेसति तत्सौन्दर्यविमुग्धा जना' सिंहस्योदर मति सुन्दरमस्तीति न कथयन्ती' त्थं भूतेन भयेन व्याकुलता मापन्नस्य सिंहस्याऽवस्थां न विदित्वेतिभावः । 'सिंहोमृगेन्द्रः पञ्चास्यो हर्यक्षः केशरी हरि' रित्यमरः । हरिनन्दिनी तस्य सिंहस्योदरवर्णनं कटिव्याख्यानं मुहुर्वारंवारं मुधा व्यर्थं कुरुते । सिंहोदरादपि तदुदरं कृशतरं चारुतरं चाऽस्तीति' तात्पर्यम् ।
भुजौ वर्णयति-

नवीनपुष्पाधिमृदुर्भुजद्वयी
श्लथा प्रसूनावचयाद् भवत्यहो ।
कराङ्गुलीस्पर्शमुपेत्य कोमलं
गुणस्य गर्वं कुसुमं नु मुञ्चति ॥२८॥

नवीनेति । नवीनपुष्पाधिमृदु नवीनं नवं सद्यो विकसित मित्यर्थः । यत् पुष्पं कुसुमं तस्मादधिका मृदुः कोमला तथोक्ता । भुजद्वयी पाणिद्वयम् । प्रसूनावचयात् कुसुमग्रहणादपि श्लथा शिथिला भवति । अहो आश्चर्यम् । कुसुमं पुष्पम् । कर्तृपदम् । कोमलंमृदुलं कराङ्गुली स्पर्श मुपेत्यप्राप्य गुणस्य कोमलतागुण-स्य गर्वं मानं मुञ्चति त्यजति नु तर्के । पूर्वार्धेऽतिशयोक्तिरलङ्का-रः । उत्तरार्धे तूत्प्रेक्षालङ्कारः ।

कराङ्गुली वर्णयति–

यदा स्मरः पञ्चमुखेक्षणानि नो
शशाक जेतुं निजपञ्चसायकैः ।
न चित्र, मासीद् बहुनेत्रहारिणी-
रियं दधाना न दशाङ्गुलीस्तदा ॥२९॥

यदेति । यदायस्मिन् दिने स्मरः कामो निजपञ्चसायकैः स्वपञ्चबाणैः पञ्चमुखेक्षणानि पञ्चमुखानि यस्य स पञ्चमुख स्तस्येक्षणानि पञ्चमुखेक्षणानि तानि तथोक्तानि पञ्चवदन लोचनानि रुद्रलोचनानीत्यर्थः । जेतुं नो शशाक न समर्थोऽभू-त् । स्वयमेव तल्लोचनाग्निनादग्धोऽभूत् । यतो बहुनेत्रहारिणी र्बहूनामनेकानां जनानां नेत्राणि नयनानि हरन्तीतितच्छीला इति

बहुनेत्रहारिण्यः, सौन्दर्यातिशयात्, तास्तथोक्ताः। अथवा बहूनि नेत्राणि हरन्तीति ता स्तथोक्ता अनल्पलोचनहारिणीः। दशाङ्गुलीर्दशाङ्गुल्यो दशावयवाङ्गुल्यो दशाङ्गुल्य स्ता दशाङ्गुलो दशसङ्ख्यककराङ्गुलीर्दधाना विभ्राणेयं हरिनन्दिनी तदा तस्मिन् दिने स्मरमृत्युदिन इत्यर्थः। नाऽऽसीत्। अतो न चित्रं नाश्चर्यम्। यदीयं तद्दिने भवेत् स्मर स्तपश्चरन्तं रुद्रमपि विजेतुं शक्नुयात्। इयं तपश्चरतो रुद्रस्याऽपि चित्तमाकर्षयितुं शक्नुयादित्यर्थः। अस्या अनुत्पत्तौ स्मरः पराजयं प्राप्तोऽतो नाश्चर्यम्। रुद्रतपोभङ्गकर्मणि स्मरसाहाय्यार्थ सुपेताभ्योऽप्सरोभ्योऽपीयंचारुतमेत्यपि व्यज्यते। अथवैकमुखे द्वे नयने भवतः। पञ्चसु मुखेषु द्विगुणित पञ्चत्वेन दशनयनानां सम्भवः। कामस्य सायकाः पञ्चैव। दशनयनेभ्य स्तदल्पसंख्यकपञ्चसायकानां युद्ध पराजये नाश्चर्यम्। इयं सुन्दरी यदि तत्समये भवेत्, तर्ह्यस्या बहुनेत्रहारिणीनां दशाङ्गुलीनां निजपञ्चसायकानां च योगात् स्मरः पञ्चमुखस्य प्रकल्पितदशनयनानि विजेतुं समर्थो भवेदित्यादयः कवे स्तर्काः।

चरणवर्णनं कुरुते--

सुरोहितौ तच्चरणौ तलस्पृशौ
समुन्नताग्रौ च निगूढगुल्फकौ ।
विलोक्य हंसी निजयाननिन्दकौ
कदा तदग्रे न चलेन्नु भूतले॥३०॥

सुरोहिताविति । सुरोहितौ सुरक्तौ रक्ततलाविति बोद्धव्यम् । 'रोहितोलोहितो रक्त' इत्यमरः । तलस्पृशौ तलस्पर्शिनौ समुन्नताग्रौ समुच्छ्रिताग्रभागौ निगूढगुल्फकावदृष्टघुटिकौ च निजयाननिन्दकौ स्वगतितिरस्कारिणौ, गमनशोभातिशयात् । तच्चरणौ हरितनयापादौ । 'तद्ग्रन्थी घुटिके गुल्फा' वित्यमरः । विलोक्य दृष्ट्वा । हंसी जातावेकवचनम् । कर्तृपदमेतत् । तदग्रे तस्याः पुरतः कदाभूतले पृथ्वीतले । न तु जले, तत्र पादचालनविलोकनासम्भवात् । नचलेन्न गच्छेत् । नु तर्के । यथा सामुद्रिकाः- "यस्या रक्ततलौ पादा वुन्नताग्रौ तलस्पृशौ । निगूढगुल्फौ निहतौ सा स्यान्नृपति सम्मता" ॥इति॥

यथा तदीया रुचिरा तनूलता
सुनूतनाङ्गैरधिभाति यौवने ।
प्रसूनवल्ली न तथा स्फुटच्छदा
मधौ विभायात् कुसुमोद्गमैरपि ॥३१॥

यथेति । यौवने तारुण्ये तदीया रुचिराललिता तनूलता तनूलतेव तनूलता शरीरवल्ली, कृशायतत्वात् तनूलतयोः साम्यम् । सुनूतनाङ्गैः सुन्दरनवाङ्गैर्यथाऽधिभाति विशेषेण शोभते। तथा तेन प्रकारेण मधौ वसन्ते स्फुटच्छदा दृष्टदला नवदलयुक्तेत्यर्थः। प्रसूनवल्ली पुष्पलता कुसुमोद्गमैरपि पुष्पाविर्भावैरपि न विभायात् न राजेत। तारुण्ये नवावयवा सा वसन्तविकासितपुष्पलताया अपि रुचिरतरा बभूवेति भावः।

युग्मकम्—

पतिर्मदीयो धरणीश्वरात्मजो
भविष्यतीति प्रवदन्ति मां जनाः ।
ऋतानि तेषां वचनानि सन्ति चेद्
विधेश्चिरायुर्मम जीवितं च किम् ॥३२॥

कदा युवानं मम बाहुवल्लरी
महाश्रयं राजसुतं समेष्यति ।
विचिन्तयन्तीत्थमियं निजोरसि
सदा दधाति प्रियचित्रकं तव ॥३३॥

पतिरिति । जना दैवज्ञजना मां मदीयो मामकीनः पति र्भर्ता धरणीश्वरात्मजो राजपुत्रो न तु राजा, महेन्द्रस्य युवराज त्वावस्थायामेवास्याभावि स्वर्गारोहणं दृष्ट्वा भविष्यज्ञास्तां राजपुत्रपत्नी भवेदित्येव कथयांबभूवुः। भविष्यतीति प्रवदन्ति। तेषां वचनानि वाक्यानि। ऋतानि सत्यानि सन्ति चेत्, यद्यहं महेन्द्रवीरविक्रम पत्नी भवेयमित्यर्थः। विधेर्विधातर्मम जीवनं जीवितं च किं चिरायुर्दीर्घजीवि। अस्तीतिशेषः। एतेनाऽस्या दीर्घभोगलिप्सा दृश्यते तथाऽऽयुषो दैर्घ्ये शङ्का च कविना सूच्यते।

कदेति। कदा कस्मिन् दिने मम बाहुवल्लरी भुजलता महाश्रयं महान् गुरुराश्रयोऽवलम्बो यस्य तम्। युवानं तरुणं राजपुत्रं नृपतनयं त्रिभुवन पुत्र मित्यर्थः। महेन्द्रवीरविक्रममिति यावत्। समेष्यति प्राप्स्यति। इत्थमीदृक प्रकारेण विचिन्तयन्ती विशेषेण तर्कयन्तीयमेषा हरितनयेत्यर्थः। इन्द्रराज्यलक्ष्मीरिति यावत्। निजोरसि स्ववक्षसि तव ते प्रियचित्रकमभीष्टालेख्यं सदा दधाति।

निजात्मजोद्वाहविधिं त्वया नृपो
न काङ्क्षतीत्थं सखि तं न चिन्तय।
इतीरितान्या परिहासतोऽपि सा
भविष्यमाशङ्क्य बिभेति दारुणम्॥३४॥

निजेति । नृपोराजा निजात्मजोद्वाह विधिं स्वतनयपरिण-य विधिं त्वया भवत्यासह। सहार्थे तृतीया। न काङ्क्षति नेहते। इत्थ मनेन प्रकारेण सखि, तं महेन्द्र मतो न चिन्तय । इत्याल्या सख्या 'आली सखीवयस्या चे' त्यमरः। परिहासत ईरिता क-थिताऽपि सा भविष्यं दारुणं भयङ्कर माशङ्क्य त्वयासह विवा हो न भवेदित्याशङ्क्येत्यर्थः । बिभेति।

न याति रम्योपवनेऽपि साऽधुना
न वक्ति कामं च सखीषु पूर्ववत् ।
अमण्डना निर्जनवासकाङ्क्षिणी
दृगम्बुभिः सान्त्वयति स्ववेदनाम् ॥३५॥

नेति। अधुना सम्प्रति सा रम्योपवने सुन्दरोद्यानेऽपि न याति न गच्छति । भविष्यं दारुणमाशङ्क्येति बोद्धव्यम् । स-खीष्वालीषु पूर्ववत् कामंपर्याप्तं न वक्ति न वदति च । अमण्ड-नाऽलङ्कारवर्जिता निर्जनवासकाङ्क्षिणी विजनवासाभिला-षिणी सती दृगम्बुभि र्नयनजलैः स्ववेदनां निज मानसव्यथां सा-न्त्वयति शमयति । अश्रुपातेन मानसीव्यथा लघुर्भवतीति मनोवै-ज्ञानिकाः ।

नरेन्द्रसूनो तव पाणिपीडनं
भवत्विदानीमनया सह ध्रुवम्।
इयं विधातू रचना मनोरमा
मुधा भवेन्नु त्वयि निष्कृपे यतः ॥३६॥

नरेन्द्रेति। नरेन्द्रसूनो भोराजपुत्र, तव पाणिपीडनं विवाह इदानीमधुनाऽनयेन्द्रालक्ष्म्या सह ध्रुवं निश्चयमेव भवतु। यत स्त्वयि भवति निष्कृपे निष्करुणे सति। अनया सह त्वया विवाहेऽनङ्गीकृते सतीत्यर्थः। विधातु र्ब्रह्मणो मनोरमा सुन्दरीयं रचना हरिनन्दिनीरूपा सृष्टिर्मुधा वृथा भवेत्। विना सौन्दर्योपभोगेन वृथा भवेदित्यर्थः। इयं त्वद्विरहेणैवाऽसूं स्त्यजेदिति यावत्। नु तर्के।

विवेश राणान्वयजाप्रशंसिनी
तदुक्तिहंसी नृपसूनुमानसे।
चलज्जलोर्मिस्नपिताम्बुजेक्षणा
जगाद तामोमिति स स्मरन् प्रियाम् ॥३७॥

विवेशेति। राणान्वयजा प्रशंसिनी राणावंशजाप्रशंसिनी तदुक्तिहंसी तस्याः प्रमदाया उक्तिः कथनमेव हंसी तदुक्ति-

हंसी। नृपसूनुमानसे नृपसूनुरेव मानसो मानससरोवर स्तस्मिन् तथोक्ते। विवेश प्रवेशमकरोत्। प्रियां दयितां पुरोवर्तिन्या प्रमदयोद्दिष्टां प्रिया मित्यर्थः। इन्द्रराज्यलक्ष्मी मिति यावत्। स्मरन्। अतएव चलज्जलोर्मिस्नपिताम्बुजेक्षण श्चलन्तो ये जलोर्मय स्तैः स्नपिते क्षालिते अम्बुजे इवेक्षणे यस्य स चलज्जलोर्मिस्नपिताम्बुजेक्षणो लोलसलिलतरङ्गार्द्रीकृतकमलनयनो धौतपङ्कजनयन इत्यर्थः। सरसि हंस्याः प्रवेशानन्तर मूर्मयश्चलन्ति कमलं च तैरार्द्रं भवति। स महेन्द्रस्तामाराान्निवेदयन्तीं प्रमदाम्। 'ओम्' स्वीकृतिवचनम्। 'ओं प्रश्नेऽङ्गीकृतौरोष' इतिविश्वः। इतीत्थं जगाद बभाषे। इन्द्रराज्यलक्ष्म्यासह विवाहं कर्तुमङ्गीचकारेत्यर्थः।

विबुध्य भावं तनयस्य भूपति-
निरीक्ष्य तां रूपगुणैर्मनोरमाम्।
वचो विवाहार्थमदात् स्वसूनवे
न केन कन्या सुगुणा हि गृह्यते॥३८॥

विबुध्येति। भूपति स्त्रिभुवन स्तनयस्य महेन्द्रस्य भावमाशयं विबुध्य विशेषेण बुध्वा तां च रूपगुणैर्मनोरमां सुन्दरीं निरीक्ष्य दृष्ट्वा स्वसूनवे निजसुताय विवाहार्थं परिणयाय वचो वचन मदात् ददौ। हि यतः सुगुणा कन्या केन न गृह्यत सर्वैरेव गृह्यत इत्यर्थः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः।

अथ हरिशमशेरोऽपीन्द्रपूर्वां मनोज्ञां
कुलवनतिमिराणां चन्द्रिकां 'राज्यलक्ष्मीम्'।
कुलविधिमनुसृत्य स्त्रीत्वधर्मेण दातु-
मशुभदिवसमैच्छद् 'राज' पुत्राय पुत्रीम् ॥३६॥

इतिश्रीभरतराजशास्त्रिकृतौ महेन्द्रोदये महाकाव्ये
राजाङ्के महेन्द्रविवाहप्रसङ्गो नाम द्वितीयः सर्गः ॥१॥

अथेति । अथ राजाभिप्रायज्ञानानन्तरम् । हरिशमशेरो जुद्धसूनुरपि मनोज्ञां सुन्दरीं कुलवनतिमिराणां वंशारण्यतमसां चन्द्रिकां ज्योत्स्नास्वरूपामिन्द्रपूर्वामिन्द्रेतिपदपूर्ववर्तिनीं राज्यलक्ष्मीं तदाख्यामिन्द्रराज्यलक्ष्मीनाम्नीमित्यर्थः । पुत्रीं तनयां राजपुत्राय नृपसूनवे त्रिभुवनात्मजायेत्यर्थः । महेन्द्रवीरविक्रमायेतियावत् । कुलविधिं वंशनियममनुसृत्याऽनुपाल्य । स्त्रीत्वधर्मेण पत्नीत्वधर्मेण दातुं सशुभ दिवसं मङ्गलदिनमैच्छदियेष । मङ्गलदिनप्रतीक्षां चकारेत्यर्थः । सर्गान्ताद्वृत्तभेदः । मालिनी वृत्तम् 'ननमयययुतेयं मालिनी भोगिलोकै' रितिलक्षणात् ।

इतिश्रीशङ्करशास्त्रिणा विरचिते महेन्द्रोदय-
काव्यव्याख्याने कुञ्चिकाख्ये द्वितीयः सर्गः ॥२॥

तृतीयः सर्गः

कुलद्वयैक्यस्य सुयोजनां च
राजत्वलब्धिं निजसन्ततौ च ।
रूपानुरूपं च वरं विलोक्य
पितुः सुपुत्री प्रशशंस कामम् ॥१॥

कुलेति । सुपुत्री सुतनयेन्द्रराज्यलक्ष्मीः । कुलद्वयैक्यस्य कुलयोर्वंशयोः साहराणावंशयो र्द्वयं कुलद्वयं तस्य यदैक्य मेकस्य भाव ऐक्य मेकता तस्य तथोक्तस्य सुयोजनां सुप्रबन्धं च निजसन्ततौ स्वापत्ये राजत्वलब्धिं नृपत्वप्राप्तिं च राजोत्तराधिकारत्वं चेत्यर्थः । वरं च रूपानुरूपमात्मसौन्दर्यानुकूलं विलोक्य पितुर्जनकस्य काम मिच्छां प्रशशंस प्रशंसां चकार । सर्गेऽस्मिन्नुपजाति वृत्तम् । ‘ अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातय स्ताः ’ इतिलक्षणात् ।

अथ प्रसन्ना स्तनभारखिन्ना ।
स्विन्ना नवप्रेरणयाऽजघन्या।
विश्वम्भराया युवतीषु गण्या
बभूव धन्या हरिचारुकन्या ॥२॥

अथेति । अथ विवाह वार्ता श्रवणानन्तरम् । प्रसन्ना हृष्टा स्तनभारखिन्ना स्तनभारेण कुचगौरवेण खिन्ना स्तनभारखिन्ना यौवनारूढेत्यर्थः । नवप्रेरणया नूतनप्रेरणया रतिक्रीडादिभावनयेत्यर्थः । स्विन्ना स्वेदयुक्ता । अजघन्या न जघन्याऽजघन्या श्रेष्ठा अतएव विश्वम्भराया धरित्र्याः । 'भू र्भूमिरचलानन्तारसा विश्वम्भरास्थिरे' त्यमरः । युवतीषु तरुणीषु गण्या गणनीया रूपगुणातिशयत्वात् । एतादृशी हरिचारुकन्या हरिशमशेरसुन्दरी-कुमारी धन्या भाग्यवती बभूव । राजपुत्रेण साकं विवाहस्य वार्ताया आरम्भादिति बोद्धव्यम् ।

प्रातः कदाचिद्धिमशैलशृङ्गं
समीक्ष्य सा तप्तसुवर्णवर्णम् ।
अमन्यताऽर्केण वरेण भूम्याः
सिन्दूरतः शोणितमुत्तमाङ्गम् ॥३॥

प्राव रिति। सेन्द्रराज्यलक्ष्मीः। कदाचित् प्रातः प्रभाते तप्तसुवर्णवर्णं तप्तस्याऽग्निदग्धस्य सुवर्णस्य कनकस्येव वर्णो यस्य तम्। हिमशैलशृङ्गं तुषाराचलशिखरम। समीक्ष्य दृष्ट्वा वरेण श्रेष्ठेन वा वरस्वरूपेणाऽर्केण सूर्येण भूम्याः पृथिव्याः उत्तमाङ्गं शिरः सिन्दूरतः सिन्दूरो रक्तचूर्णविशेषो विवाहप्रयोज्य चूर्ण विशेष इत्यर्थः, तत एव शोणित मरुणिन्नम् ' तारकादित्वा दितच्। इत्यमन्यत मेने।

तुषारबिन्दूनरुणेन शोणा-
नालोक्य दूर्वादलवर्तिनः सा।
व्यतर्कयत् स्रक्च्युतमौक्तिकं भू-
र्जयेन्नवोढाशयनं रुचेति ॥४॥

सा कुमारी। अरुणेन सूर्येण ' विकर्तनार्कमार्त्तण्डमिहिरारुण पूषण ' इत्यमरः। शोणान् रक्तीभूतान्। दूर्वादल वर्तिनो दूर्वापत्रस्थितान्। तुषारविन्दून् हिमकणान्। आलोक्य दृष्ट्वा। भूः पृथ्वी स्रक्च्युत मौक्तिकं स्रजो माल्याच्च्युतानि गलितानि मौक्तिकानि मुक्ता यत्र तत् तथोक्तम्। नवोढाशयनं नववधूशय्यां रुचा कान्त्या जयेदिति व्यतर्कयत् विशेषेण तर्कयामास।

अवेक्ष्य पूर्वां दिशमम्बुजाक्षी
प्रकामशोणामुदितार्कभाभिः ।
वध्वा मुखं स्याद्वरदर्शनेन
तथेति सा तर्कयतिस्म बाला ॥५॥

अवेक्ष्येति । अम्बुजाक्षी कमलनयना सा बाला । उदितार्कभाभिरुदयाचलनिर्गतसूर्यदीधितिभिः प्रकामशोणामतिरक्तां पूर्वां प्राचीं दिशंकाष्ठा मवेक्ष्य विलोक्य वरस्य भाविपतेर्दर्शनेनाऽऽलोकेन वध्वा विवाहोद्यतकुमार्या मुखं वदनं तथा तादृक् । अरुणमित्यर्थः । स्यात् लज्जयेति ज्ञेयम् । इति तर्कयतिस्म ।

तनौ युवत्याः प्रियसङ्गमेन
समेधते कान्तिरभीप्सितेन ।
इत्यब्जिनीं सूरकरप्रफुल्ला--
मनूढया वीक्ष्य तया व्यतर्कि ॥६॥

तनाविति । सूरकर प्रफुल्लां सूर्यकिरणविकचां 'सूरसूर्यार्यमादित्य द्वादशात्म दिवाकरा' इत्यमरः । अब्जिनीं कमलिनीं वीक्ष्य । अभीप्सितेनाऽभिलषितेन प्रियसङ्गमेन दयितस-

-मागमेन युवत्या स्तरुण्या स्तनौ शरीरे कान्तिर्लावण्यं समेधते
-वर्धत इत्यनूढयाऽविवाहितया तया बालया व्यतर्कि तर्कितम्।

स्वजीवनालम्बनदं प्रियस्य
गेहं प्रयान्तीमिव नूतनोढाम्।
प्रभातशीतानिलवीजितां सा
तरङ्गिणीं कामपि संददर्श ॥७॥

स्वेति। सा स्वजीवनालम्बनदं स्वजीवनस्य निजजलाय निजजीविकायै वा। "पयः कीलाल ममृतं जीवनं भुवनं वन मिति" 'आजीवो जीविका वार्ता वृत्ति र्वर्तन जीवने' इति चामरः। आलम्बनद माश्रयप्रदं प्रियस्य गेहं प्रति पतिभवनं प्रति वा सागरं प्रति "अभितः परितः" इत्यादिना द्वितीया। प्रयान्तीं गच्छन्तीं प्रभातशीतानिल वीजितां प्रभातशीतानिलै र्वीजिता ताम्। नूतनोढां नव वधूमिव कामपि तरङ्गिणीं नदीं संददर्श।

अथ क्रमेणोदयशैलमौलि-
विसारिधामाऽभ्रमणिं दधार।
ललाटिकालङ्करणेन युक्ता
विश्वम्भरा किं व्यरमैहत स्वम् ॥८॥

अथेति । अथ क्रमेण शनैः शनैः । उदयशैल मौलिः पूर्वाचलचूडा 'चूडा किरीटं केशाश्च संयता मौलयस्त्रय' इत्यमरः । विसारिधामाभ्रमणिं विसारि प्रसरणशीलं धाम रश्मि र्यस्य स विसारिधामा एतादृशो योऽभ्रमणि रम्बररत्नं विसारिधामा भ्रमणि स्तं तथोक्तम् । प्राभातिकसूर्यमित्यर्थः । दधार दधौ । विश्वम्भरा पृथिवी । ललाटिकालङ्करणेन ललाटिकैवाऽलङ्करणं तेन ललाटिका लङ्करणेन पत्रपाश्या भूषणेन 'मयूरव्यंसकादयश्चे' तिसमासः । 'पत्रपाश्याललाटिके' त्यमरः । युक्तो सती स्वं वरं पति मैहत चकमे । किमुत क्षायाम् ।

तत: सखीभिः सहसाऽऽप्लवाय
सा शीततोयं सहसा विवेश ।
नितम्बिनीनां धवलोरुभिश्च
धृतः क्षणं सुन्दररोमहर्षः ॥६॥

तत इति । ततः सूर्योदयानन्तरम् । सहसा हसेन सहवर्तत इति सहसा 'स्वन हसोर्वा' इति विकल्पादप्रत्ययः । 'अथो हसः हासो हास्यं' चेत्यमरः । साऽऽप्लवाय स्नानाय 'आप्लाव आप्लवः । स्नान' मित्यमरः । सखीभिरालीभिः सह । सहार्थेतृतीया । शीततोयं शीतलजलं सहसाऽकस्मात् । विवेश । नि-

तम्बिनीनां सुश्रोणीनां सुन्दरीणामित्यर्थः । धवलोरुभिर्गौरसक्थिभिः सुन्दररोमहर्षो मनोहर रोमाञ्चः । रोमाञ्चो रोमहर्षण' मित्यमरः । क्षणं कियत्कालपर्यन्तं धृतश्च ।

पुरः सलीले सलिले मनोज्ञा
बभ्राज रम्भालिरिवोरुराजिः ।
बभौ च तासामिव सेतुबन्धो
नितम्बलेखैकततिस्थितानाम् ॥१०॥

पुर इति । सलीलेलीलया क्रीडया सहितं तस्मिन । जले पयसि । एकततिस्थितानामेकपङ्क्तिस्थानां तासां स्त्रीणां मनोज्ञा रुचिरा । ऊरुराजिः सक्थिपङ्क्तीः । रम्भालिः कदलीपङ्क्तिरिव पुरोऽग्रे बभ्राज रराज नितम्बलेखाच श्रोणिपङ्क्तिरपि सेतुबन्ध आलिबन्ध इव 'सेतुरालौ स्त्रिया मित्यमरः । बभौ शुशुभे ।

रिरंसया निर्मलवारि हारि-
स्तनाग्रधि स्राग् विविशुः कुमार्यः ।
वक्षोजमम्बूर्मिकरान्तरे ता-
विलोक्य बिभ्युर्नवरोमहर्षाः ॥११॥

रिंसयेति। कुमार्योऽविवाहिता युवत्यः। निर्मलवारि विमलजले 'आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जल' मित्यमरः। रिंसयारन्तुमिच्छया हारिस्तनावधि हरतो युवमन इति हारिणौ वा हारो मुक्तादिहारो ययो स्तौ हारिणौ तौ च तौ स्तनौ पयोधरौ तावेवावधिः सीमा यथातथेतितथोक्तम्। स्राग् झटिति विविशुः प्राविशन्। ताः कुमार्योऽम्बूर्मिकरान्तरेऽम्बूर्मयो जलतरङ्गा एव करा भुजा स्तेषा मन्तरं तस्मिन् तथोक्तो। 'भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रिया' मित्यमरः। वक्षोजं पयोधरं विलोक्य नवरोमहर्षा नवारोमहर्षा यासांता नवरोमहर्षा नूतनरोमाञ्चाः सत्यः। बिभ्यु र्भीताः। कुमार्यः कुचस्पर्शाद्रोमाञ्चिता भीताश्चेति भावः।

तोयोद्गतं केशपतज्जलाक्तं
मुखं मृगाद्या निकटस्थितेन।
पयोमुचा शैलशिखातडागे
सुसिक्तमम्भोजमिव व्यभाद्धि ॥१२॥

तोयेति। तोयोद्गतं जलोत्थितमत एव केशपतज्जलाक्तं कुन्तलस्खलद म्बुव्याप्तं मृगाद्या हरिणनयनाया हरितनयाया इति बोद्धव्यम्। मुखं बदनमण्डलं निकटस्थितेन पयोमुचा जलदेन

शैलशिखातडागे पर्वतशिखरस्थसरोवरे सुसिक्त मम्भोजं पद्म मि-
व व्यभात् रराज हीति निश्चयत्वे । अत्र शैलशिखोपरिवर्तिमे-
घस्य मुखमण्डलोपरिवर्तिकेशस्य च मुखपद्मयोश्च साम्यम् । उप-
माालङ्कारः ।

चिरं सखीभिश्चलबाहुवल्ली
दधावियं केलिकलाप्रतिष्ठाम् ।
दृष्ट्वाऽथ मध्याह्नमणिं तमभ्र
समाययौ सद्मनि सुस्मितौष्ठा ॥१३॥

चिरमिति । चलबाहुवल्ली चले चपले जलक्रीड़या, बाहु
वल्ल्यौ भुजलते यस्याः सा तथोक्ता । इयं सखीभिः सह। केलि
कलाप्रतिष्ठां जलक्रीडाकौशलख्यातिं चिरं दधौ । चिरकालपर्यन्तं
जलक्रीड़ायां सखीभिः सह सकुशलं व्यस्ताभूदितिभावः ! अथाऽ
भ्रे गगने तं प्रसिद्धं मध्याह्नमणिं मध्याह्नार्कं दृष्ट्वा। सुस्मितौष्ठा
सती सद्मनि भवने समाययौ ।

अथ प्रसन्ना मृगशावचक्षु-
र्ययौ सखीभिः सह निष्कुटान्ते ।
समर्च्य गौरीमिह तां ययाचे
लज्जानतास्या वरमीप्सितं सा॥१४॥

अथ मध्याह्नानन्तरम्। प्रसन्ना मुदिता मृगशाव चक्षुर्हरिण शिशु नयना सुलोचनेत्यर्थः। सा हरिनन्दिनी। सखीभिः सह - निष्कुटान्त उद्यानान्ते। 'गृहारामास्तु निष्कुटा' इत्यमरः। ययौ। इह निष्कुटे गौरीं समर्च्य पूजयित्वा लज्जोनतास्या लज्जया स्वभाविकव्रीडया नतमास्यं वदनं यस्याः सा लज्जानतास्या सतीप्सितमिष्टं वरं ययाचे।

तथा प्रहर्षेण दिनानि लोला
सा कानिचिद् यापयतिस्म बाला।
तस्या विवाहाय नु जातु सन्ध्या
सिन्दूरवर्षं विदधे नभोऽन्ते ॥१५॥

तथेति। प्रहर्षेणाऽऽनन्दातिरेकेण लोला चपला सा बाला कानिचिद्दिनानि तथा तेन प्रकारेण यापयतिस्म व्यतीयाय। जातु कदाचित्। सन्ध्या सायंकालः। तस्या विवाहाय परिणयोत्सवाय नभोऽन्ते गगनैकभागे। सिन्दूरवर्षं विदधे न्वितितर्कें। तद्विवाह-समयः समागत इति तात्पर्यम्।

क्षणं स्ववासादरुणा वरेण
वध्वा च सायंसुषमा व्यलोकि।
तद्द्वन्द्वदर्शेन नवानुरागा
सन्ध्याऽपि तस्थौ चिरमद्रिशृङ्गे ॥१६॥

क्षणमिति । वरेण महेन्द्रेण वध्वा चेन्द्रराज्यलक्ष्म्याऽनुरक्ता सायंसुषमा सन्ध्यासौन्दर्यं स्ववासान्निजभवनात् क्षणं यथातथा व्यलोकि विलोकिता " पृथक्स्थितौ भूषणभूषिताङ्गा" विति श्लोके (२६) पृथक् स्थिताविति पदोपादानात् तौ वधूवरौ मिथः पृथक् स्थानादेव सान्ध्यद्युतिं ददृशतु रित्यवगम्यते । तद्द्वन्द्व दर्शने तयोर्वधूवरयो र्द्वन्द्वं मिथुनं तस्य दर्श आलोकस्तेन हेत्वर्थेतृतीया । नवानुरागा नवो नूतनोऽनुरागः प्रणयो यस्याः सा सन्ध्याऽपि सायङ्कालोऽपि अद्रि शृङ्गे गिरिशिखरे पश्चिमाचलकूट इत्यर्थः । चिरं तस्थौ स्थितवती तन्मिथुनदर्शनजातानुरागादित्यर्थः। तद्द्वन्द्व दर्शने नवानुरागे' ति पदानामद्रिशृङ्गे सन्ध्याया श्चिरकालस्थितेः कारणत्वेनोपादानात् काव्य लिङ्ग मलङ्कारः । लक्षणं यथा साहित्य दर्पणे-हेतोर्वाक्य पदार्थत्वे काव्यलिङ्गमुदाहृतम् ।

द शभिः श्लोकैः सन्ध्यावर्णनेन साकं वधूवरालङ्करण धारणवर्णनं कुरुते-

अस्तोदयक्ष्माधरयोर्दधाना
सन्ध्येव सूर्येन्दुविभूषणे सा ।
बभ्राज कर्णद्वयकुण्डलाभ्यां
तथा वरस्याऽपि तनूश्चकाशे॥१७॥

अस्तेति। सा वधूः । कर्तृपदमेतत्। अस्तोदयक्ष्माधरयोरस्तश्चोदयश्चास्तोदयौ तावेव यौ क्ष्माधरौ तयोरस्तोदयक्ष्माधरयोश्चरमोदयशैलयोः । 'अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वत' इत्यमरः। सूर्येन्दुविभूषणे सूर्यश्चेन्दुश्चसूर्येन्दू तावेव विभूषणे ते सूर्येन्दु विभूषणे भानु चन्द्रालङ्कारौ दधाना विभ्राणा। अस्ते सूर्यमुदये चन्द्रं दधानेत्यर्थः। सन्ध्या सायमिव कर्णद्वयकुण्डलाभ्यां कर्णयोर्द्वयंकर्णद्वयं तस्मिन् ये कुण्डले ताभ्यां कर्णद्वयकुण्डलाभ्यां श्रवणद्वयालङ्काराभ्याम्। 'कुण्डलं कर्णवेष्टन' मित्यमरः। हेत्वर्थे तृतीया। बभ्राजरराज। अत्र सूर्येन्द्वोः कुण्डलद्वयेन सादृश्यम्। वरस्य तनूः शरीर मपि तथा तेन प्रकारेण कर्णाभरणधारणेन पूर्वोक्ता सन्ध्येवेत्यर्थः। चकाशे शुशुभे। बधूवरौ कर्णाभरणधारणं चक्रतु रितिभावः। अत्र सूर्योऽस्ताचलंगत इन्दुरुदयाचलं प्राप्त इत्युपमानभूतायाः सन्ध्याया अपि वर्णनम्। अत्रोपमाऽलङ्कारः।

वधूर्दधौ द्यौरिव तारकाः सा
भ्राजिष्णुरत्नान्यथ केशपाशे।
वरोऽपि चूडामणिमुत्तमाङ्गे
दधार पूर्वाद्रिरिवेन्दुबिम्बम्॥१८॥

वधूरिति। अथ कर्णालङ्कारधारणानन्तरम्। सावधूः कर्तृपदमेतत्। द्यौराकाशः। "द्योदिवौ द्वे स्त्रियामभ्र' मित्यमरः। तारका नक्षत्राणीव भ्राजिष्णुरत्नानि रोचिष्णुरत्नानि 'विभ्राड् भ्राजिष्णु रोचिष्णू' इत्यमरः। केशपाशे कचनिचये दधौ धारयामास। वधूः केशे रत्नानि दधारेति भावः। वरोऽपि पूर्वाद्रिं रुदयाचल इन्दुबिम्बं चन्द्रमण्डलं 'बिम्बोऽस्त्रीमण्डलं त्रिषु' इत्यमरः। इव यथा। चूड़ामणिंशिरोरत्नं 'चूडामणिः शिरोरत्न' मित्यमरः। उत्तमाङ्गे शिरसि दधार दधौ। वरः शिरसि चूडामणिं दधारेतिभावः। गगने नक्षत्राण्याविरासन्नुदयाद्रौचन्द्रश्चोदियायेति सन्ध्यावर्णनम्। अत्र पूर्वोत्तरार्धयो रुपमालङ्कारौ।

सबालपाश्योडुगणस्य वीथ्याः
सीमन्तरेखाऽऽप रुचं सुकेश्याः।
भद्रश्रियोर्ध्वीकृतरेखमिन्दोः
करश्रियं प्राप वरस्य भालम् ॥१६॥

सबाल पाश्येति। सुकेश्याः शोभनाः केशाः कचा यस्यास्तस्याः। "स्वाङ्गाच्चोपसर्जनादसंयोगोपधा' दित्यनेनङीप्। सबालपाश्या बालपाश्यया सहिता सबाल पाश्या सपारितथ्या, शिरोभूषणालङ्कृतेत्यर्थः। 'बालपाश्या पारितथ्ये' त्यमरः।

सीमन्तरेखा केशवेशलेखा। उडुगणस्योडूनां गणस्तस्य नक्षत्रसमूहस्य 'नक्षत्रमृक्षं भं तारा तारकाप्युडुवास्त्रियां' मित्यमरः। वीथ्याः पङ्क्तेर्नक्षत्रपङ्क्तेरित्यर्थः। रुचं शोभामाप लेभे। सुकेश्याः सालङ्कारस्य सीमन्तस्य शोभा नक्षत्रपङ्क्तेः शोभेवाऽऽसीदितिभावः। वरस्य भद्रश्रिया चन्दनेन 'गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियां' मित्यमरः। ऊर्ध्वीकृतरेखमूर्ध्वीकृता ऊर्ध्वं प्रसृता भ्रूभ्यां शीर्षान्तं विस्तृता इत्यर्थः, रेखा यस्मिन् तत् तथोक्तम्। भालं गोधिः। इन्दोश्चन्द्रमसः करश्रियं किरणशोभा मुदयाचलात् गगनं प्रसृतां किरणशोभा मित्यर्थः। प्राप लेभे। चन्दनालङ्कृतवरभालश्रीश्चन्द्रकिरणश्रीरिवासीदित्यर्थः गगने नक्षत्रपङ्क्तिश्चन्द्रकिरणशोभा चास्तामिति सन्ध्यावर्णनम्।

घ्राणस्य तस्याः प्रियभूषणस्य
भासा कपोलस्य तटो व्यचुम्बि।
वरेण वा तारकिताम्बरेण
नाऽऽसादि नासाधृतहीरकश्रीः ॥२०॥

घ्राणस्येति। तस्या हिमसुतायाः घ्राणस्य नासायाः प्रियभूषणस्याऽभीष्टालङ्कारस्य भासा कान्त्या कपोलस्यैकगण्डस्थलस्य तट उपान्तो व्यचुम्बि विशेषेण चुम्बितः स्पृष्ट इत्यर्थः।

चया घ्राणालङ्कारो दध्र इतिभावः। वरेण श्रेष्ठेन तारकिताम्बरेण नक्षत्रपूर्णाकाशेन तारकादित्यादितच्। तारकिताम्बरेण तारकितानि विचित्राण्यम्बराणि वस्त्राणि यस्य तेन तथाक्तेन। "अम्बरं व्योम्नि वाससो'त्यमरः। नासाधृतहीरकश्रीर्घ्राणगृहीतरत्न कान्तिर्नासादिऽऽ न प्राप्ता। वध्वा इव शृङ्गारो वरस्य सन्ध्याया वा नासीदितिभावः।

नक्षत्रमाला गगनेऽथ वध्वा
गले च रेजे युगपन्मनोज्ञा।
स कैरवाणां विकसद्दलानां
शशीव हारी च वरो बभूव ॥२१॥

नक्षत्रेति। अथ घ्राणालङ्कारधारणानन्तरम्। मनोज्ञा रुचिरा नक्षत्रमाला नक्षत्राणि मालेव तारापङ्क्ति र्वा नक्षत्राणी च माला नक्षत्रमालाऽथवा सप्तविंशतिमौक्तिकयुक्तामाला "नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकै' रित्यमरः। गगने वध्वा गले च युगपदेकवारमेव। रेजे शुशुभे। वधूर्नक्षत्रमालां दधार। सन्ध्याऽपि नक्षत्रपङ्क्तिं दधावितिभावः। स वरः श्रेष्ठो विकसद्दलानां विकसितपत्राणां कैरवाणां कुमुदानां शशीव चन्द्रइव हारी मनोहारी हारवान् च बभूव। वरः कुमुदमालां दधारेत्यर्थः। गगने नक्षत्रपङ्क्तिरासीत् प्रफुल्लकुमुदानां मनोहारीचन्द्रश्चाऽऽसादिति सन्ध्यावर्णनम्।

दधौ क्वणत्काञ्चनकङ्कणे सा
हेमाङ्गदे सोऽपि दधारबाह्वोः ।
तयोर्विवाहं सशुभं विधातु-
मिवाऽभवन्मण्डलमैन्दवं खे ॥२२॥

दधाविति । सा वधूः क्वणत्काञ्चनकङ्कणे शब्दायमान हेमकरभूषणे दधौ । 'कङ्कणंकरभूषण' मित्यमरः । सोऽपिवरोऽपि बाह्वोर्भुजयोर्हेमाङ्गदे सुवर्णकेयूरे 'केयूरमङ्गदं तुल्य' मित्यमरः । दधार । खे गगने नभोन्तरिक्षं गगन मनन्तं सुरवर्त्म ख' मित्यमरः । ऐन्दवंचान्द्रं मण्डलंबिम्बं तयोर्वधूवरयोर्विवाहं पाणिपीडनं सशुभं समङ्गलं विधातुं कर्तुमिवाऽभवत् । आकाशोऽपि वधूवरधृतभूषणाकारं बिम्बं दधाविति सन्ध्यायाश्च वर्णनम् ।

याः सान्ध्यरागच्छुरिताः स्वभाभि-
र्भीर्विजिग्युः सलिलोर्मिकाणाम् ।
रेजुस्तयोर्मौक्तिकरक्तदीप्त्य-
एऽयाङ्गुलीः काञ्चनमुद्रिकास्ताः ॥३२॥

याइति । याअङ्गुलिमुद्राः स्वभाभिर्निजकान्तिभिः सलिलोर्मिकाणां जलतरङ्गाणां सान्ध्यरागच्छुरिताः सान्ध्यरागेण-

सायङ्कालिकवर्णेन रक्तवर्णेनेत्यर्थः, छुरिता मिश्रितास्तास्तथोक्ताः भ्रमीरावर्तान्। विजिग्युर्विशेषेणाऽजयन् । सायङ्कालिकरक्तवर्ण मिश्रितजलावर्ताधिकसौन्दर्यं दधुरितिभावः। मौक्तिकरक्तदीप्त्यो मौक्तिकेन मुक्तया रक्तालिप्तादीप्तिः कान्तिर्यासां ता स्तथोक्ताः 'मौक्तिकंमुक्त' त्यमरः। ता यच्छब्दनिर्दिष्टाः काञ्चनमुद्रिकाः सुवर्णाङ्गुलीयकानि। 'कर्तृ' तयोर्वधूवरयो रङ्गुलीः करशाखाः। अङ्गुल्यःकरशाखाः स्यु' रित्यमरः। एत्य प्राप्यरेजुः शुशुभिरे। जलावर्ता रक्ता इतिसन्ध्यावर्णनम्।

वधूवरौ तौ दधतुः सरत्न-

काञ्चीकलापं मणिशृङ्खलं च।

नक्षत्रपुष्पोपचिताभ्रगङ्गां

ततो नभः सारसनं चकार ॥२४॥

वधिवति। तौ पूर्वोक्तौ वधूवरौ। 'अभ्यर्हितं चे' त्यनेन-वधूशब्दस्य पूर्वप्रयोगः। सरत्नकाञ्चीकलापं रत्नैर्हीरकैः सहिता सरत्नंताद्दशी या काञ्ची मेखला सैवकलापो भूषणं तं तथोक्तम्। स्त्रीकट्यां मेखलाकाञ्ची सप्तकी रशना तथा 'कलापो भूषणेव-र्हेतूणीरे संहतावपी'। ति चोभयत्रामरः। मणिशृङ्खलं मणिमयशृ-ङ्खलं च 'पुंस्कट्यां शृङ्खलंत्रिष्विव त्यमरः। वधू रत्नकाञ्चीं वरोम-

शृणिङ्कल मित्यर्थः। दधतुः। ततस्तस्मात्कारणात्। वधूवरभूषण धारणाद्धेतोरित्यर्थः। नभो गगनं नक्षत्रपुष्पोपचिताभ्रगङ्गां नक्षत्राण्येव पुष्पाणि तै रुपचिता याऽभ्रगङ्गा तां नक्षत्रपुष्पोपचिताभ्रगङ्गां ताराकुसुमव्याप्ताकाशगङ्गां सारसनं रशनां चकार। द्यौरपि वधूवरधृतभूषणसदृशं भूषणं दधारेत्यर्थः 'क्लीवे सारसनं चार्थे' त्यमरः। आकाशगङ्गा नभस्यदृश्यते ति सन्ध्यावर्णनम्।

सा हंसकानां निनदैर्निनादं
हंसस्रजां सायमहो जिगाय।
शशीव पादेन सरोजशोभां
स श्लाघयामास वरो ऽपि सद्यः ॥२५॥

सेति। सावधूः सायं सन्ध्यायाम्। हंसकानां पादकटकानां 'हंसकः पादकटक' इत्यमरः। निनदै रवैर्हंसस्रजां मरालमालानां मरालश्रेणीनामित्यर्थः। निनादं शब्दं जिगायाऽहो आश्चर्यम्। नूपुरशब्दाहंसपङ्क्तिशब्दाधिका अभवन्नित्यर्थः। वधूर्नूपुरान्दधाविति भावः। हंसपङ्क्तिरदृश्यतेतिसन्ध्यावर्णनम्। सद्यस्तत्क्षणे स वरोऽपि शशीव चन्द्रइव पादेन किरणेन वा चरणेन 'पादारश्म्यङ्घ्रितुर्यांशा' इत्यमरः। सरोजशोभांपङ्कज-

लक्ष्मीं म्लापयामास मलिनीचकार। कमलशोभाधिका वरपाद-शोभाऽऽसीदितिभावः। चन्द्रकिरणेन कमलं मुकुलितमिति सन्ध्यावर्णनम्।

पृथक्स्थितौ भूषणभूषिताङ्गौ
वधूवरावद्य विलोक्य सन्ध्या।
जगाम तौ काम्यसमागमेन
विचिन्त्य हृष्टौ भवतामितीव ॥२६॥

पृथगिति। सन्ध्या सायंकालः। अद्य विवाहदिने। पृथक्स्थितौ विभिन्नस्थलस्थौ भूषण भूषिताङ्गौ मण्डनालङ्कृताव-यवौ। वधूवरौ विलोक्य "तौ वधूवरौ काम्यसमागमेनाऽभीष्ट-सङ्गेन हृष्टौप्रसन्नौ भवता' मिति विचिन्त्य वितर्क्यैव जगाम ययौ। वरस्य वस्त्रच्छत्रधारणमाह—

सितांशुकैर्नैव महेन्द्रकीर्त्या
महेन्द्रमूर्तिः समलङ्कृताऽभूत्।
तस्याऽऽतपत्रं न पवित्रमात्रं
छत्रं पवित्रस्य जिगाय जत्रम् ॥२७॥

सितेति। महेन्द्रमूर्तिर्महेन्द्रवीरविक्रमतनूः सितांशुकैः श्वेताम्बरैर्नैव, अपितु महेन्द्रकीर्त्या महेन्द्रस्य महेन्द्रवीरविक्रमस्य वा महेन्द्रस्येवेन्द्रस्येवकीर्तिर्यशस्तया तथोक्तया। समलङ्कृता सुमण्डिताऽभूत्। श्वेतवस्त्रवेष्टिता महेन्द्रतनूर्महेन्द्रकीर्तिवेष्टिताऽभूदित्याशयः। तस्यातपत्रमातपात्त्रायत इत्यातपत्रं छत्रं 'सुपि' इतियोगविभात् कः। सायङ्कालत्वेनाऽऽतपाभावेऽप्यातपत्रस्य धारणकारणं केवलं वैवाहिकीरीतिरेवेतिबोद्धव्यम्। न पवित्रमात्रं न केवलं पूतम्। 'पूतं पवित्रमेध्यं चे' त्यमरः। अपितु पवित्रस्य पविं वज्रं त्रायत इति पवित्रस्तस्येन्द्रस्येत्यर्थः। ह्लादिनीवज्रमस्त्रीस्यात्कुलिशं भिदुरं पवि' रित्यमरः। जेत्रेव जैत्रं तत् तथोक्तम्। जयशील मित्यर्थः। तृन्नतात्प्रज्ञादित्वादण्प्रत्ययः। छत्रमातपत्रम 'छत्रं त्वातपत्र' मित्यमरः। जिगायश्रियाकीर्त्या चेत्यूह्यम्। अथवा जैत्रं तदापत्रं न केवलं पवित्र मपितु पवित्रस्य कुशस्य छत्रं कुशनिर्मितं छत्र मित्यर्थः। अतिशयपवित्रञ्छत्र मिति यावत्। कुशस्यप्रयतपदार्थेषु गणनात्। जिगाय। कुशनिर्मितच्छत्राधिकपवित्रमभूदितिभावः। 'अस्त्रीकुशं कुथो दर्भः पवित्र' मित्यमरः।

चामरवीजनमाह—

मृणालसूत्राधिकनिर्मलस्य
संवीजनाच्चामरयोर्युगस्य।
यशोऽब्धिधाराद्वयमस्यदृष्टं
जनेन भूस्वर्गविसारि नूनम्॥२८॥

मृणालेति । मृणालसूत्राधिक निर्मलस्य मृणालसूत्रात् वि-सतन्तोर्यदधिकमत्यर्थं निर्मलं विशदंतस्य तथोक्तस्य । चामरयोः प्रकीर्णकयोर्युगस्य युग्मस्य चामरयो रित्यर्थः 'चामरं तु प्रकीर्णक' मित्यमरः । संवीजनात् सम्यक्चालनात् । हेतोः पञ्चमी । जनेन जातावेक वचनम् । मनुष्यै रित्यर्थः । अस्य भूस्वर्गविसारि भूव्यो-मप्रसरणशीलं यशोऽब्धिधाराद्वयं कीर्त्यम्बुधिप्रवाहद्वयं दृष्टं नून मित्युत्प्रेक्षायाम् ।

वध्वाःशृङ्गारमाह—

विचित्रपुष्पाञ्चितकान्तकेशा
सकज्जला लक्तकलोहिताङ्घ्रिः ।
सा चीनशाटीमरुणां दधाना
रेजे वधूर्मन्मथनूतनास्त्रम् ॥२६॥

विचित्रेति । विचित्रपुष्पाञ्चितकान्तकेशा विचित्रैर्विविधैः पुष्पैः कुसुमै रञ्चिताः कान्ताः सुन्दराः केशा यस्यास्तथोक्ता । सकज्जला साञ्जना । अलक्तकलोहिताङ्घ्रिर्जतुरोहितचरणा "लाक्षाराक्षाजतुक्लीवे यावोऽलक्तो द्रुमामय" इत्यमरः । 'लोहितो रोहितोरक्त' इत्यप्यमरः । अरुणां रक्तां चीनशाटीं चीनदेशागत-शाटी मतिमसृणशाटी मित्यर्थः । दधाना बिभ्राणाऽतएव मन्मथ

नूतनास्त्रं कामनवायुधं पुष्पातिरिक्तास्त्रभूतेत्यर्थः। सावधू रेजे शुशुभे।

मृदङ्गढक्कासुषिरानकानां
भेरीघनानां च रुतैर्मनोज्ञैः।
बभूव भिन्ना गिरिमौनमुद्रा।
कौमार्यभावोऽपि बिभाय वध्वाः॥३०॥

मृदङ्गेति। मृदङ्गढक्कासुषिरानकानां मृदङ्गाश्च मुरजाश्च ढक्काश्च यशःपटहाश्च सुषिराणि च वंशादिकानिचाऽऽनकाश्च-पटहाश्च तेषां तथोक्तानाम्। 'मृदङ्गा मुरजाः' 'स्याद्यशः पटहो ढक्का' 'वंशादिकं तु सुषिरम्' 'आनकः पटह' इतिसर्वत्रामरः। भेरीघनानां भेर्यश्च दुन्दुभयश्च घनानि च कांस्यतालादिकानि च तेषां तथोक्तानाम्। 'भेरी स्त्री दुन्दुभिः पुमान्' कांस्यतालादिकंघन मिति' चोभयत्रामरः। मनोज्ञैः सुन्दरैरुतैः शब्दैर्गिरिमौनमुद्रा शैलमौन परिपाटी। उपत्यकायाः समन्तात् गिरीणांस्थितेस्तदुल्लेखः। भिन्नाभेदिता बभूव। गिरयो गुञ्जिता इत्यर्थः। वध्वाः कौमार्यभावोऽप्यविवाहितावस्थाविवेकोऽपि-बिभाय भीतो बभूव। कौमार्यभावो निजान्त्यसमयः समागत इति बिभायेत्यर्थः।

सिन्दूरपूरैर्विलसन्मुखश्री-
रुदीयमानारुणसूरशोभः ।
स्रजञ्चितं वाहिजनांससंस्थं
स याप्ययानं वर आरुरोह ॥३१॥

सिन्दूरेति। सिन्दूरपूरैः सिन्दूराख्यरक्तचूर्णविशेषसमूहै र्विलसन्मुखश्री विलसन्ती मुखश्रीर्यस्य स विलसन्मुखश्रीर्विकसद्वदनशोभः उदीयमानारुणसूरशोभ उदीयमानोऽरुणो यः सूरः स्तस्येव शोभा यस्य स उदीयमानारुण सूरशोभ उदितरक्तार्ककान्तिः । म वरः । स्रजञ्चितं माल्यपूजितं वाहिजनांससंस्थं वाहिनश्चते जना वाहिजना स्तेषा मंसेषु सम्यक् स्थितं वाहिजनांस संस्थं वाहकजनस्कन्धनिहितम् । स्कन्धो भुजशिरोंऽसोऽस्त्री ' त्यमरः । याप्ययानं शिविकाम् ' शिविका याप्ययानं स्या" दित्यमरः । आरुरोह

पुरस्कृता मङ्गलवैजयन्त्य-
स्ततोऽम्बुकुम्भास्तरुणीस्तनस्थाः ।
सचामराभी रमणीभिरेष
नीतो वृतो द्राग्छिविकाधिरूढः ॥३२॥

पुरस्कृता इति । मङ्गलवैजयन्त्यो मङ्गलपताकाः पुरस्कृता अग्रे कृताः ततस्तत्पश्चात् । तरुणीस्तनस्था युवतिकुचस्थिताः । अम्बुकुम्भा जलघटाः नीता इतिशेषः । शिविकाधिरूढो याप्य-यानाधिरूढ एष वरः सचामराभिः सप्रकीर्णकोभी रमणीभि रङ्गनाभि र्वृतो व्याप्तः सन् । द्राक् झटिति नीतः ।

ज्वलत्कृशानुं द्विजमन्त्रपूतां
रम्यामुपागत्य विवाहवेदीम् ।
क्षणात् क्वणत्कङ्कणकिङ्किणीं तां
वधूमुपेतां स ददर्श तत्र ॥३३॥

ज्वलदिति । स वरोज्वलत्कृशानु मुद्दीप्तानलाम् । द्विज मन्त्रपूतां ब्राह्मणवेदवाक्यपवित्रां रम्यां सुन्दरीं विवाहवेदीं विवाहार्थं परिस्कृतांभूमिम् । उपागत्योपेत्य । क्षणादचिरेण । क्वणत्कङ्कण किङ्किणीं क्वणन्त्योरणन्त्यः कङ्कणाश्च करभूषणानि च किङ्किण्यश्च क्षुद्रघण्टिकाश्च यस्याः सा तां तथोक्ताम् । 'कङ्कणं कर भूषण' मिति ' किङ्किणी क्षुद्र घण्टिका ' इति चामरः । तां पूर्वोक्तां तत्र वेद्यामुपेता मागतां वधूं ददर्श ।

दशभिः श्लोकै र्विधिपूर्वकं विवाहं वर्णयति—

आरम्भकार्याणि समाप्य वध्वा
वरः पितृभ्यामिह पूजितः सः।
क्रमेण वंशद्वयरञ्जनीष्टा
कन्याप्रदानस्य बभूव वेला ॥३४॥

आरम्भेति । इह विवाहवेद्याम् । वध्वाः । पितृभ्यां मात्रा पित्रा च 'पिता मात्रे' त्यनेनैकशेषः । आरम्भकार्याणि प्राक्कर्माणि वाग्दानादिकर्माणीत्यर्थः समाप्य समाप्तानि कृत्वा स वरः पूजितोऽर्चितः । क्रमेण शनैः । वंशद्वयरञ्जनी वधूवरकुलप्रसादिका । इष्टा काङ्क्षिता कन्याप्रदानस्य वेला समयो बभूव । 'वेला कालमर्यादयोरपी' त्यमरः ।

नेदुर्जना दुन्दुभिकान् समन्तात्
सद्बान्धवा आययुरत्र वध्वाः ।
विचित्रवस्त्राभरणा युवत्यः
सिन्दूरपुष्पाण्यकिरन् स्वहस्तैः ॥३५॥

नेदुरिति । जना वाद्यविशेषज्ञाः । दुन्दुभिकान् भेरीः 'भेरीस्त्रीदुन्दुभिः पुमा' नित्यमरः । समन्तात् सर्वत्र नेदुः । अत्र

विवाह वेद्याम् । वध्वाः सद्बान्धवाः सुज्ञातय आययुः । विचित्र-वस्त्राभरणा विचित्राम्बरभूषणा युवत्य स्तरुण्यः स्वहस्तैर्निजभुजैः सिन्दूर पुष्पाणि । अकिरन् ।

एकासनस्थौ नयनाभिरामौ
वधूवरौ व्रीडितलोचनौ तौ ।
समर्च्य वध्वाः पितरौ सहर्षौ
कुमारिकाङ्गुष्ठमथाददाते ॥३६॥

एकासनेति । अथानन्तरम् । वध्वाः सहर्षौ पितरौ माता च पिता च पितरौ । 'पिता मात्रे' त्येकशेषः । कर्तृपदमेतत् । एकासनस्था वेकपीठस्थितौ नयनाभिरामौ लोचनसुन्दरौ । व्रीडितलोचनौ लज्जितनयनौ तौ सहर्षौ वधूवरौ । कर्म । समर्च्य संपूज्य कुमारिकाङ्गुष्ठं वध्वङ्गुली माददाते गृहीतवन्तौ ।

पुरोहितानां वचनाज्जनन्या
दध्रे स्वहस्ते कनकोदकुम्भः ॥
तत्तोयधारार्द्र वधूकराब्जं
वरस्य पाणौ^विदधे च पित्रा ॥३७॥

A(वैशाख १९९७ वि० सं०)

पुरोहितानामिति। जनन्या मात्रा पुरोहितानां पुरोधसां वचनादाज्ञायाः स्वहस्ते कनकोदकुम्भः सुवर्णजलकलशो दध्रे धृतः। पित्रा च तत्तोयधारार्द्रवधूकराब्जं तत्कलशजलधारा क्लिन्नवधूकरकमलं वरस्य पाणौ करतले विदध्रे कृतम्। वराय वधूर्दत्तेत्यर्थः।

वाक्यै र्द्विजानां वचनैः श्रुतीनां
दानेन पित्रोर्निजभावनैश्च।
कुलद्वयस्योद्धरणाय साऽद्य
जाया महेन्द्रस्य वधूर्बभूव ॥३८॥

वाक्यैरिति। सा वधूः। अद्य विवाहदिने। कुलद्वयस्य पतिपितृ वंशद्वयस्योद्धरणायोद्धाराय न तु कामाय। द्विजानां ब्राह्मणानां वाक्यैर्वचनैः। श्रुतीनां वेदानां वचनैः। पित्रोर्मातृजनकयोर्दानेन। निजभावनै श्चात्मविचारै रपि महेन्द्रस्य जाया भार्या बभूव। जायापदसामर्थ्यात् पुत्रजननयोग्यत्वमनुसन्धेयम्। यथाह श्रुतिः– 'पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम्। तस्यां पुनर्नवो भूत्वा दशमे मासि जायते"। "तज्जाया जाया भवति यदस्यां जायते पुनः' इति मनुश्च। अत्र कामव्यपोहाय कुलद्वयस्येत्युक्तमिति आर्थपरिसंख्यालङ्कारः। लक्षणं यथा—

"प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत्।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा" इति।

सौभाग्यहारोऽथ वरेण पत्या
पत्न्याः सुकण्ठे विदधेऽरुणाभः।
तयाऽपि रोमाञ्चितयाऽऽशु पौष्पी
स्रग्धारिता तस्य गलप्रदेशे ॥३९॥

सौभाग्येति। अथ कन्यादानानन्तरम्। वरेण श्रेष्ठेन वरस्वरूपेण वा पत्या भर्त्रा पत्न्योजायाया वध्वा इत्यर्थः। सुकण्ठे सुगलेऽरुणाभोऽरुणारक्ताऽऽभा दीप्ति र्यस्यस्तथोक्तः। सौभाग्यहारः सौभाग्यमाला। ('पोते' इति भाषायाम्) विदधे विहितः। रोमाञ्चितया सञ्जातरोमहर्षया तया जाययाऽपि तस्य वरस्य पत्युरित्यर्थः। गलप्रदेशे कण्ठ स्थाने पौष्पी पुष्पस्येयं पौष्पी कौसुमी। स्रग् मालाऽऽशु शीघ्रं यथा तथा। धारिता।

अव्यक्तवाचा मनसोस्तयोस्ते
उभे स्रजौ भावमवोचतां नु।
कथं भवेतां नवरोमहर्षौ
तावन्यथाऽचेतनसङ्गमेन ॥४०॥

अव्यक्तेति । ते पूर्वोक्ते उभे द्वे स्रजौ माल्ये तयो र्व-
धूवरयो र्मनसोश्चेतसोर्भावमाशयमव्यक्तवाचाऽप्रकटितवचने
नाऽवोचतामवदताम् । नूत्प्रेक्षायाम् । कविः स्वोत्प्रेक्षां प्रमा-
णीकरोति- अन्यथा नोक्तचेत् तौ वधूवरौ । अचेतन सङ्गमेन जड
सम्पर्केण । कथम् । नवरोमहर्षौ नूतनरोमाञ्चितौ । भवेताम् ।
जडसम्पर्केण सरोमाञ्चौ न भवेतामित्यर्थः ।

वेदीं परिक्रम्य विवाहवह्नौ
वरानुगा सा विससर्ज लाजान् ।
धूमेन तस्या नयनाञ्जनं तु
प्रासारि सास्रं हि कपोलदेशे ॥४१॥

वेदीमिति । वरानुगाऽनुगच्छतीत्यनुगो वरोऽनुगो यस्याः
सा वरानुगाऽनुसृतवरा । सा वधूः । वेदीं परिस्कृतभूमिं परिक्र-
म्य परिक्रमणं कृत्वा विवाहवह्नौ । लाजान् 'लाजापुंभूम्नी'
त्यमरः । विससर्ज । लाजानां हवनंचक्र इत्यर्थः । तु किन्तु । धूमेन
धूम्रेण लाजानां हवनानन्तर मुत्थितेन धूमेनेत्यर्थः । सास्रं सवाष्पं
नयनाञ्जनं लोचनकज्जलं तस्या वध्वाः कपोलदेशे गण्डस्थले प्रा-
सारि प्रसारितम् । हीति निश्चयार्थे ।

समर्चितावद्य विवाहवेद्यां
श्रीशाविव द्वौ खलु रेजतुस्तौ।
अर्धाङ्गिनी साऽत्र वरं वरस्य
जग्राह वामं रुचिरासनं च ॥४२॥

समर्चिताविति। अद्य विवाहदिने। विवाहवेद्यां समर्चितौ पूजितौ तौ द्वौ वधूवरौ श्रीशौ लक्ष्मीनारायणाविव रेजतुः शुशुभाते। अत्र वेद्याम्। अर्धाङ्गिनी गृहीतवरार्धशरीरा सा वधूः। वरस्य पत्युर्वरं श्रेष्ठं वाममपसव्यम् 'वामं शरीरे सव्यं स्यात्' इत्यमरः। रुचिरासनं सुन्दरविष्टरं च जग्राह गृहीतवती। वामासन उवासेत्यर्थः। पूर्वार्धे वकार दकार यकाराणां वारंवार प्रयोगेण वृत्यनुप्रासोऽलङ्कारः। श्रीशाविवेत्यत्रोपमालङ्कारश्च।

लज्जावती सा विनताननाऽपि
दृष्टाक्षिपच्चारुमुखे वरस्य।
का वोपलब्धेऽवसरे हियं स्त्री
न मुञ्चति द्राग्घृदयस्य तुष्ट्यै ॥४३॥

लज्जावतीति। लज्जावती ह्रीमती। अतएव विनता नता

नत मुख्यपी सा वधूः। वरस्य चारुमुखे रुचिरवदने दधि। अक्षिपदकिरत्। वाऽथवा का स्त्री का नारी। अवसरे समय उपलब्ध प्राप्ते सति। भावे सप्तमी। हृदयस्य स्वान्तस्य तुष्ट्यै सन्तोषाय ह्रियं लज्जां स्राक् झटिति। न मुञ्चति न त्यजति। त्यजत्येव। अत्राऽर्थान्तरन्यासोऽलङ्कारः।

द्विजै र्निशान्ते विधिपूर्वकं हि
समापितं पाणिनिपीडनं तत्।
सुदायमादाय ततः प्रतस्थे
भूपालपुत्रः सह जुद्धपौत्र्या ॥४४॥

द्विजै रिति। निशान्ते रात्र्यवसाने प्रभात इत्यर्थः। द्विजैर्ब्राह्मणैः। तत् पूर्वोक्तं पाणिनिपीड़नं विवाहः ‘ विवाहोपयमौ समौ। तथापरिणयोद्वाहोपयामाः पाणिपीडनम् ’ इत्यमरः। विधिपूर्वकं शास्त्रोक्तविध्यनुसारं यथातथा समापितं समाप्तं कृतं हि निश्चयेन। ततो विवाहसमाप्त्यनन्तरम्। भूपालपुत्रो महीपालसूनु र्महेन्द्र इत्यर्थः। सुदायं हरणं ‘ यौतुकादि तु यद्देयं सुदायो हरणं च तत् ” इत्यमरः। आदाय गृहीत्वा। जुद्धपौत्र्या हरितनयया। सह। प्रतस्थे।

रामादृशा वा सुरया कदापि
न निर्जितं तस्य मनः कथञ्चित् ।
सुपुण्यया कोमलया तयाऽद्य
हृतं, गुणैः को न वशीकृतो हि ॥४५॥

रामेति । रामादृशा रमणीलोचनेन वा सुरया हालया कदापि तस्य महेन्द्रस्य मनः कथञ्चित् केनाऽपि प्रकारेण न निर्जितं न वशीकृतम् । अद्य सुपुण्यया सुधर्मया कोमलया मृदुलया तया हरिनन्दिन्या हृतं जितम् । हि यतो गुणैः को न वशीकृतो न निर्जितः । सर्वे विजिता भवन्तीत्यर्थः । अर्थान्तरन्यासोऽलङ्कारः ।

स्वरूपगर्वातिशयेन वामा
निनिन्द या शारदशर्वरीशम् ।
तमेत्य कान्तं विगतस्मया सा
चन्द्रे चकोरीव तदाननेऽभूत् ॥४६॥

स्वरूपेति । या वामा 'प्रतीप दर्शिनी वामा वनिता महिला तथेत्यमरः । स्वरूपगर्वातिशयेन निजसौन्दर्याभिमाना-

धिक्येन शारद शर्वरीशं शरदि भवः शारदः ' तत्र भवः ' इत्यण् । शर्वर्या ईशः शर्वरीशः शारदश्चासौ शर्वरीशः शारद शर्वरीश स्तं तथोक्तं शरच्चन्द्रं निनिन्द निन्दां चक्रे । शरच्चन्द्राधिकसौन्दर्यवत्यहमिति गर्वं दधावित्यर्थः । सा यच्छब्दनिर्दिष्टा सुन्दरी । तं कान्तं पतिं सुन्दरं वरं । एत्य प्राप्य विगतस्मया विगतोऽपयातः स्मयोऽभिमानो यस्याः सा विगतस्मया सती ' दर्पोऽवलेपोऽवष्टम्भ श्चित्तोद्रेकः स्मयो मद ' इत्यमरः । तदानने तद्वदने । महेन्द्रमुख इत्यर्थः । चन्द्रे चन्द्रमसि चकोरीवाऽभूत् ।

गत्वाऽथ सौधं क्षितिजानिसूनु-
र्जनांश्च संप्रेष्य तदालयेषु ।
विहारमारभ्य निवृत्तकार्यः
स्वनिष्कुटे सायमसौ सदारः ॥४७॥

गत्वेति । अथप्रस्थानानन्तरम् । असौ क्षितिजानिसूनुः क्षितिर्जाया यस्य स क्षितिजानि स्तस्य सूनुः क्षितिजानिसूनुः पृथ्वीशपुत्रः । " जायाया निङ् ' इत्यनेन निङादेशः । सौधं प्रासादं गत्वा जनांश्च तदालयेषु तद्भवनेषु संप्रेष्य प्रेषितान् कृत्वा

निवृत्तकार्यो निवृत्तानि परावृत्तानि कार्याणि यस्य स निवृत्तकार्यः। सदारो दारैः सहितः सन् स्वनिष्कुटे निजोद्याने 'गृहारामास्तु निष्कुटा' इत्यमरः। सायं सन्ध्यायाम्। विहारमारब्ध विहारमारब्धवान्।

भास्वताऽऽलिङ्गिता पश्चिमा दिक् ततो
योषितः कौसुमैः सायकैराहताः।
प्रेयसा मोदिता स्रग्विणी सा वधू-
श्चाययौ सत्रपं 'राज' पुत्रान्तिके ॥४८॥

इतिश्रीभरतराजशास्त्रिकृतौ महेन्द्रोदये महाकाव्ये राजाङ्के महेन्द्रपरिणयो नाम तृतीयः सर्गः ॥३॥

भास्वतेति। तत स्तदनन्तरम्। पश्चिमा पूर्वेतरादिक् काष्ठा भास्वता सूर्येण। आलिङ्गिताऽऽश्लिष्टा सूर्यः पश्चिमाचलं गत इत्यर्थः। योषितः स्त्रियः कौसुमैः पौष्पैः सायकैर्बाणै र्मदनबाणै रित्यर्थः। आहता विद्धा। प्रेयसाप्रियतमेन मोदिता प्रसादिता स्रग्विणी माल्यवती सा वधूश्च राज पुत्रान्तिके भूपतनयसमीपे सत्रपं लज्जापूर्वं यथातथाऽऽययावाजगाम। स्रग्विणीवृतम् "कीर्तितैषा चतूरेफिका स्रग्विणी' तिलक्षणात्।

इतिश्री शङ्कर शास्त्रिकृते महेन्द्रोदय काव्य-
व्याख्याने कुञ्चिकाख्ये तृतीयः सर्गः ॥३॥

चतुर्थः सर्गः

अथ प्रविश्य क्षितिपालसद्मनि
सुलक्षणा सा हरिचारुनन्दिनी ।
प्रसाद्य भर्तुः परिचर्यया गुरू-
नहो गृहिण्याः पदमाप शोभनम् ॥१॥

अथेति। अथ विवाहानन्तरम्। सुलक्षणा शोभनानि लक्षणानि स्त्र्युचित लक्षणानि यस्याः सा। सा पूर्वोक्ता वधूः। क्षितिपालसद्मनि राजभवने प्रविश्य। भर्तुः पत्यु गुरून् मान्यजनान् परिचर्यया सेवया प्रसाद्य प्रसन्नान् कृत्वा। गृहिण्याः शोभनमुत्तमं पदं स्थान माप लेभे। अहो इत्याश्चर्यम्। वंशस्थं वृत्तम्। लक्षणं तूक्तम्।

न केन तस्या गुणगौरवोदधेः
प्रशंसया स्वा रसना सुधायिता ।
न केन वा कर्णमुखे मनोगतिः
स्थिरीकृता तद्वचसां पिपासया ॥२॥

नेति तस्या इन्द्रराज्यलक्ष्म्या गुणगौरवोदधेः प्रशंसया केन जनेन स्वोऽऽत्मीया रसना जिह्वा न सुधायिता सुधावत् आचरिता । सुधायितैवेत्यर्थः । वा तद्वचसां तद्वचनानां पिपासया स्पृहया श्रवणेच्छयेत्यर्थः । केन मनोगतिः कर्णमुखे स्वकर्णाग्रभागे न स्थिरीकृता स्थिरीकृतैवेत्यर्थः ।

अहो विधाता गृहिणीं मनोरमां
सखीं सुशिष्यां सुधियं च मन्त्रिणाम्
ददौ महेन्द्राय समस्तमेकिका
प्रदाय नारीरचनोत्तमामिमाम् ॥३॥

अहो इति । विधाता स्रष्टा । एकिकामेकैवैकिका तां 'स्वार्थे कः' नारीरचनोत्तमां स्त्रीसृष्टिसुन्दरी मिमां महेन्द्राय प्रदाय दत्वा, मनोरमां चेतोहरां गृहिणीं सखीं सुशिष्यां सुधियं बुद्धिमन्तं मन्त्रिणं च समस्तं ददौ । अहो इत्याश्चर्यम् । एषैव सर्वगुण सम्पन्नत्वात्, गृहिण्याः सख्याः शिष्याया मन्त्रिणश्च कार्यमकुरुते त्यर्थः ।

न रोहिणीन्दुं न रतिर्मनोभवं
न रेवती स्वं च तथाऽपृणोत् प्रियम् ।
तनुश्रिया निर्जितचन्द्रमन्मथं
यथा युवानं तमियं गुणालयम् ॥४॥

नेति । रोहिणी चन्द्रपत्नीन्दुं चन्द्रमसं तथा तेन प्रकारेण नाऽवृणोत् न वृणोतिस्म । रतिः स्मरपत्नी मनोभवं मदनं तथा नाऽवृणोत् । रेवती स्वं प्रियं बलरामं तथा नाऽवृणोत् । यथा येन प्रकारेणेयं हरिनन्दिनी तनुश्रिया शरीरशोभया निर्जितचन्द्रमन्मथं पराजितशशिमदनं गुणालयं युवानं तं महेन्द्रमवृणोत् ।

न रोहिणीन्दो र्न रतिर्मनोभवा-
न्न रेवती चाप तथा स्ववल्लभात्
यथा महेन्द्रादियमुत्तमाङ्गना
ललाभ शुद्धं प्रणयं मनोषिणी ॥५॥

नेति । रोहिणीन्दो श्चन्द्रमस स्तथा शुद्धं प्रणयं प्रेम नाप न लेभे । रति र्मनोभवात् तथा शुद्धं प्रणयं नाप । रेवती स्ववल्लभादात्मकान्तात् बलभद्रात् तथा शुद्धं प्रणयं नाप । यथा मनीषिणी धीमती । उत्तमाङ्गना वरस्त्रीयं महेन्द्रात् लेभे ।

तयोर्निरीक्ष्य प्रणयं परं नृपो
बभूव पारस्परिकं प्रसन्नधीः ।
तया च भूयात्तनयस्य जीवितं
सुखावहं नित्यमिति व्यचिन्तयत् ॥६॥

तयो रिति। तयो र्वधूपुत्रयोः पारपरिक मन्योन्यं परं प्रणयं निरीक्ष्य दृष्ट्वा नृपः प्रसन्नधीर्हृष्टमानसो बभूव । नृपः । तनयस्य महेन्द्रस्य जीवितं जीवनं तया वध्वा सह नित्यं सन्ततं सुखावहं सुखपूर्णं भूयादितिव्यचिन्तयत् विशेषेण चिन्तितवान्। हीति निश्चयत्वे ।

परन्तु दृष्ट्वाऽऽत्मन आत्मजस्य वा
कुलस्य देशस्य जनस्य चाखिलम् ।
भविष्यमन्धं सचिवस्य शिष्टिका-
मशक्नुवन् रोद्धुमभूत् स चिन्तितः ॥७॥

परन्त्विति। परन्तु किन्तु सचिवस्य मन्त्रिणः शिष्टिकां शासनं रोद्धुं निवारयितु मात्मसात् कर्तुमित्यर्थः । अशक्नुवन्नपारयन् स त्रिभुवनः। आत्मनः स्वस्य । आत्मजस्य तनयस्य महेन्द्रस्येत्यर्थः। कुलस्यवंशस्याऽपि। देशस्य जनपदस्य नेपालस्येत्यर्थः। जनस्य वा प्रजाया अपि जातावेकवचनम्। वाऽप्यर्थे। अखिलं सर्वं भविष्य मन्धं मन्त्रि शासनत्वात्, दृष्ट्वाऽऽलोक्य विचार्येत्यर्थः । चिन्तितो विषण्णोऽभूत् ।

चिराय चिन्ता न गता महीपते-
र्जनैरपि प्राग्बुधितोऽभवन्न सः ।
अतो विलासेन मनोविनोदनं
विधातुमैच्छत् सह भोगिनीजनैः ॥८॥

चिरायेति । महीपतेः क्षितीश्वरस्य चिन्ता मानसव्यथा न गता । स जनैः प्रजाभि रपि प्राक् प्रथममेव न बुधितो ज्ञातो ऽभवत् । अतो जनाज्ञानाद्धेतोः । भोगिनीजनैः कृताभिषेकाया इतराभिर्नृपस्त्रीभिः सह 'सहयुक्तेऽप्रधाने' इत्यनेन तृतीया । भोगिन्योऽन्या नृपस्त्रिय' इत्यमरः । अथवा भोगो विषय भोगो यासां ता भोगिन्यस्ता एव जनास्तैस्तथोक्तैः । विलासेन मनो-विनोदनं विधातुं कर्तुं मैच्छत् ।

स यौवनेऽलङ्कृतकान्तकुन्तलो
जयन्ननङ्गं ललिताङ्गरोचिषा ।
अपूपुरच्चञ्चललोचनाञ्चला-
मनोरथं मान्मथकं रतिप्रियः ॥९॥

स इति । यौवने यूनो भावो यौवनं तस्मिन् तारुण्ये 'ता-

रुण्यं यौवनं सम ' मित्यमरः। अलङ्कृतकान्तकुन्तलोऽलङ्कृता विभूषिताः प्रसाधिता इत्यर्थः, कान्ताः सुन्दराः कुन्तलाः कचा येन स तथोक्तः। ' कलौ केशेषु मण्डन ' मिति स्मृतिः। ललिताङ्गरोचिषा ललितानि सुन्दराणि यान्यङ्गानि तेषां रोचिः कान्तिस्तया। अनङ्गं न विद्यन्तेऽङ्गानि यस्य स तं तथोक्तं मदनम्। ' कन्दर्पोदर्पकोऽनङ्गः कामः पञ्चशरः स्मर ' इत्यमरः। रुद्रनेत्राग्निना भस्मीकृतत्वान्मदनोऽनङ्ग इतिस्मर्तव्यम्। जयन् तिरस्कुर्वन् ललिताङ्गत्वात्, मदनाधिक सुन्दर इत्यर्थः। न केवल मङ्गानां सत्त्वादनङ्गं स जिगायाऽपितु गुणेनाऽपि तं जिगायेत्याह-रतिप्रियो रतिः सुरतं क्रीड़ा वा प्रियाऽभीष्टा यस्य सः। अथवा रत्याः कामपत्न्याः प्रियो दयितो रतिप्रियः। पत्युः पराजयेन रतिः कामपत्नी विजेतारं तं नृपमेव प्रियं मेने किमु। मदनजिन्नृपस्यैतत् विशेषणं समीचीनम्। मान्मथकं मन्मथस्येदं मान्मथं तदेव मान्मथकं कामात्मकम्' अत्राऽण् कप्प्रत्ययौ। चञ्चललोचनाञ्चलामनोरथं चञ्चलानि चपलानि लोचनानां नयनाना मञ्चलानि यासां ता स्तासां मनोरथं काङ्क्षां चाऽपूपुरत् पूरयामास। यथा मदनोऽङ्गनानां मान्मथं मनोरथं पूरयितुं समर्थस्तथैव सोऽपि समर्थ इत्यर्थः।मदने भस्मीभूतेऽपि स राजा तदधिकरूपगुणसम्पन्नोऽभूदितिभावः।

सुनीतिविद् दुष्टकृतात् स बन्धना-
न्निरीक्ष्य नान्यां पदवीं स्वमोचिनीम्
यदाश्रयद् विभ्रममेव, तद्वशी-
कृताङ्गनाभ्यो जनभावमाप्तवान् ॥१०॥

सुनीतीति । सुनीतिविद शोभना चासौ नीतिः सुनीति-स्तां वेत्तीति सुनीतिवित् सुनयज्ञो राजनीतिज्ञ इत्यर्थः । स त्रि-भुवनः । दुष्टकृतात् दुर्जनविहितात् कुमन्त्रिविहितादित्यर्थः । बन्धनात् बन्धात् । स्वमोचिनी मात्म मोचन कारिणी मन्या-मपरां स्त्रीसहायादितरामित्यर्थः । पदवीं मार्ग मुपाय मित्य-र्थः। न निरीक्ष्य नाऽऽलोक्य । यत विभ्रमं विलासमेवाऽऽश्रयत् । तद्वशीकृताङ्गनाभ्यस्तेन विभ्रमेण वशीकृताः स्वाधीनतां नीता या अङ्गना रामा स्ताभ्यो जनभावं प्रजाशयं स्वसहयोगविधायकं जनभावमित्यर्थः । आप्तवान् लेभे । स्त्रीभिः साकं विहितो वि-लासोऽपि तस्य हितकारको बभूवेत्यर्थः ।

ततो निरुद्धे सदने सुशासके
कुशासकेनाऽदयशासिता प्रजा ।
विबुध्य देशेशमनः कथञ्चन
विधातुमस्मै सहयोगमुत्थिता ॥११॥

तत इति। ततोऽनन्तरम्। सुशासके राजनि सदने प्रासादे निरुद्धे सति भावे सप्तमी। कुशासकेन कुमन्त्रिणाऽदयशासिता अदयं निष्कृपं यथातथा शासिता प्रजा जनो जातावेकवचनम्। "उपसर्गे च संज्ञाया" मितिडप्रत्ययः। देशेशमनो जनपदाधिपचित्तं नृपविचार मित्यर्थः। कथञ्चन केनाऽपि गुप्त प्रकारेण विबुध्य ज्ञात्वाऽस्मै नृपाय सहयोगं साहाय्यं विधातुं कर्तुं मुत्थिता तत्पराऽभूदितिशेषः।

एकादशभिः श्लोकैः प्रजापरिषदं वर्णयति–

^पुरे 'प्रजानां परिषद्' रहस्यथ
प्रजाभिरेका विहिता बृहत्तमा।
इयं हि दैत्यक्षतये स्वशक्तिभी--
रराज दुर्गेव दिवौकसां युता ॥१२॥

पुर इति। अथ राजमनोज्ञानान्तरम्। पुरे नगरे रहस्येकान्ते बृहत्तमा महती अतिशायने तम बिष्ठनौ' इतितमप्प्रत्ययः। एका। प्रजानां जनानांपरिषद् सभा'प्रजापरिषदि'तिख्याता जनसभा प्रजाभिर्जनै र्विहिता कृता। इयं प्रजापरिषद् दैत्य क्षतये दैत्यमारणाय दिवौकसां देवानां स्वशक्तिभिरात्म शक्तिभिः। रोरी' तिरेफलोपत्वेन 'ढ्रलोपे पूर्वस्य दीर्घोऽण' इतिदीर्घः। युता समन्वि-

A (२० ज्येष्ठ १९९३ वि०)

ता दुर्गा दुःखेन गम्यते ज्ञायतेऽस्यामिति दुर्गा तदाख्या देवीव रराज । हि निश्चितार्थे । यथा दैत्यमृत्यवे देवानां शक्तिभि र्युता दुर्गोदतिष्ठत् तथा राणाशासनविनाशाय जनानां सामर्थ्यै र्युता प्रजापरिषन्नाम्नी सभा जाता ।

प्रजाः प्रजाः स्वा इव भूपतिं पतिं
विवेचयन्ती विदुषामियं सभा
क्षितीश्वरं वेलयतिस्म सन्ततं
तथा तदादेशमपीहतेस्म च ॥१३॥

प्रजा इति । प्रजा जनान् स्वा आत्मीया प्रजा इवाऽपत्यानीव भूपतिं राजानं पतिमिव स्वभर्तारं यथा विवेचयन्ती विचारयन्तीयं विदुषां विपश्चितां सभा परिषद् क्षितीश्वरं महीपालं सन्ततं नित्यं वेलयतिस्म कालोपदेशं कुरुतेस्म । चुरादिगणपठितवेलधातोर्लट् । तथा तदादेशं तस्य नृपस्याऽऽदेशमाज्ञां चेहतेस्म काङ्क्षतिस्म ।

नवभिः श्लोकैः प्रजापरिषदं हरे र्नवावतारैस्तुलयति-

विविक्तरूपा विदिता सुधीवरै--
र्वरिष्ठसत्यव्रतकार्यकारिणी ।
सुमीनभोगा रुचिशक्तिरादृता
सभाऽवतीर्णिः शुशुभे हरेरिव ॥१४॥

विविक्तेति । विविक्तरूपा विविक्ते विजने रूपं स्वरूपं यस्याः सा । राणाभीत्या विजनस्थेत्यर्थः । पक्षे पवित्ररूपा । 'विविक्तौ पूत विजना' वित्यमरः । सुधीवरै र्विद्वद्भिः । पक्षे दाशैः । विदिता ज्ञाता । वरिष्ठ सत्य व्रत कार्य कारिणी सत्यं व्रतं यस्मिन् तत् सत्य व्रत मेतादृक्कार्यं सत्यव्रतकार्यं वरिष्ठं यत् सत्यव्रत कार्यं तत् कारिणीवरिष्ठसत्यव्रतकार्यकारिणी राणाशासन निर्मूलनरूपतथ्यव्रतयुक्तपृथुकृत्यविधायिनी । पक्षे वरिष्ठं यत् सत्यव्रतस्य तन्नाम्नो राजर्षेः कार्यं तत् कारिणी । रुचिशक्ती रुचेर्मेलनस्य शक्तिः सामर्थ्यं यस्याः सा रुचि शक्तिः पक्ष इच्छा शक्तिः । 'अभिस्वङ्गे स्पृहायां च गभस्तौ च रुचिस्त्रिया' मित्यमरः । आदृता विहितादरा स्वदेशभक्तैरिति शेषः । पक्षे हरि भक्तै रादृता । सभा प्रजापरिषद् । हरे र्विष्णोः सुमीनभोगा मीनस्य मत्स्यस्य भोगः शरीरं मीनभोगः शोभनो मीन भोगो यस्याः सा तथोक्ता । अवतीर्णि रवतार इव मत्स्यावतार इवेत्यर्थः । 'रदाभ्यां निष्ठातो नः पूर्वस्य चड' इतिक्ते 'नं' त्वम् । 'अट् कुप्' इत्यादिना णत्वं च । अत्रश्लिष्टोपमालङ्कारः ।

अघान्तिका कर्कशघर्षणक्षमा
सभक्तिशुक्लप्रतिपद्भिरञ्चिता
अकूर्मकामोऽपि सुकूर्मरूपिणी
सभाऽवतीर्णिः शुशुभे हरेरिव ॥१५॥

अघान्तिकेति । अघान्तिका दुःख नाशिनी प्रजानां पारतन्त्र्यरूपदुःखध्वंसिनीत्यर्थः । पक्षे पापनाशिनी । 'अंहो दुःख व्यसने ष्वघ' मित्यमरः । कर्कशघर्षणक्षमः कर्कशानां विवेकरहितानां घर्षणे दलने क्षमा शक्ता राणादलनक्षमेत्यर्थः । पक्षे कर्कशं कठिनं यथातथा यत् घर्षणं विदारणं तस्यक्षमा सहनशीला मन्दराचलघर्षणसहनशोलेत्यर्थः । 'स्यात् कर्कशः साहसिकः कठोरा मसृणावपी'त्यमरः । सभक्ति शुक्ल प्रतिपद्भिः शुक्ला स्वच्छा प्रतिपत् बुद्धिर्येषां ते शुक्ल प्रतिपदो; भक्त्याऽनुरागेण सहिताः सभक्तय सभक्तयश्च ते शुक्लप्रतिपदः सभक्तिशुक्लप्रतिपदस्तैस्तथोक्तैः । सानुरागैः स्वच्छ बुद्धिभिर्जनै रित्यर्थः । 'प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्ति चेतना' इत्यमरः । पक्षे शुक्ला शुक्लपक्षत्वेन शुभ्रा प्रतिपत् प्रतिपत्तिथि र्येषां ते शुक्ल प्रतिपदो देवा इत्यर्थस्तैः शुक्लप्रतिपद्भिः सभक्ति भक्त्या सहितं यथातथा। अञ्चिता मानिता । अकूर्मकामा न विद्यते कूर्मस्येव काम इच्छा यस्याः सा असङ्कीर्ण मनोरथेत्यर्थः। उभयत्रार्थसाम्यम् । सुकूर्मरूपिणी विजनस्थितेः कूर्मवत्सङ्कीर्णरूपिणी । पक्षे सुन्दरकच्छपाकारा । सभा प्रजापरिषत् । हरेः सुकूर्मरूपिण्यवतीर्णिः कच्छपावतार इव शुशुभे। अकूर्म कामाऽपि सुकूर्मरूपिणीत्यत्र विरोधाभासः ।

धरां वहन्ती परसंगरस्थिरा
प्रजापतिर्यज्जनकोऽभवत् पुरा ।
वराहरूपा रिपुगर्वनाशिनी
सभाऽवतीर्णिः शुशुभे हरेरिव ॥१६॥

धरामिति । धरां नेपालभूमिं वहन्ती धारयन्ती । पक्षे पाताळात् पृथ्वीमानयन्ती । परसंगरस्थिरा परा महान्तो ये संगरा आपद स्तेषु स्थिरा । पक्षे परेण शत्रुणा हिरण्याक्षेण सहेत्यर्थोऽयः संगरो गदायुद्धं तस्मिन् स्थिरा 'प्रतिज्ञाजिसंविदापत्सु संगरः' अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः' इत्युभयत्राप्यमरः । पुरा प्राक् । पक्षे कृतयुगे । यज्जनको यदुत्पादकः । पक्षे यत्पिता । प्रजापति र्नरेश स्त्रिभुवन इत्यर्थः । नृपाशयेनैवेयं परिषज्जातेतीतिहासाज्ज्ञेया । पक्षे ब्रह्मा । 'स्रष्टा प्रजापतिर्वेधा' इत्यमरः । ब्रह्मणो घ्राणान्निष्क्रान्तः सूक्ष्मजन्तुरेव वराह आसीदिति श्रीमद्भागवताज्ज्ञेयम् । अभवत् । रिपुगर्वनाशिनी राणाभिमान भञ्जिनी । पक्षे हिरण्याक्षाभिमाननाशिनी । सभा परिषद् । हरे र्वराहरूपाऽवतीर्णि र्वराहावतार इव शुशुभे ।

मृदुत्वनैष्ठुर्यसुचारुभीषणा
नृसिंहकायाधिकशक्तिरद्भुता
प्रपन्नदीनार्तिहरा परन्तपा
सभाऽवतीर्णिः शुशुभे हरेरिव ।१७।

मृदुत्वेति। मृदुत्वनैष्ठुर्यसुचारुभीषणा मृदुत्वं मार्दवं च दयादाक्षिण्यादिभिः सामदाननीतिभ्यां वा मार्दवं, नैष्ठुर्यं क्रूरत्वं च दण्डभेदनीतिभ्यां क्रूरत्वं, मृदुत्वनैष्ठुर्ये ताभ्यां सुचारुः सुन्दरी च मृदुत्वात् भीषणा भयावहा च नैष्ठुर्यात्, तथोक्ता। कृपाणिखञ्जवत् विशेषणसमासः। पक्षे मृदुत्वं नृरूपत्वात् भक्तानुकम्पायुक्तत्वात् वा नैष्ठुर्यं सिंहरूपत्वात् दैत्यदलनक्षमत्वात् वा ताभ्यां सुचारुश्च भीषणा च तथोक्ता। नृसिंहकायाधिकशक्ति नरः सिंहा इव नृसिंहाः 'उपमितं व्याघ्रादिभिः सामान्यप्रयोगे' इति समासः। तेषां कायेषु देहेष्वधिका शक्ति र्यस्यां सा। अथवा नृसिंहस्य नृसिंहावतारस्य भगवतो विष्णोः कायस्येवाऽधिका शक्ति र्यस्याः सा। 'स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः' इत्यमरः। पक्षे ना च सिंहश्च नृसिंहौ तयोः कायो यस्याः सा। अधिकाशक्ति र्यस्याः साऽधिकशक्तिः। अत एवाऽद्भुता विचित्रा। प्रपन्नदीनार्तिहरा प्रपन्नाः शरणागता ये दीना अकिञ्चना स्तेषामार्तिहरा पीडाहरा। पक्षे शरणागतप्रह्लादादिभक्तानामार्तिहरा। परन्तपा परान् शत्रून् राणारूपशत्रून् तापयतीति परन्तपा। पक्षे परं हिरण्यकशिपुरूपारिं तापयतीति तथोक्ता। सभा परिषद्। हरेरवतीर्णनृसिंहावतार इव शुशुभे।

सुलेखपक्षाऽपि सकैतवा, धनै-
र्बलैश्च हीना बलिमानभञ्जिनी ।
अखर्वगर्वाऽपि सुखर्वरूपिणी
सभाऽवतीर्णिः शुशुभे हरेरिव ॥१८॥

सुलेखेति । सुलेखपक्षाऽपि सुष्ठु चासौ लेखः सुलेखोऽन्यान्यवर्जितलेख स्तस्य पक्षो यस्याः सा । पक्षे सुष्ठु च ते लेखा देवाः सुलेखा स्तेषां पक्षो यस्याः सा । 'आदितेया दिविषदो लेखा अदिति नन्दना' इत्यमरः । सकैतवा कैतवेनच्छलेन सहिता राणाशासनभङ्गायच्छलमपि विदधतीत्यर्थः । पक्षे बलिदर्प दमनाय ब्राह्मणरूपच्छलेन युक्तेत्यर्थः । धनै र्बलैः सत्वैश्च सैन्यै र्वा हीनाऽपि बलिमानभञ्जिनी बलवद्दर्पनाशिनी । भञ्ज् धातोः 'सुप्यजातौ णिनिस्ताच्छील्य' इति णिनिप्रत्ययः 'ऋन्नेभ्यो ङीप्' इति ङीप् । पक्षे बलिनामदैत्यगर्वध्वंसिनी । अखर्वगर्वाऽपि नखर्वोऽखर्व एतादृशो गर्वो यस्याः साऽनल्पाभिमाना । सुखर्वरूपिणी विविक्तस्थितेः सङ्कीर्णरूपा । पक्षे वामनरूपा । 'खर्वो ह्रस्वश्च वामनः' इत्यमरः । सभा हरेरवतीर्णि र्वामनावतार इव शुशुभे ।

उदारभावा पर--शु-भ्र-मि-त्र-पा
प्रपूर्णकुक्षत्रियदारदुर्विधिः ।
अकिल्बिषा भार्गवरूपिणी सभाः
सभाऽवतीर्णाः शुशुभे हरेरिव ॥१९॥

उदारेति । उदारभावोदारः सरलो भावोऽभिप्रायो यस्याः सा । पक्ष उदारस्य दातुर्भावो यस्याः सा । 'दक्षिणे सरलो दारौ' 'उदारो दातृ महतो' रित्युभयत्रामरः । पर शुभ्र मित्रपा पराण्युत्तमानि शुभ्राणि स्वच्छानि कापट्यरहितानीत्यर्थो यानि मित्राणि सुहृदस्तानि पातीति परशुभ्रमित्रपा । 'दूरानात्मोत्तमाः परा' इत्यमरः । प्रपूर्णकु०क्षत्रियदारदुर्विधिः प्रपूर्णा धनसम्पन्ना ये कु० क्षत्रियाः कुवर क्षत्रिया राणा इत्यर्थः, नामैकदेशे नामग्रहणम्, तेषां ये दाराः स्त्रिय स्तासां दुर्विधि र्दुर्नियता राणास्त्रोदुर्भाग्यरूपेत्यर्थः । राणानिर्मूलनायोद्यतेयं परिषन्निज क्रियायां सफला भवेच्चेत् तेषां नारीणां सद्भाग्यहारिणी भवेद त एव राणास्त्री दुर्भाग्यरूपेति भावः । पक्षे परशु – भ्रमि – त्रपा—प्रपूर्ण कु–क्षत्रियदारदुर्विधिः परशोः कुठारस्य भ्रमि र्भ्रान्ति स्तस्या जाता या त्रपा लज्जा तया प्रपूर्णाः संयुक्ता रासपरश्वभावेऽपि तद्भ्रान्त्या पूर्वं भीताः पश्चात् भ्रमेऽपगते लज्जायुक्ता

इत्यर्थः, एतादृशा ये कुक्षत्रियाः पृथ्वीनरेशास्तेषां दाराणां दुर्विधिः। पुरा परशुराम स्त्रिसप्तवारं पृथ्वीं निःक्षत्रियां व्यधादिति पुराणोक्तिः। 'कुठारः स्वधितिः परशुश्च परश्वधः' 'भ्रमो भ्रमौ' 'गोत्रा कुः पृथीवी पृथ्वीक्ष्माऽवनि र्मेदिनी मही' 'मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्' इति सर्वत्राप्यमरः। अकिल्विषा निष्पापा नीरोगाच सभा भासा सहिता सभाः कान्तियुता। 'भाश्छवि र्द्युतिदीप्तय' इत्यमरः। सभा परिषद् हरे र्भार्गवरूपिण्यवतीर्णिः परशुरामावतार इव शुशुभे।

पितुः स्वराष्ट्रस्य कृते हि शासनं
स्वयं ग्रहीतुं प्रथमं त्वनिच्छती।
सदा रिपोर्दुर्दमना च राघवी
सभाऽवतीर्णिः शुशुभे हरेरिव ॥२०॥

पितुरिति। स्वराष्ट्रस्य पितुः कृते राष्ट्रपितुः कृते राज्ञे हितायेत्यर्थः। शासनं राज्यशासनाधिकारं स्वयमात्मना प्रथमं प्राक् राजग्रहणात् पूर्व मित्यर्थः। ग्रहीतु मादातुं तु। अनिच्छती न वाञ्छती राजग्रहणात् पश्चादेवेच्छतीत्यर्थः। 'सभा' इत्यस्य विशेषणं चैतत्। पक्षे पितु र्जनकस्य दशरथस्येत्यर्थः कृते पितृवचनपालनायेत्यर्थः। स्वराष्ट्रस्य शासनं प्रथमं ग्रहीतुं त्वनिच्छ

ती। प्रथमं पित्राज्ञानुसारेण वन वासमिच्छती वनवासानन्तरमेव राज्यशासनग्रहणमिच्छतीत्यर्थः 'अवतीर्णिरित्यस्य विशेषणं चैतत्। सदा रिपोः शत्रोर्दुर्दमना दुर्धर्षणा सभा हरे राघवी। 'तस्येदं' मितिसूत्रेणाऽण्प्रत्ययः। 'टिड्ढाण ञि' त्यादिना ङीप्। अवतीर्णि रवतारो रामावतार इवेत्यर्थः। शुशुभे हीति निश्चयार्थे।

तनूरवश्यं पतिता वृथाऽर्जुन
विचारमात्मा कुरु शाश्वतोऽमरः।
विधेह्यभीः कर्म नरेति वादिनी
सभाऽवतीर्णिः शुशुभे हरेरिव ॥२१॥

तनू रिति। तनूः शरीर मवश्यं वृथा पतिता पतिष्यति। पत् धातोर्लुट्। अतो देहप्रीतिं त्यजेत्यर्थः। आत्मा जीवः शाश्वतो नित्योऽमरो मृत्युहीनः। अतो मृत्यो र्मा बिभेहीतिभावः। अर्जुनविचारमर्जुनस्येव विचारस्तम्। देहोऽयमनित्य आत्मा तु नित्योऽमर श्चेत्यादि विचारं वा शुभ्र विचारं 'कार्यं वा साधयेयं देहं वा पातयेय' मित्यादिवत् सुन्दरविचार मित्यर्थः। 'अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुन' इत्यमरः। कुरु। नर ? भोपुरूष ? जातावेकवचनम्। अभी र्निर्भीकः

सन् कर्म राणाशासननिर्मूलनरूपकार्यं विधेहि कुरु। पक्षे तनूरवश्यं वृथा पतिताऽऽत्मा शाश्वतोऽमरः । अर्जुन ? हे धनञ्जम ? विचारं विवेकं कुरु। नर ? भो अर्जुन ? नरनारायणावतारेऽर्जुनो नर आसीदत एव नरेति सम्बोधनम्। अभीः सन् कर्म यज्ञादिकर्म रणरूपं कर्म च विधेहि। इति वादिनी हरे रवतीर्णिः कृष्णावतार इव शुशुभे।

विहाय गेहादिसुखानि या चिरं
तपश्चचाराऽद्वयवादिनी च या।
जगत्यहिंसार्जितगौरवा हि सा
सभाऽवतीर्णिः शुशुभे हरेरिव ॥२२॥

विहायेनि। या सभा व। हरेरवतीर्णिः । गेहादिसुखानि गृहकलत्रादि सुखानि विहाय चिरं चिरकालपर्यन्तं तपः कठिन व्रतं तपस्यां वा चचार। सभा तपश्चचारेत्यनेन सभ्यो जनव्रजः कठिनतममपि दुःखमसहतेति बोद्धव्यम् । पक्षे भगवान् बुद्धो गृहपुत्र कलत्रादि जन्यं सुखं परित्यज्य चिरं तप स्तेप इतीति हासोक्तिः। याऽद्वयवादिनी चैकवादिन्येक एव राजेति वादिनी प्रधानामात्यो न राजेति वादिनीत्यर्थः । (प्रधानमन्त्री श्री ३ महाराजः, भूपः श्री ५ महाराजः, इति भाषायां चलितोक्ति

रासीत्) पक्षेत्वेक एवाऽहिंसा रूप : पदार्थ एव प्रधान मिति वादिनी । 'षडभिज्ञो दशबलोऽद्वयवादी विनायक' इत्यमरः । जगति भुवनेऽहिंसार्जितगौरवाऽहिंसयाऽहत्ययाऽऽर्जितंलब्धं गौरवं यया सा तथोक्ता । हिंसानीत्या राणाशासनमुन्मूलयितु सदाऽसम्भव एवाऽऽसीत् । भारतादाङ्ग्लशासनमुन्मूलयितु महात्मा गान्धीवाऽहिंसानीतिधारणाल्लब्धगौरवेयंसभाऽऽसीदिति बोद्धव्यम् । पक्षे वेदोक्ति मुल्लङ्घ्याऽहिंसाव्रतपालनेनाऽऽर्जितगोरवा । सा यच्छन्द निर्दिष्टा सभा परिषद् । हरेरेतादृश्यवतीर्णा बुद्धावतार इव शुशुभे । हीति निश्चयार्थे ।

नवावतारैः सदृशी सभा हरे--
निजक्रियायां सफला भवेन्न चेत् ।
नवाऽपरा कल्किनिभा भुजायुधा
विपक्षहन्त्री समये भविष्यति ॥२३॥

नवेति । हरे र्नवावतारैः पूर्वोक्तमत्स्यकूर्मादिनवावतारैः सदृशी तुल्या । कवेः पाण्डित्येन तुलितेत्यर्थः । निजक्रियायां स्वकर्मणि राणाशासनोन्मूलनरूपकृत्य इत्यर्थः । सफला नभवेच्चेत् । समये काले । भुजायुधा भुजे वाहावायुधं शस्त्रं खड्गोवा यस्याः सा । कल्किनिभा कल्किसदृशी । नवा नूतनाऽपराऽन्या । कल्क्यस्वरूपेत्यर्थः । विपक्षहन्त्री शत्रुविनाशिनी । भविष्यति ।

सदः- सदस्या निजदेशवासिनां
विबोधनायाऽधिकृतेः कृते रपि
र्विलिख्य लेखा अयनेषु तत्यजु-
र्जनैश्च ता लोचनगोचरीकृता ॥२४॥

सदरिति । सदः सदस्याः सभोजना निजदेश वासिनामात्मजन पदवास्तव्यजनाना मधिकृते रधिकारस्य प्राप्तव्यनागरिकाधिकारस्येत्यर्थः । कृतेः कार्यस्याऽपि । 'स्त्रियां क्तिन्' इति क्तिन् प्रत्ययः । कर्त्तव्यकर्मणोऽपीत्यर्थः । विबोधनाय विशेषेण ज्ञापनाय लेखाः प्रबन्धान् विलिख्य लिखित्वाऽयनेषु वर्त्मसु ' अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृति ' रित्यमरः । तत्यजुः । ता लेखा जनैर्नरैर्लोचनगोचरीकृता नयनपथं नीताश्च दृष्टा इत्यर्थः । ' कृभ्वस्ति योगे संपद्य कर्तरिच्विः' इति च्विप्रत्ययः । 'अस्य च्वौ ' इत्यवर्णस्येत्वम् ।

श्लोकयो युग्मकेन प्रजापरिषत्कार्यं वर्णयति—

"प्रजा, न राणाकुलजो जनो नृपो
जनाधिराजः खलु साहवंशजः ।
अतो वयं तं न नमाम सादरा-
निरङ्कुशं दुर्नयमन्त्रिणं सदा ॥२५॥

कुशासितास्तेन भवाम मा वयं
जनैक्यतो द्रागधिकार आप्यते
अतः प्रजा जाग्रतु' चेत्थमक्षरा-
नवाकिरन् वर्त्मसु गूढवेषिणः ॥२६॥

प्रजा इति । प्रजाभोप्रजाः। राणाकुलजो राणावंशोद्भवो जनोनरः, जुद्धशमशेर इत्यत्र ज्ञेयः। नृपो राजा न । स तु प्रधा-नामात्यएवेत्यर्थः । तदानीं प्रधानामात्योऽपि नृपशब्देन व्यव-हृत आसीत् । साहवंशजः साहस्य पृथ्वीनारायणसाहस्य 'नाम्ने-कदेशेनामग्रहणम्'। वंशे कुले जात स्तथोक्तः । जन इति पूर्वे-णान्वयः । जनाधिराजोजनानां प्रजानामधिराजो नृपः खलु निश्चयेन । प्रधानामात्यो हि राजेतिभ्रान्तिमपसारयतेत्यर्थः । अतोऽस्मात् कारणात् वयं तं पूर्वोक्तं निरङ्कुशं निर्यन्त्रणं दुर्नय मन्त्रिणं दुष्टो नयो नीतिर्यस्यस दुर्नय एतादृशो यो मन्त्री सचिव स्तंतथोक्तम् । 'दुरःषत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्य' इति वार्तिकेन दुरुपसर्गत्वाभावात् णत्वाभावः। सदा सादरा आदरेण सहिताः सन्तो न नमाम नमस्कारं न करवाम।

कुशासिता इति । तेन मन्त्रिणा वयं कुशासिताश्च निर्दय शासिताश्च मा भवाम । निरङ्कुशत्वात्तच्छासनं न मानयामो

त्यर्थः । जनैक्यतो जनानां प्रजानामैक्यमेकता ततः । अधिकारः प्राप्तव्याधिकृतिः । द्राक् स्त्रागाप्यते प्राप्यते । अतो भयं नास्तीत्यर्थः । अतः प्रजा भोजनाः । जागृतु जागर्तियुक्ता भवन्तु । चेत्थमेतादृशानक्षरान् वर्णानित्थं लिखितपत्राणीत्यर्थः । ('पर्चा' इति भाषायाम्) गूढवेषिणश्छद्मवेषिणो वर्त्मसु मार्गेष्ववाकिरन् प्रसारितवन्तः ।

राणापतिः सचकितं समधीत्य लेखा
उद्दीप्तरोषदहनारुणलोलचक्षुः ।
अन्तर्निगूढदरवाष्पकणः समन्तात्
संवीक्षणाय समितेर्नगरेषु येते ॥२७॥

राणेति । राणापती राणां पतिः स्वामी जुद्धशमशेर इत्यर्थः । लेखाः सचकितं सविस्मयं यथातथा समधित्य पठित्वा । उद्दीप्तरोषदहनारुणलोलचक्षुरुद्दीप्तः प्रदीप्तो यो रोषः क्रोध एव दहनोऽग्निस्तेनारुणे रक्ते लोले चञ्चले चक्षुषी नेत्रे यस्य स तथोक्तः । अन्तर्निगूढदरवाष्पकणः सन्नन्तर्निगूढा अन्तर्लुप्ता दरवाष्पकणा अल्पाश्रुकणा वा भयाश्रुकणा यस्य स तथोक्तः । समन्तात् सर्वत्र नगरेषु पुरेषु समितेः परिषदः

संवीक्षणाय मार्गणायाऽन्वेषणं कर्तुमित्यर्थः। 'संवीक्षणं विचयनं मार्गणं मृगणा मृग' इत्यमरः। येते प्रयत्नमकरोत्। वसन्ततिलका-वृत्तम् 'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात्।

सोऽन्तःपुरेऽपि शयने सहसा विलोक्य
पत्राणि तानि कटुवाक्यपरिपूरितानि।
सानन्दगात्रपरिरम्भनिपीडितोरु-
वामाभुजौ निधुवने शिथिलीचकार ॥२८॥

स इति। स शुद्धशमशेरोऽन्तःपुरेऽवरोधेऽपि शयने तल्पे कटुवाक्यपरिपूरितानि कटुवाक्यभरितानि पत्राणि सहसा विलोक्य दृष्ट्वाऽवरोधतल्पेऽपि तानि पत्राणि दृष्ट्वेत्यर्थः। निधुवने सुरते सानन्दगात्रपरिरम्भनिपीडितोरुवामाभुजौ सानन्दमानन्दपूर्वकं यथातथा यो गात्रपरिरम्भो रमणीशरीरालिङ्गनं तेन निपीडितो नितरां मर्दित ऊरुः सक्थि यस्याः सा, एतादृशी या वामा प्रमदा तस्या भुजौ तौ तथोक्तौ। 'परिरम्भः परिष्वङ्गः संश्लेष उपगूहन' मित्यमरः। शिथिलीचकार श्लथौ चक्रे। 'अभूत तद्भावे च्विः' इतिच्विः। आलिङ्गनपरायणौ मानिनीबाहू अप्यपसारयामासेत्यर्थः। अवरोधेऽपि स भयं भेज इति बोद्धव्यम्।

स्वैरं कदा रसवतीविमलावकाशे
शाल्योदनं स पललेन युतं समश्नन् ।
संस्मृत्य तानि चरितानि जनैः कृतानि
हा !हन्त !! हन्त !!! रसनां विरसां चकार ॥२९॥

स्वैरमिति । कदा कस्मिंश्चिद्दिने रसवतीविमलावकाशे रसवत्यामहानसस्य यो विमलो निर्मलोऽवकाशः कोष्ठ स्तस्मिन्। 'रसवत्यां तु पाकस्थानमहानसे' इत्यमरः । पललेन मांसेन युतं सहितं 'पिशितं तरसं मांसं पललं क्रव्यमामिष' मित्यमरः । शाल्योदनं कलमव्रीहिभक्तं 'शालयः कलमाद्याश्च पुंस्यमी इत्यमरः । स्वैरं स्वच्छन्दं यथा तथा निश्चिन्तमित्यर्थः । समश्नन् खादन् स जुद्धशमशेरः । जनैः प्रजाभिः कृतानि विहितानि चरितान्याचरणानि संस्मृत्य स्मृत्वा रसनां जिह्वां विरसां रसहीनां चकार । सपललेन शाल्योदनेन सरसामपि रसनां विरसां चकारेत्यर्थः । 'रसज्ञा रसना जिह्वे' त्यमरः । हा ! हन्त !! हन्त !!! खेदार्थे ।

स प्रत्यहं प्रतिपथं प्रियपारिपार्श्वान्
प्राप्तुं प्रवृत्तिमथ पौरजनेष्वयुङ्क्त ।
प्रामाण्यतस्तु परमां न मुदं ततान
ह्येकोऽपि तस्य पटुधीः पुरुषः स्वकीयः ॥३०॥

-स इति। अथ पत्रप्राप्त्यनन्तरम्। सोऽमात्यः प्रत्यहंप्रतिदि-नं 'नपुंसकादन्यतरस्या' मितिटच् प्रत्ययः। प्रतिपथं प्रतिवर्त्म। पौरजनेषु नागरिकेषु भवां प्रवृत्तिं वृत्तान्तं 'वार्ता प्रवृत्ति र्वृत्तान्त' मित्यमरः। प्राप्तु मवगन्तुं प्रियपारिपार्श्वान् प्रिया वल्लभा वि-श्वस्ता इत्यर्थश्च ते पारिपार्श्वा आसन्नवर्तिजनाः 'तत्र भव' इत्य नेनाऽण् प्रत्ययः। "टिड्ढाणञि' त्यादिना वृद्धिः। तान् तथो-क्तान्। अयुङ्क्त नियुक्तवान्। तु किन्तु। एकोऽपि पटुधीश्चतुर-मति स्तस्य स्वकीयः पुरुष स्तस्य परमामुत्कृष्टां मुदं हर्षं प्रामा-ण्यतः प्रमाणस्येदं प्रामाण्यं ततः प्रमाणपूर्वकात्। न ततान तन धातोः कर्तरि लिट्। वृत्यनुप्रासोऽलङ्कारः।

उक्तं ततस्तु सपुरस्कृति राजमान्यो
भूयात् स एव नर उत्तमभाग्यरेखः।
यः स्वामिने जनपदद्विषदां निवासं-
संदर्शयिष्यति कुशाग्रमतिः किलेति ॥३१॥

उक्त मिति। तु किन्तु ततः परिषत्प्राप्तिहेतोः स उत्तम भाग्यरेख उत्तमा श्रेष्ठा भाग्यरेखा नियतिलिपि र्यस्य स तथो-क्तः। नरो जन एव राजमान्यो राज्ञा मान्यो राजमान्यो राजा-

हृतः। इह राजशब्देन मन्त्री बोद्धव्यः। सपुरस्कृति पुरस्कृत्या पुरस्कारेण सहितं यथातथा भूयात् किल। यस्तच्छब्दनिर्दिष्टः कुशाग्रमतिरतितीक्ष्णबुद्धिः पुरुषः स्वामिने प्रभवे जनपदद्विषदां राष्ट्रवैरिणां निवासं स्थानं संदर्शयिष्यतीत्युक्तं गदितं जुद्धनेति शेषः।

इति निगदति तस्मिन्नर्थकामा द्विजाति-
र्झटिति नतशिरः सन्नेक ऊचे सभीकः।
तव भवति कृपा चेन्मामकीनेऽपराधे
वसतिमहमरीणां सूचये 'राज' वर्य ! ॥३२॥

इतिश्रीभरतराजशास्त्रिकृतौ महेन्द्रोदये
महाकाव्ये राजाङ्के राजसाहाय्यार्थं प्रजापरि-
षद्विवेचनं नाम चतुर्थः सर्गः ॥४॥

इतीति। तस्मिन् जुद्ध इतीत्थं निगदति कथितवति सति 'यस्य च भावेन भावलक्षण' मिति सप्तमी। अर्थकामा धनाभिलाषी सभीकः सभय एको द्विजाति र्ब्राह्मणो रामजीजोशीसंज्ञको ब्राह्मण, इत्यर्थः। नतशिरः सन्नवनतमस्तकः सन्। नैतिकताया भङ्गत्वान्नतमस्तक इत्यर्थः। ऊचे बभाषे। राजवर्य भो

राजश्रेष्ठ ! मामकीने मदीये। ‘युष्मदस्मदोरन्यतरस्यां खञ् च’ इति खञ् । ‘तवकममकावेकवचने’ इति ममकादेशश्च। अपराधे आगसि तव कृपाऽनुकम्पा भवति चेत् । अहमरीणां रिपूणां प्रजापरिषत्सदस्यानामित्यर्थः । वसतिं वासस्थानं सूचये कथये सर्गान्ताद्वृत्तभेदः । मालिनीवृत्तम् । ननमयययुतेयं मालिनी भोगिलोकै’ रितिलक्षणात् ।

इतिश्रीशङ्करशास्त्रिणा विरचिते महेन्द्रोदये
काव्यव्याख्याने कुञ्चिकाख्ये चतुर्थः सर्गः ॥४॥

पञ्चमः सर्गः

पञ्चभिः श्लोकै राणागृहीतानां प्रजापरिषन्नेतृणामवस्थां वर्णयति

भास्वद्दीधितिचन्द्रहासविलसद्दोर्दण्डकैः सादिभि-
रंसन्यस्तभुशुण्डितैलशकटारूढै र्भटैश्चावृतः ।
चञ्चद्विद्युदुदग्रघोषभयकृत्संवर्तकाच्छादितं-
चान्द्रं बिम्बमिवाम्बरे भुवि ततो बभ्राज सभ्यव्रजः ॥१॥

भास्वदिति । ततो रामजीकृतसूचनानन्तरम् ! भास्वद्दीधितिचन्द्रहासविलसद्दोर्दण्डकैर्भास्वतः सूर्यस्येव दीधितयः किरणा येषां त एतादृशा ये चन्द्रहासा असय स्तैर्विलसन्तः शोभमाना दोर्दण्डका भुजदण्डा येषां तै स्तथोक्तैः । 'खड्गे तु निस्त्रिंश चन्द्रहासासिरिष्टयः' इति 'भुजबाहूप्रवेष्टो दो' रिति चामरः । भास्वद्दीधिति (सूर्यकिरण) चन्द्रहास[चन्द्रप्रकाश] योः परस्परविरोधत्वात विरोधाभासः । सादिभिरश्वारोहैः । 'अश्वारोहास्तु सादिनः' इत्यमरः । अंशन्यस्तभुशुण्डितैलशकटारूढै रंसे न्यस्ता भुशुण्डि यैं स्तें ऽसन्यस्तभुशुण्डयोंऽसन्यस्तभुशु-

ण्डयश्च तैलशकटारूढाश्चांसन्यस्तभुशुण्डितैलशकटारूढा स्तै रंस-न्यस्तभुशुण्डितैलशकटारूढैः स्कन्धनिहितभुशुण्डि [बन्दूक इतिभाषायाम्] तैलशकट (भाषायां मोटर] स्थितै भंटैः सैनिकै श्रावृत आच्छादितः। सभ्यव्रजः सभायां संसदि साधवः सभ्याः प्रजापरिषत्सदस्या इत्यर्थः, 'सभाया य' इति यप्रत्ययः, तेषां व्रजःसमूहः। कर्तृपदं चैतत्। 'सभासदः सभास्तारा: सभ्याः सामाजिकाश्च ते' इत्यमरः। चञ्चद्विद्युदुदग्रघोषभयकृत्संवर्तका-च्छादितं चञ्चन्त्य श्चलन्त्यो विद्युतः सौदामन्यो येषु ते, उदग्रः प्रचण्डो घोषः शब्दो येषु ते. अत एव भयकृतो भयङ्करा एतादृशा ये संवर्तकाः प्रलयकालिकमेघास्तैराच्छादितमावृतम्। अम्बरे नभसि स्थितं चान्द्र मैन्दवं बिम्बं मण्डलमिव भुवि बभ्राज रराज। उपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम्। 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडित' मितिलक्षणात्।

प्रत्यध्वं ध्वजिनीप्रघर्षितवपुः सन्दानिताङ्गद्वयो-
निर्भीको हसदम्बुजास्यनयनो नीतः स रणाङ्गणम्।
क्रूराः कालनिभावरीणवदना मन्त्र्यग्रजस्याऽऽत्मजाः
स्वान्चुर्हयताडिचर्मकशया तं ताडयेत्थं जनान् ॥२॥

प्रत्यध्वमिति । प्रत्यध्वं प्रतिपथं ध्वजिनीप्रघर्षितवपुर्ध्वजिन्या सेनया प्रघर्षितानि प्रकृष्टेन मर्दितानि वपूंषि शरीराणि यस्य सः । सन्दानिताङ्घ्रिद्वयः सन्दानितं बद्धमङ्घ्र्योरवयवयो र्द्वयं यस्य सः । बद्धपाणिरित्यर्थः । 'बद्धे सन्दानित मित्यमरः । निर्भीको निर्भयो । हसदम्बुजास्यनयनो हसन्त्यम्बुजानीवाऽऽस्यानि मुखानि नयनानि च यस्य सः । स पूर्वोक्तः । सभ्यव्रजो राणाङ्गणं जुद्धाजिरं नीतः प्रापितः । क्रूरा निर्दयाः । कालनिभावरीणवदनाः कालो मृत्युरिवाऽवरीणवदनं धिक्कृताननंनिन्द्यमुखमित्यर्थो येषां ते तथोक्ताः । 'अवरीणो धिक्कृतश्चे' त्यमरः । मन्त्र्यग्रजस्य सचिवभ्रातुः । आत्मजा स्तनयाः हयताडिचर्मकशया हयमश्वं ताड़यतीति हयताडिनी सा च चर्मकशा तया । करणे तृतीया । 'अश्वादेस्ताडनी कशे' त्यमरः । तं सभ्यव्रजं परिषज्जनवृन्दमित्यर्थः । ताड़येत्थं स्वानात्मीयान् जनान् सेवकजनानूचुः कथयामासुः ।

सभ्यानामथ शोणिताक्तवपुषां स्मेराननानां नृणां
न्याय्यैर्भिर्वचनावलीभिरसकृत् क्रुद्धेन दुष्टात्मना ।
आत्मभ्रातृसुतेन नोदितमति र्मन्त्री प्रधानो दृढ़ं
कांश्चित्तेषु वधाय चामरणकारार्थं न्ययुङ्क्ताऽपरान् ॥ ३ ॥

सभ्यानामिति । अथ ताडनोनन्तरम् । शोणिताक्तवपुषां रक्तावृतगात्राणाम् । तथापि स्मेराननानां हास्ययुक्तमुखानां सभ्यानां सभासाधूनां नृणां जनानां प्रजापरिषत्सदस्यानामित्यर्थः । न्याय्याभिर्न्याय्यपूर्वकाभि र्वचनावलीभिर्वाक्यपङ्क्तिभिरसकृत् वारं वारं क्रुद्धेन रुष्टेन दुष्टात्मना दुर्हृदयेन । आत्मभ्रातृसुतेन स्वाग्रजसूनुना नोदितमतिः प्रेरित बुद्धिः प्रधानो मुख्योऽमन्त्री सचिवो जुद्धशमशेर इत्यर्थः। तेषु नृषु कांश्चित् गङ्गालालदशरथादीन् । वधाय मारणाय । अपरानन्यान् । दङ्कप्रसाद रामहर्य्यादीन् । आमरणकारार्थं मृत्युपर्यन्तकारागारवासाय ब्राह्मणत्वेनाऽवध्यत्वात्, दृढं यथातथा । अयुङ्क्त ।

'गङ्गालाल' मिनौजसं 'दशरथं' वीरंच हत्वा ततो-
धिक्चक्रे नु भुशुण्डिकाऽप्यकरुणां विज्ञानवित्पाटवम् ।
तौ वृक्षौ नु निन्दितु र्निजविधिं यौ 'शुक्र''धर्मा' मल-
देहाभ्यां हि फलेग्रही अभवतां शून्यौ स्वकीयैः फलैः॥४॥

गङ्गालालमिति । भुशुण्डिका हेतिविशेषोऽपि जडोऽपीति बोद्धव्यः । इनौजसमिनस्य सूर्यस्येवौजस्तेजो यस्य तम् । अत्रातिशयोक्तिः ।' इनो भागो। धामनिधिश्चांशुमाल्यब्जिनीपति' रित्यमरः । गङ्गालालं तदाख्यपुरुषं वीरं दशरथं तदाख्यपुरुषं च ह-

त्वा तत स्तस्मात् कारणात्। अकरुणं निर्दयं विज्ञानवित्पाटवं विज्ञानविदां भौतिकशास्त्रज्ञानां भुशुण्डिकादिहेतिनिर्मातॄणामित्यर्थः, पाटवं नैपुण्यं तत् तथोक्तम्। धिक्कारमकरोत्। न्वित्युत्प्रेक्षायाम्। यौ शुक्रधर्मामलदेहाभ्यां शुक्रश्च शुक्रराजशास्त्री च धर्मश्च धर्मभक्तश्च 'नामैकदेशे नामग्रहणम्'। तयो र्यौ विमलौ निष्पापौ देहौ तनू ताभ्याम्। फलेग्रही फलवन्तौ। फलेग्रहिरात्मम्भरिश्च' इतीन्प्रत्ययो निपात्यते। अभवताम्। प्रगृह्यसंज्ञात्वेन न सन्धिः। हि निश्चयार्थे। स्वकीयै रात्मीयैः फलैः। 'प्रकृत्यादिभ्य उपसंख्यान' मित्यनेन तृतीया। शून्यौ रहितौ निष्फलावित्यर्थः। तौ यच्छब्दनिर्दिष्टौ वृक्षौ निज विधि स्वां नियतिं निनिन्दतु नु तर्के। वृक्षयोः शुक्रराजधर्मभक्तौ लक्ष्यित्वा व्यापादितौ। अतः फलशून्यौ तौ वृक्षौ तयोर्देहाभ्यां सफलावप्यात्मानौ न केवलं विफलौ दुर्दैवान्वितावपि मेनात इति भावः।

गोलाकारमपारमावृतमथ प्राकारदुर्गैं र्दृढै-
रस्पृष्टं पवनैः शिवैश्च तमसां जन्मस्थलं पङ्किलम्।
कीटाकीर्णमघालयं कलुषितं दुर्गन्धवातै र्भटैः
कारागारकृतान्तघोरनिरयं नीता भुवो देवताः॥५॥

गोलाकारमिति । अथ गङ्गालालादिमारणानन्तरम् । भटैः सैनिकैः । भुवः पृथिव्याः । देवताः सुरा ब्राह्मणा वा नेतार इत्यर्थः । गोलाकारं वर्तुलाकारं दृढैः कठिनैः प्राकारदुर्गैः प्राकारा एव दुर्गा स्तैः । 'प्राकारो वरणः साल' इत्यमरः आवृतं व्याप्तं वेष्टितमितिभावः । अतएवाऽपारम् । शिवैः पवनै र्वातैश्चाऽस्पृष्टं स्वास्थ्यप्रदवात शून्यमित्यर्थः । तमसा मन्धकाराणां जन्मस्थलं जन्मभुवं घनान्धकारमित्यर्थः । पङ्किलं पङ्कयुक्तं कीटाकीर्णं कीटै राकीर्णो व्याप्तस्तम् । अघालयं पापालयं दुःखालयं वा । दुर्गन्धवातैः कलुषितम् । कारागारकृतान्तघोरनिरयं कारागारं कारागृहमेव कृतान्तस्य यमस्य घोरो भीषणो निरयोनरकस्तम् । 'स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रिया' मित्यमरः । नीताः प्रापिताः । अत्र स्वभावोक्तिरलङ्कारः ।

पञ्चभिः श्लोकै राज्ञः शोकावस्थां दर्शयति—

राज्ञः पार्विकचन्द्रचारु वदनं म्लानं ग्रहाधैर्वशात्
फुल्लेन्दीवरलोचने विलुलिते वर्षाश्रुभि र्निर्भरम् ।
शुष्कौ बिम्बफलाधरौ स्वमनसो रोषानलज्वालया
क्षीणा हन्त ! सुकोमलाङ्गलतिकाश्चिन्तातपैः प्रत्यहम् ।६।

राज्ञ इति । राज्ञो महीपतेस्त्रिभुवनस्येत्यर्थः । पार्विक

चन्द्रचारु पर्वणि पूर्णिमायां भवः पार्विको यश्चन्द्रः स इव चारु सुन्दरं पूर्णेन्दुसुन्दरमित्यर्थः । वदनं मुखम् । ग्रहाधेर्ग्रहो राहुरिव य आधि र्मानसी व्यथा तस्य वशादधीनात् । हेत्वर्थे पञ्चमी । म्लानं मलिनं बभूव । राहुणा चन्द्र इवाऽऽधिना नृपवदनं म्लानं जातमिति भावः । चन्द्रवदनयो र्ग्रहाध्योश्च साम्यादुपमालङ्कारः । फुल्लेन्दीवरलोचने फुल्ले विकसिते ये इन्दीवरे नीलोत्पले ते इव लोचने नयने तथोक्ते । वर्षाश्रुभि र्वर्षा धारासम्पाता इवाऽश्रूणि तैः । हेतौ तृतीया । निर्भरमत्यर्थं विलुलिते क्लिन्ने बभूवतुः । आसारैः कमले इव नयनजलै र्लोचने क्लिन्ने इतिभावः । अत्राप्युपमालङ्कारः । बिम्बफलाधरौ बिम्बफले रक्तफलविशेषाविवाऽधरावोष्ठौ । स्वमनस आत्मचेतसो नृपमानसस्येत्यर्थः । रोषानलज्वालया रोषः कोपो मन्त्रिणं प्रति समुत्थितः क्रोध इत्यर्थः, अनलोऽग्निरिव रोषाग्निस्तस्य ज्वाला शिखा तया । हेतौ तृतीया । शुष्कौ नीरसौ रक्तगुणहीनौ बभूवतुः । अनलज्वालया बिम्बफले इव रोषाधिक्येनाऽधरौ नीरसौ बभूवतुरितिभावः । उपमालङ्कारः । सुकोमलाङ्गलतिकाः सुकोमलान्यङ्गान्येव लतिका वल्लर्य स्तथोक्ताः । चिन्तातपैश्चिन्ता एवातपाः सूर्यतापास्तैः । हेतौतृतीया । प्रत्यहमनुदिनं क्षीणाः । बभूवुरितिशेषः । सुकोमलाङ्गलतिकाश्चिन्तातपैरित्यत्र रूपकालङ्कारौ । प्रज्ञापरिषन्नेतृन् प्रति मन्त्रिकृतदण्डेन हेतुना राज्ञो

वदनं म्लानं, लोचने वाष्पैः क्लिन्ने, अधरौ रोषेण शुष्कौ, शरीरं च चिन्तया क्षीणमभवदिति भावः।

स्मृत्या तस्य सतां मनः स्तिमितमस्रैरक्षिणी चोज्झिते
क्षिप्रं कण्ठपथङ्गतं रसनया वक्तुं वचो विस्मृतम्।
कारासद्मनि वासिनां दिवि च हृच्चित्रे दृशौ व्यापृते
हाहाकाररवभ्रमेण बधिरौ कर्णौ च भूतौ भृशम्॥७॥

स्मृत्येति। सतां सज्जनानां दिवङ्गतानां कारागृहङ्गतानां च नेतृणामित्यर्थः। स्मृत्या स्मरणेन। हेतौ तृतीया। तस्य राज्ञो मनः स्तिमितं निलश्चमभवत्। तन्मयमभवदित्यर्थः। अक्षिणी नयने। अस्रैरश्रुभिरुज्झिते त्यक्ते च। तन्नयने वाष्पस्खलन प्राचुर्यात् तद्रिक्ते अभवतामित्यर्थः। अश्रुकणोऽपि वेदनां सान्त्वयति परं साम्प्रतं राज्ञो नयने तेनाऽपि रिक्ते अभवतोमिति भावः। राज्ञो वेदना दुःसहाऽऽसीदिति कवेस्तात्पर्यम्। क्षिप्रं तत्कालं कण्ठपथङ्गतं कण्ठस्थाने प्राप्तं वचो गिरं वक्तुं रसनया जिह्वया विस्मृतम्। काङ्क्षितमपि वचो वक्तुं न शशाकेत्यर्थः। दृशौ तल्लोचने कारासद्मनि कारागृहे दिवि स्वर्गे च वासिनां निवसतां मित्राणां हृच्चित्रे हृदिभवानि चित्राणि तै हृदयस्थचित्रै

र्व्याप्ते व्याप्ते अभवताम् । राज्ञो नयने च नकिञ्चिदपि वस्तु ददृशतुः। केवलं ते मृतानां बद्धानां च मूर्तीरेव सर्वत्राऽपश्यतामित्यर्थः । कर्णौश्रुती हाहाकाररवभ्रमेण हाहाकारः परिषत्सदस्यवधदिने प्रजाकृतकोलाहलः । स एव रवः शब्दस्तस्य भ्रमो भ्रान्ति स्तेन । भृशं यथातथा बधिरौ भूतौ च । राज्ञः कर्णौ सदा कोलाहलमेवाऽशृणुत न त्वन्यान् शब्दानित्यर्थः । सज्जनस्मरणेन राज्ञो मनो निश्चलं सञ्जातं, नयने वाष्पविवर्जिते सज्जन चित्राद्दते वस्त्वन्तरविलोकनाक्षमे च सञ्जाते, जिह्वाऽवाक् भूता कर्णौ सदा कोलाहलेनैव पूर्णौभूताविति भावः ।

लूना सुन्दरपुष्पमाल्यलतिका भूमौ तनोर्लुण्ठना-
च्छत्रं शारदपूर्णचन्द्रविशदं म्लानं च निःश्वासतः ।
रात्र्यो जागरणाद् गता नु दिवसा याता अनाहारतो
रिक्तोऽभूद्वलयेन तस्य नृपतेः कान्तः प्रकोष्ठोऽप्यहो ॥८॥

लूनेति । तनोः शरीरस्य भूमौ पृथिव्यां लुण्ठनात् । हेतौ पञ्चमी । सुन्दरमाल्यलतिका सुन्दरं यत्पुष्पमाल्यं तल्लतिकेव सुन्दरपुष्पमाल्यलतिका रुचिरकुसुमस्रग्वल्ली । लूनाच्छिन्ना । शारदपूर्णचन्द्रविशदं शरत्कालिकपूर्णेन्दुनिर्मलं छत्रमातपत्रं च निःश्वासतो म्लान मभवदितिशेषः । जागरणात् रात्र्यो

यामिन्यो गताः । अनिद्रया बह्व्यो रात्र्यो व्यतीता आसन्नि-त्यर्थः । अनाहारत आहाराग्रहणात् । 'आद्यादिभ्य उपसंख्यान' मित्यनेन तसिप्रत्ययः । क्वचित्प्रसज्य प्रतिषेधेऽपि नञ्समास इष्यते । यथाऽदर्शनमश्रवणमनुच्चारणमित्यादि । दिवसा दिनानि याता गताः । अतएव तस्य नृपतेः कान्तः सुन्दरः प्रकोष्ठोऽपि वलयेन कङ्कणेन । 'प्रकृत्यादिभ्य उपसंख्यान' मिति तृतीया । रिक्तः शून्योऽभूत् । राजाऽतिकृशोऽभूदित्यर्थः । अहो इत्याश्चर्यम् ।

स व्यर्थं पटुलासिकाभिरसकृन्मञ्जीरजै र्झङ्कृतै-
र्वीणाभिश्च कलस्वरप्रकटसद्ग्रामाभिरासेवितः ।
अन्तःस्थोऽवनिपस्य शोकदहनो बाह्यै र्विलासोदकैः
शाम्येद्धन्त ! कथं न काचिदपि तज्ज्ञातुं शशाकाऽबला ॥९॥

स इति । पटुलासिकाभिश्चतुरनर्तकीभिः । 'नर्तकीलासिके समे' इत्यमरः । मञ्जीरजैर्मञ्जरीभ्यो जातास्तै नूपुरोत्पन्नैः । 'मञ्जीरो नूपुरो स्त्रिया' मित्यमरः । "पञ्चम्यामजातौ" इति डप्रत्ययः । झङ्कृतै र्झङ्कारैः । कलस्वरप्रकटसद्ग्रामाभिः कला मधुरा ये स्वरा निषादर्षभादिस्वरास्तैः प्रकटः स्फुटितः सन्नुत्तमो

ग्रामः स्वरसङ्घातो यासां ताभिः । 'निषादर्षभगान्धार षडजमध्यमधैवताः । पञ्चमश्चेत्यमी सप्ततन्त्रीकण्ठोत्थिताः स्वरा' इत्यमरः । 'श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणनात्मकः । स्वतो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते' इतिरत्नाकरः । ग्रामलक्षणं यथा 'यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि । तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते ॥ षड्जग्रामे भवेदादौ मध्यम ग्राम एव च । गान्धारग्राम इत्येतद्ग्रामत्रयमुदाहृतम्' वीणाभिर्वल्लकीभिश्च 'वीणा तु वल्लकी' त्यमरः । स नृपोऽसकृन्मुहुर्मुहु र्व्यर्थं वृथाऽऽसेवितः । यतस्तस्य मनोविनोदो नाऽभून् । अवनिपस्य धरापतेरन्तःस्थो हृत्केन्द्रस्थितः शोकदहनः शोकाग्नि र्बाह्यैर्बहिर्भवैः । 'बहिषष्टिलोपो यञ्चे' त्यनेन यञ्प्रत्ययः । ञित्वाद् वृद्धिः । विलासोदकैर्विलास एवोदकानि तैर्विलासरूपजलैः, कथं केन प्रकारेण शाम्येत् शान्तो भवेत् । न शाम्येदित्यर्थः तत् विलासेन राजमनोविनोदो न भवतीति ज्ञातुं काचित् अबलाऽपि न शशाक । हन्तेति खेदे ।

आत्मन्येव च मन्त्रिणा दृढतरां दृष्ट्वा कृतां यन्त्रणां
किञ्चित् कर्तुमशक्त ईप्सितमलं राजा प्रजावत्सलः ।
चिन्तोद्विग्नमनाः पलायनमतिं कृत्वा वसन् सद्मनि
वेलामुत्कलयन् ततः कतिपयानब्दान् व्यतीयाय सः ॥१०॥

आत्मनीति । मन्त्रिणा सचिवेनाऽऽत्मनि स्वस्मिंश्चैव कृतां दृढतरां कठिनतरां यन्त्रणां नियन्त्रणां दृष्ट्वाऽऽलोक्येप्सितं काङ्क्षितं किञ्चिदलं पर्याप्तं यथा तथा कर्तुमशक्तोऽशक्नुवन् । अतएव चिन्तोद्विग्नमना चिन्ताखिन्नचित्तः स प्रजावत्सलो जनवल्लभो राजा त्रिभुवनः पलायनमतिं कृत्वा सद्मनि वसन् सन् वेलामनुकूलकालमुत्कलयन् प्रतीक्षां कुर्वंश्च ततः प्रतीक्षानन्तरम् । कतिपयान् बहूनब्दान् व्यतीयाय यापयामास ।

श्लोकत्रयेण सचिवस्थितिं द्योतयति—

राकाशीतमयूखदीधितिसितीभूतच्छदाच्छादिते
तल्पेऽनल्पविभावरीशवदनालावण्यलिप्ताननः ।
प्रेमोद्रेकसुधांशुरश्मिविगलच्चित्तेन्दुकान्तोपल-
दाक्षिण्यद्रवधौतधीरपि सदाऽमात्योऽभवच्चिन्तितः ॥११॥

राकेति । राकाशीतमयूखदीधितिसितीभूतच्छदाच्छादिते राकायाः पूर्णचन्द्रयुक्तपूर्णिमाया यः शीतमयूखश्चन्द्रस्तस्य दीधितयः किरणास्तैः सितीभूतो धवलितो यश्छदः प्रच्छदपटस्तेनाऽऽच्छादितं व्याप्तं तस्मिन् तथोक्ते । 'पूर्णे राका निशाकरे' इत्यमरः । तल्पे शय्यायाम् । अनल्पविभावरीशवदनालावण्यलिप्ता-

नतोऽनल्पोऽखण्डः पूर्ण इत्यर्थो यो विभावरीशो यामिनीश्वरश्चन्द्र इत्यर्थः स इव वदनं यस्याः सा, तस्या लावण्येन सौन्दर्येण लिप्तमुपदिग्धमाननं मुखं यस्य स तथोक्तः । प्रेमोद्रेक सुधांशुरश्मिविगलच्चित्तेन्दुकान्तोपलदाक्षिण्यद्रवधौतधीः प्रेम्णः प्रणयस्य य उद्रेक आधिक्यं स एव सुधांशुरश्मिश्चन्द्रकिरण स्तेन हेतुना विगलत् यच्चित्तं मानसं तदेवेन्दुकान्तोपलश्चन्द्रकान्त॰ प्रस्तरस्तस्य दाक्षिण्यमौदार्यमेव द्रवस्तेन धौता क्षालिता धीर्बुद्धिर्यस्य स तथोक्तः प्रेमप्राचुर्यविगलच्चित्तौदार्यपूतमति रित्यर्थः। चन्द्रोदये चन्द्रकान्तो द्रवत इति कविसम्प्रदायः । 'विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापति ' रित्यमरः । अपि। अमात्यो मन्त्री जुद्धशमशेर इत्यर्थः।सदा सर्वदा चिन्तितश्चिन्ता· युक्तोऽभवत् । अत्र रूपकालङ्कारः ।

द्यूताखेटनवाङ्गनास्वहरहो व्यासक्तचित्तोऽप्यहो ।
शाणासन्ततिषु प्रकृष्टगुणवानासीदसौ स्वच्छधीः ।
अस्याऽसत्यमपि प्रचार्य दुरितं भ्रात्रात्मजैः सर्वदा
काष्ठेनाग्निरिव व्यलोपि जगति स्तुत्यो गुणानां चयः।१२।

द्यूतेति । द्यूताखेटनवाङ्गनासु द्यूतं दुरोदरं चाऽऽखेटो

मृगया च नवाङ्गनाश्च युवत्यश्च तासु तथोक्तासु । 'पणेद्यूते दुरोदरम्' इति 'आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रिया' मिति चामरः । अहरहः प्रतिदिनं व्यासक्तचित्तो विशेषेणाऽनुरक्त मानसोऽपि । असौ जुद्धशमशेरः । राणासन्ततिषु राणासन्तानेषु राणाकुलजेष्वित्यर्थः । स्वच्छधी निर्मलबुद्धिः प्रकृष्टगुणवान् प्रचुरगुणसम्पन्नो दयादाक्षिण्यादियुक्त इत्यर्थः । आसीदहो इत्याश्चर्यार्थे । ईदृशोऽपि पुरुषः राणासन्ततिषु प्रकृष्टगुणवानासीदित्यनेनाऽन्ये राणाः कीदृशा आसन्निति स्वयं ज्ञेयाः अस्याऽनृतमसत्यमभूतमपीत्यर्थः । दुरितं दुश्चरितं सर्वदा नित्यम् । प्रचार्य जगति स्तुत्यः प्रशस्यो गुणानां चयो निचयः काष्ठेन दारुणाऽग्निरनल इव भ्रात्रात्मजैः पूर्वजसूनुभिर्मोहनववरादिभिरित्यर्थः । व्यलोऽपि विशेषेण लुप्तः कृतः, विपूर्वकलुप् धातोः कर्मणि लुङ् ।

आज्ञा या जनमारणाय विहिता पूर्वं मया निष्कृपं-
साऽन्यप्रेरणयाऽभवत् तदपि तत्पापं न मां मुञ्चति ।
इत्यालोच्य विषण्णधीः सचिवतां पद्माय दत्त्वाऽऽत्मनोः
धर्मार्थं मुनिवेषभृत् स निरगात् स्वाग्रोजधान्यास्ततः ।१३।

आज्ञेति । जनमारणाय गङ्गालालदशरथादिवधाय या

ऽऽज्ञाऽऽदेशो मया पूर्वं निष्कृपं निर्दयं यथातथा विहिता कृता दत्तेत्यर्थः । साऽऽज्ञाऽन्यप्रेरणया पूर्वजसूनुप्रेरणयाऽभवत् । तदपि तथापि तत्पापं जनमारणापराधो मां न मुञ्चति । इत्यालोच्य विषण्णधीः विषादयुक्तमतिः स जुद्धशमशेरः । आत्मनः स्वस्य सचिवतां मन्त्रित्वं पद्माय पद्मशमशेराय । दत्वा । ततस्तदनन्तरम् । धर्मार्थं धर्माय पापमोचनायेत्यर्थः । मुनिवेषभृत् पीताम्बरधारी सन् । राजधान्याः कान्तिपुर्याः स्राक् निरगात् निरयात् ।

सप्तभिः पद्मशमशेरशासनकालं वर्णयति—

शक्नोति स्म जनस्य भालिलिखितां दैवीमदृश्यां लिपिं-
वक्रां चारुतरां च कर्तुमसकृद् यां प्राप्य वै मानवः ।
वाचां शक्तिमुपेत्य तां विकचितं पद्मोऽपि पद्मं नवं
भृङ्गाणामिव मोदभाजनमभूद्राज्ञः प्रजानां च सः ॥१४॥

शक्नोतीति । मानवो नरो यः कोऽपि पुरुष इत्यर्थः । यां शक्तिं प्राप्य जनस्य । जातावेकवचनम् । भाललिखितां ललाटलिखितामदृश्यामदृष्टिगोचरां दैवीं लिपिं भाग्यरेखां वक्रां कुटिलां चारुतरां सुन्दरतरां चाऽसकृत् वारंवारं कर्तुं विधातुं श-

क्नोतिस्म । असुन्दरीं जनभाग्यरेखां सुन्दरीं, 'सुन्दरीमसुन्दरीं च कर्तु' मित्यर्थः । वै पादपूरणे । 'तु, हि च स्म ह वै पादपूरणे' मित्यमरः । रसाऽबाधकतया काव्यत्वे न दोषः । तां यच्छब्दनिर्दिष्टां वाचां वाणीनां शक्तिं सामर्थ्यम् [भाषायाम् हुकुम] उपेत्य प्राप्य प्रधानामात्यो भूत्वेत्यर्थः । स पद्मः पद्मशमशेरोऽपि राज्ञो नृपस्य प्रजानां च भृङ्गाणां भ्रमराणां विकचितं विकशितं नवं नूतनं पद्मं कमलमिव मोदभाजनं हर्षपात्रमभूत् ।

हा ! तेनाऽप्यबलेन दुर्नयविदो भ्रातुः कुनीत्या तत-
श्चक्रव्यूहनिरुद्धतेजस इवाऽवस्थाऽभिमन्योरिता ।
एकाकी सचिवस्तथापि स सुधीः प्राचीननायच्छदान्
द्रागैच्छत् परिवर्त्य शासनतरोः कर्तुं व्यवस्थां नवाम् ।१५।

हेति । ततो मन्त्रिपदप्राप्त्यनन्तरम् । अबलेन बलहीनेनाऽल्पबन्धुत्वात्, तेन पद्मेनाऽपि दुर्नयविदो दुष्टनीतिज्ञस्य भ्रातुरनुजस्य चन्द्रपुत्रस्येत्यर्थः । जातावेकवचनम् । कुनीत्या कुनयेन । हेतौ तृतीया । चक्रव्यूहनिरुद्धतेजसश्चक्रव्यूहे द्रोणकृतचक्रव्यूहे निरुद्धमवरुद्धं तेजो यस्य तस्य । अभिमन्योरर्जुनपुत्रस्येवाऽवस्था दशेता प्राप्ता । सर्वत्र बलवतः पितृव्यसूनोर्निषेधात् किञ्चित्

कर्तुं न शशाकेतिभावः। हेति खेदे। तथापि निषिद्धः सन्नपि सुधीः सुबुद्धिः स एकाकी सचिवो मन्त्री शासनतरोः शासनं राज्यशासनमेव तरुर्वृक्ष स्तस्य। प्राचीननायच्छदान् प्राचीनाः पुरातनाये नाया नयास्त एवच्छदाः पत्राणि तान् तथोक्तान् 'नयो नाये' इति 'पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्' निति चामरः। द्राक् झटिति परिवर्त्य नवां नूतनां व्यवस्थां कर्तुमैच्छत्।

चान्द्रं मण्डलमुन्नतिंस्म सहते नाऽम्लानपद्मस्य, तद्
दृष्ट्वा, लोचनमन्वकारि जगतां तन्म्लापनायाऽधुना।
शितादीर्धितराशितात्मजनताजाड्यान्धकारेण वा
प्रीत्या कारयता मुखं कमलवचोन प्रजाया लसत्।१६।

चान्द्रमिति। चान्द्रमैन्दवं पक्षे चन्द्रसूनुसम्बन्धि मण्डलं परिधि। अम्लानपद्मस्याऽमलिनकमलस्य पक्षेऽमलिनपद्मशमशेरस्योन्नतिं विकाशरूपोन्नतिं पक्षे समृद्धिं न सहतेस्म चन्द्रकमलयोरन्योन्यविरोधत्वात्, पक्षे पद्मशमशेरस्य चन्द्रशमशेरतनयानां च पारस्परिकचित्तमालिन्यात्। तत् दृष्ट्वा। अधुना सम्प्रति। तन्म्लापनाय तस्य चन्द्रमण्डलस्य पक्षे चन्द्रसूनुमण्डलस्य म्ला-

पनं मलिनीकरणं तस्मै तथोक्ताय। शिक्षादीधितिनाशितात्म-जनताजाड्यान्धकारेण शिक्षैव दीधितयः किरणा स्तै र्नाशित आत्मनः स्वस्य जनताया जनसमूहस्य यज्जाड्यं 'गुणवचन ब्राह्मणादिभ्यः कर्मणि चे' त्यनेन ष्यञ् प्रत्ययः। मूर्खत्वं तदेवाऽन्धकारो येन तेन तथोक्तेन। करणे तृतीया वाऽथवा प्रजाया मुखं प्रीत्या प्रेम्णा कमलवत् पद्ममिव लसत् विकचितं कारयता तेन पद्मशमशेरेण जगतां लोचनं जगच्चक्षुः सूर्य इत्यर्थः। 'कर्म-साक्षी जगच्चक्षुर्लोकबन्धुस्त्रयी तनु' रित्यमरः। अन्वकोन्य-नुक्तः। सूर्येणैव चान्द्रं मण्डलं मलिनं भवति अतश्चान्द्रमण्डल-मलिनीकरणाय पद्मेन सूर्यवदाचरितमिति भावः।

आसाद्याऽतुलभावमस्य मनसो धृत्यैकदा संहता
लब्धुं नागरिकाधिकारमलघौ स्वे संगरे सुस्थिराः।
हस्तन्यस्तसमुन्नतध्वजपटाः क्रन्दन्त उच्चै रवान्
पौरा दृष्टितृणीकृतारिनिशितास्त्रा निर्ययुश्चाध्वसु ॥१७॥

आसाद्येति। अस्य पद्मशमशेरस्य मनसोऽतुलभाव-मासाद्य प्राप्यैकदा जातुचित् धृत्या धैर्येण संहता एक-

A-(१३ अप्रिल १९४७ ई०)

अस्थाने स्थिताः। नागरिकाधिकारं पौराधिकृतिं लब्धुमलघौ महति स्वे निजे सङ्गरे प्रतिज्ञायां, प्रतिज्ञाजिसंविदापत्सु संगर ' इत्यमरः। सुस्थिराः। हस्तन्यस्तसमुन्नतध्वजपटा हस्तेषु भुजेषु न्यस्ता निहिताः समुन्नताः समुच्चा ध्वजपटाः पताकावस्त्राणि यैस्ते रवान् शब्दान् ('इन्कलाव जिन्दावाद' इति भाषायाम्) उच्चै र्यथातथा क्रन्दन्तो व्याहरन्तः पौराः नागरिकाः। दृष्टि-तृणीकृतारिनिशितास्त्रा दृष्ट्या तृणीकृतानि घासवत्कृतान्यरीणां शत्रूणां निशितानि तीक्ष्णान्यस्त्राणि यैस्ते तथोक्ताः। सन्तः। अध्वसु मार्गेषु। निर्ययुर्निर्जग्मुः।

निःशस्त्रस्य रणस्य पूर्णसफलत्वेनाऽन्विते भारते
नेपालस्य जनैरकारि बृहती 'काङ्ग्रेस' नाम्नी सभा।
सा संप्राप्य सहानुभूतिमधुरा वाचो महीपालत-
एवं भारतवर्षतोऽपि ववृधे शक्त्युल्लसन्ती सती ॥१८॥

निःशस्त्रस्येति। निःशस्त्रस्य शस्त्रहीनस्य रणस्य युद्धस्य हिंसारहितयुद्धस्येत्यर्थः। पूर्णसफलत्वेनाऽन्विते युक्ते भारते भारतवर्षे स्वतन्त्रभारतवर्ष इत्यर्थः। नेपालस्य जनैः काङ्ग्रेस

नाम्नी तदाख्या बृहती महती सभाऽकारि । सा सभा महीपालतो नेपालनरेशात् ‘ अपादने चाऽही यसहो ’ रित्यनेन तसि प्रत्ययः । एवं भारतवर्षतस्तदाख्यमित्रराष्ट्रादपि सहानुभूतिमधुराः सहानुभूत्या मधुरा मिष्टा वाचो वाणीः संप्राप्य समासाद्य शक्त्या रणोचितसाधनशक्त्योल्लसन्ती शोभमाना सती ववृध ऐधत ।

‘गङ्गातोयतरङ्गतुल्यतरलं किं जिवितं मन्यसे
देशस्योद्धरणाय रे युवक ते प्राणा भवन्तु प्रियाः ।
इत्थं गीतिमजस्रमम्बुचपले गङ्गोरसि श्रद्धया
गायन्ति स्म तरिङ्गता जनपदप्रेमाकुलाः सज्जनाः ॥१९॥

गङ्गेति । रे युवक ? रे तरुण ? कातरयुवकसूचनाय ‘रे’ शब्दस्य प्रयोगोऽत्र । गङ्गातोयतरङ्गतुल्यतरलं गङ्गाजलसदृशचपलं जीवितंजीविनं किं मन्यसे किं विचारयसि ? ते तव प्राणा देशस्य राष्ट्रस्योद्धरणायोत्थानाय प्रिया भवन्तु । देशकल्याणायैव त्वं जीवेत्यर्थः । इत्थं गीतिमम्बुचपले जलास्थिरे गङ्गोरसि भागीरथीवक्षसि तरिङ्गतास्तरणिं गताः ‘ नौस्तरणिस्तरि ’ रित्यमरः ।

जनपदप्रेमाकुला राष्ट्रानुरागाकुलाः सज्जनाः साधवः। अजस्रं नित्यं श्रद्धया गायन्तिस्म। 'गै शब्दे' धातो र्लुट्।

नेपाले जनशक्तिमाश्रयदयं पद्मोऽल्पबन्धुः पुन-
र्द्राङ् निष्कासयितुं स्वदेशत इहाऽमुं चन्द्रजोऽचेष्टत।
नैच्छत् त्यक्तुमसावमात्यकपदं तद्भ्रातृभीत्या तु हा!
बाष्पव्याकुलितेक्षणो हि^ निरगाद्राज्यान्महाकातरः।२०।

नेपाल इति। अयमल्पबन्धुरल्पबान्धवः पद्मः पद्मशमशेरः पुनर्नेपाले जनशक्तिं प्रजाशक्तिमाश्रयत् शिश्रिये। प्रजापक्षमाश्रितवानित्यर्थः। अमुं पद्मं स्वदेशतः स्वराष्ट्रतो द्राक् झटिति निष्कासयितुं निष्कासितं कर्तुं चन्द्रजश्चन्द्राच्चन्द्रशमशेराज्जातश्चन्द्रज श्चन्द्रशमशेरपुत्रः। जातावेकवचनम्। पञ्चम्यामजातौ' इतिडप्रत्ययः। इह नेपालेऽचेष्टत चेष्टामकरोत्। असौ पद्म स्तत् प्रसिद्धममात्यकपदं मन्त्रिपदं त्यक्तुं विहातुं नैच्छत् नाकाङ्क्षत्। तु किन्तु। भ्रातृभीत्याऽनुजभयेन महाकातरोऽतिभीरु र्बाष्पव्याकुलितेक्षणो बाष्पैरश्रुभि र्व्याकुलिते ईक्षणे नयने यस्य स तथोक्तः। सन राज्यान्निरगात निरयात्। हीति निश्च-

^ (८ फागुन २००४ वि)

यार्थं । हेति खेदे च । भ्रातृभीत्या रुदन् सन् राज्यान्निष्क्रान्त इतिभावः ।

मन्त्रित्वाय समुत्सुकः प्रियसुतं चन्द्रात्मजो मोहनः
पद्मस्याऽन्तिकमञ्जसा प्रहितवान् तत्त्यागपत्राय हि ।
सोऽपि [A]प्राप्य पितृव्यहस्तलिखितं तच्चात्मपित्रे ददौ
हृष्टस्तस्य पिता प्रधानसचिवोऽभूदन्तिमस्तत्कुले ॥२१॥

मन्त्रित्वायेति । मन्त्रित्वाय सचिवपदाय समुत्सुकश्चन्द्रात्मजश्चन्द्रशमशेरसूनुर्मोहनस्तदाख्योजनः । वाऽमोहनः । पद्मस्य पद्मशमशेरस्याऽन्तिकं निकटे प्रियसुतं प्रियपुत्रं विजयशमशेराख्यं सूनुमितीतिहासाज्ज्ञेयम् । अञ्जसा झटिति तत्त्यागपत्राय तस्य पद्मशमशेरस्य त्यागपत्रं तस्मै । प्रहितवान् प्रेषितवान् । हीति निश्चयार्थे । सोऽपि तत्पुत्रोऽपि ! पितृव्यहस्तलिखितं पद्मपाणिलिखितं तत् त्यागपत्रं प्राप्याऽऽत्मपित्रे निजजनकाय मोहनशमशेरायेत्यर्थः, ददौ । हृष्टः प्रसन्नस्तस्य पिता तत्कुले राणावंशेऽन्तिमः प्रधानसचिवः प्रधानमन्त्री । अभूत् ।

A[२६ अप्रिल १६४८ ई०]

आत्मामात्यनियन्त्रितोऽवनिपतिर्भाग्यप्रतीक्षां हृदि
कुर्वन् यापयतिस्म कालमनिलज्वालानिभं दुःसहम् ।
दुर्दैवेन तथापि तस्य तनयस्य प्रेयसी स्त्र्युत्तमा
जातु क्ष्मातलतो महेन्द्रनगरीं नीता महेन्द्रस्य हा !॥२२॥

आत्मेति । आत्मामात्यनियन्त्रितः स्वमन्त्रिप्रतिरोधितगतिः । अवनिपति महीपतिस्त्रिभुवन इत्यर्थः । हृदि हृदये भाग्यप्रतीक्षां कुर्वन् सन् ' दुःसहं सोढुमशक्यमनलज्वालानिभमग्निज्वलासदृशं कालं समयं यापयतिस्म । तथापि दुर्दैवेन दुर्भाग्येन जातु कदाचित् । तस्य नृपस्य तनयस्य पुत्रस्य महेन्द्रस्य स्त्र्युत्तमा स्त्रीषु नारीषूत्तमा श्रेष्ठा प्रेयसी वल्लभेन्द्रराज्यलक्ष्मीरित्यर्थः । क्ष्मातलतो भूतलात् । महेन्द्रनगरीं स्वर्गपुरीं नीता प्रापिता मृतेत्यर्थः । हेति खेदार्थसूचकमव्ययम् ।

प्रेयस्या निधनेन शोकविकलो भूपात्मजो निष्प्रभो
रोहिण्या रहितः शशीव मदनो रत्या विनेवाऽभवत् ।
वाष्पव्याकुललोचनो दशदिशः शून्याः स पश्यन्नपि
राणाशामननाशनाय न धियं तत्याज धीरो दृढाम् ॥२३॥

प्रेयस्या इति । प्रेयस्याः कान्ताया निधनेन मरणेन । हेतौ

तृतीया। शोकविकलः शुचाऽऽतुरः। भूपात्मजो राजसूनुर्महेन्द्र इत्यर्थः। रोहिण्या रहितः शशीचन्द्र इव, रत्या कामपत्न्या विना मदनः काम इव, निष्प्रभः प्रभाहीनोऽभवत्। वाष्पन्याकुललोचनोऽश्रुक्लिन्ननयनस्तदपि धीरः स महेन्द्रो दशदिशः शून्या पश्यन्नपि राणाशासननाशनाय राणाशिष्टिभङ्गायैकतन्त्रशासननिवारणायेत्यर्थः। देशहितायेति यावत्! दृढां स्थिरां धियं बुद्धिं न तत्याज नोज्झत्।

श्लोकत्रयेण जनजागर्तेः कारणान्याह—

खे मेघैरसितैर्वृतेऽपि चपला विद्युल्लता शोभते
भूभागे मलिनीकृतेऽपि तमसा खद्योत आद्योतते।
अज्ञानेन तथा ततेऽपि हृदये चित् सत्यमालम्बते
दीना मन्दतमा प्रजाऽपि न वृथा तस्या महाजागरा॥२४॥

ख इति। खे नभसि 'नभोन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्' इत्यमरः। असितैरशुक्लैः कृष्णैरित्यर्थः। मेघैर्जलदैर्वृते वेष्टितेऽपि। भावे सप्तमी। चपला चञ्चला। विद्युल्लता तड़िद्वल्ली शोभते राजते। भूभागे पृथ्वीभागे पृथिव्याः पूर्वगोलार्धभागे वा पश्चिमगोलार्धभाग इत्यर्थः। तमसाऽन्धकारेण मलिनी-

कृते ग्लापितेऽपि खद्योतो ज्योतिरिङ्गणः 'खद्योतो ज्योतिरिङ्गणः' इत्यमरः । आद्योतते द्युतिमावहते । तथा तेनैव प्रकारेण । हृदये चित्तो जनानामितिशेषः । अज्ञानेनाऽबोधेन । शिक्षाया अभावेन । तते व्याप्तेऽपि चिच्चैतन्यं सत्यमालम्बते । अतःप्रजा मन्दतमा मूढतमो 'अतिशायने तमविष्ठना' वित्यनेन तमप्प्रत्ययः । दीना दरिद्राऽपि तस्याः प्रजाया महाजागरा महती जागर्तिः । वृथा न भविष्यतीतिशेषः ।

या लोकद्वयसाधनी जनसभा युद्धोन्मुखी भारते
निर्याता जनसंहतिर्ध्वजभुजा या राजधान्याः पथि ।
या बाधा जननायकैरनुदिनं सोढा च कारागृहे
जागर्तेः किल ता जनस्य सकला आसन्निदानान्यहो ॥२४॥

येति । युद्धोन्मुखी रणतत्परो लोकद्वयसाधनी लोकयोः स्वर्गमर्त्यलोकयोर्द्वयं तस्य साधनी । जनकल्याणकृत्कार्यत्वात् परोपकारधर्मेण स्वर्गप्राप्तिहेतुर्नागरिकाधिकारप्राप्त्या भूलोकभोगप्राप्तिहेतुश्चेत्यर्थः । अथवा रणे मृताः स्वर्गं यान्तीति शास्त्रवचनम् । यथाह भगवान् श्रीकृष्णः । 'हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्' इति । अत एव लोकद्वयसाधनीत्यर्थः । या जनसभा काङ्ग्रेसनाम्नी सभा । भारते भारतवर्षे ।

आसीदित्तिशेषः । ध्वजभुजा ध्वजा भुजेषु यस्याः सा ध्वजभुजा केतनपाणिः ' पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रिया मित्यमरः । या जनसंहति र्जनसमूहः । (जुलूस इति भाषायाम्) ' स्त्रियां तु संहति र्वृन्दं निकुरम्बं कदम्बक ' मित्यमरः । राजधान्याः पथि मार्गे निर्याता । पद्मशमशेरराज्यशासनसमय इति बोद्धव्यम् । कारागृहे काराभवने जननायकै र्नेतृभिश्च या बाधो दुःखं सोढा । ताःपूर्वोक्ताः । सकलाः सर्वाः जनस्य प्रजायाः । जातावेकवचनम् । जागर्त जागरणस्य निदानानि कारणान्यासन् । किल निश्चयेन । अहो इत्याश्चर्यम् ।

येषां प्राणधनं प्रवालमिव संनद्धं पुरा पादपे
येषामुष्णभुशुण्डिकारसनया चास्वादितं जीवितम् ।
येषां बन्धनमन्दिरे समभवन्नन्त्यप्रयाणोत्सवा-
स्तेषां मङ्गलकामना वलमदुः स्वर्गात् प्रजाभ्यो ध्रुवम् ॥२६॥

येषामिति । येषां जनानां धर्मभक्तशुक्रराजादीनामित्यर्थः । प्राणधनं प्राणा असव एव धनमर्थः । पुरा प्राक् जुद्धराज्यकाल इत्यर्थः । पादपे वृक्षे प्रवालमङ्कुर इव संनद्धं संबद्धम् । येषां जनानां गङ्गालालदशरथादीनामित्यर्थः । जीवितं जीवन मुष्णभुशुण्डिकारसनयोष्णा तप्ता या भुशुण्डिकारसना तया च । आ-

स्त्रादितम् । येषां जनानां कृष्णप्रसादादीनामन्त्यप्रयाणोत्सवा अन्त्यप्रयाणाय महायात्रायै मृत्यव इत्यर्थः, उत्सवा उद्धवा-स्तथोक्ताः । दुःखातिशयान्मृत्युरप्युत्सव इवाभवदिति बोद्ध-व्यम् । बन्धनमन्दिरे कारागृहे समभवन् सम्यक् बभूवुः । तेषां पूर्वोक्तानां दिवङ्गतानां जनानां मङ्गलकामनाः शुभाकाङ्क्षाः स्वर्गात् प्रजाभ्यो बलं ददु ध्रु वमित्युत्प्रेक्षायाम् ।

अस्मान् किङ्ग्रसते ? न कान् ग्रसत आः, कङ्ग्रस्यते स्वं तया
राणां स्वैः पुरुषै र्नयैकनयनैरित्थं स्मृता सा सभा ।
भाषाया अपशब्दतो हि विदिता 'काङ्ग्रेस' इत्याख्यया
युद्धायाऽधिकसाहसाऽऽरभत चान्वेष्टुं महत् साधनम् ।२७।

अस्मानिति । किमस्मान् ग्रसते ग्रासंकरोति ? । आः को-पपीडार्थयोः प्रयुक्तः शब्दः । 'आस्तुस्यात् कोपपीडयो' रि-त्यमरः । कान् कांश्चिदपि जनान् न ग्रसते, शक्त्यभावात् । तया सभया स्वमात्मीयं कं सुखं ग्रस्यते ग्रासः क्रियते । राणाशक्ते-राधिक्यात् सा सभा राणोन्मूलनकर्मणि सफला न भविष्यति । अत स्तया निजं सुखं विनश्यत इतिभावः । नयैकनयनै र्नये नीतावेकमेव नयनं लोचनं न तु नयनद्वयं येषां तै स्तथोक्तैः । राणां स्वैरात्मीयैः पुरुषैर्जनैरित्थं स्मृता सा पूर्वोक्ता सभा

काङ्ग्रेसनाम्नी परिषद् । भाषाया वाण्या अपशब्दतोऽपभ्रंशतः । 'अपभ्रंशोऽपशब्दः स्या' दित्यमरः । काङ्ग्रेस इत्याख्यया 'काङ्ग्रेस' इत्यभिधानेन विदिता ज्ञाताऽधिकसाहसा प्रचुरोत्साहा सती युद्धाय रणाय राणाभिः सहयोद्धुमित्यर्थः । महत् बृहत् साधनमन्वेष्टुं गवेषयितुं चारभतऽऽरब्धवती । हीति निश्चये ।

तस्या ऋद्धिमतीं च शक्तिमभितः श्रुत्वोल्लसन्तीं मुहु-
राणां च प्रतिकूलतामुपगता येऽनीकिनीनायकाः ।
तान् व्यापादयितुं तथा नृपतये दातुं च तद्दूषणं
राज्ञो हस्तलिपिं व्यचेष्टत ततो मन्त्री समासादितुम् ॥२८॥

तस्या इति । तस्याः सभाया उल्लसन्तीं शोभमानामृद्धिमतीं वर्धमानां च शक्तिं सामर्थ्यमभितः सर्वत्र 'अभितः परितः समयानिकषा हा प्रति योगेऽपी' त्यनेन द्वितीया । मुहुर्वारंवारं श्रुत्वाऽऽकर्ण्य । येऽनीकिनीनायका अनीकिनीनां सेनानां नायका नेतारः 'ध्वजिनी वाहिनीसेना पृतनाऽनीकिनी चमू' रित्यमरः । राणां च प्रतिकूलतां वैपरीत्यमुपगताः प्राप्ताः । राणाप्रातिकूल्यमाचरितवन्त इत्यर्थः । तान् सेनानायकान् व्यापादयितुं मा-

रयितुं तथा तद्दूषणं मारणादोषं नृपतये त्रिभुवनाय दातु मात्मनो लोकापवादनिवारणायेति तात्पर्यम्। 'ततोऽनन्तरम्। राज्ञो नृपस्य हस्तलिपिं हस्ताक्षरं 'तान् मारये' ति हस्ताक्षरं समासादयितुं प्राप्तुं मन्त्री मोहनशमशेरः। व्ययेष्टत विशेषेण चेष्टामकुरुत। द्वादशभिः श्लोकैराज्ञो दिल्लीप्रस्थानं वर्णयति-

राजाऽपि प्रसमीक्ष्य साधुसमयं स्त्रीपुत्रपौत्रादिभि-
र्युक्तो मातुलमन्दिरे निवसतो बालैकपौत्रादृते।
आरूढो जविनं स्वतैलशकटं सञ्चालितं चात्मना
प्रासादान्मृगयाच्छलेन ^A^निरयाद्धृस्तायुधो धीरधीः ॥२९॥

राजेति॥ धीरधीः स्थिरबुद्धिः। राजाऽपि समयंकालं साधु सम्यक् यथातथाः प्रसमीक्ष्य समालोक्य विचार्येत्यर्थः। मातुलमन्दिरे मातृभ्रातृगृहे निवसतः स्थितात् बालैकपौत्रात् बालःशिशुश्चासावेकः पौत्रः पुत्रसूनु स्तस्मात्। ज्ञानेन्द्रवीरविक्रमादित्यर्थः। ऋते विना। मातुलगृहे स्थितत्वात्तद्रहित इत्याशयः। 'अन्यारादितरर्ते दिक्शब्दादि'त्यादि सूत्रेण पञ्चमी। स्त्रीपुत्रपौत्रादिभि र्भार्यासुतपौत्रादिभि र्युक्तः सहितः सन्। जविनं जवो वेगोऽस्याऽस्तीति जवी तं तथोक्तम्। 'अत इनि ठनौ' इत्यनेनेनि-

A (६ नवम्बर १९५० ई०)

प्रत्ययः । आत्मना स्वेन सञ्चालितं च स्वतैलशकटमात्ममृत्तर-मारूढः सन् । हस्तायुधो हस्त आयुधमस्त्रं यस्य स हस्तायुधः संश्च । मृगयाच्छलेन मृगयायाश्छलं मृगयाच्छलं तेन मृगयाच्छ-लेनाऽऽखेटव्याजेन प्रासादात् राजभवनात् (नारान् हिटीदर-वार इतिभाषायाम्) निरयात् निरगात् ।

नेपालाधिपतिः प्रशान्तनयनो गम्भीरभावोन्नतः
क्षात्रौजश्चयनिर्जितद्युमणिभापुञ्जः स चन्द्राननः ।
राणाशासननाशनाय दृढधी राजश्रियं प्रीणयन्
रुय्यं भारतराजदूतभवनं प्रागाऽभयं सत्वरम् ॥३०॥

नेपालेति ॥ प्रशान्तनयनः प्रशान्ते नयने लोचने यस्य सः । धैर्यातिशयादसम्भ्रमलोचन इत्यर्थः । गम्भीरभावोन्नतो गम्भीरभावेनाऽगम्याशयेनोन्नतः । गम्भीरभावस्योन्नतत्वे विरो-धाभासः । क्षात्रौजश्चयनिर्जितद्युमणिभापुञ्जः क्षात्रः क्षत्रियसम्ब-न्धी य ओजश्चय स्तेजोनिचय स्तेन निर्जितो विजितो द्युमणेः सूर्यस्य भासां तेजसां पुञ्जोराशिर्येन सः । द्युमणिस्तरणि र्मित्र-श्चित्रभानु र्विरोचन ' इति ' भाश्छविर्द्युतिदीप्तय' इति चामरः । अत्रातिशयोक्तिरलङ्कारः । चन्द्राननश्चन्द्र इन्दुरिवाऽऽननं वदनं यस्य स आह्लादकत्वात् सौन्दर्यातिशयत्वाच्च । ' निर्जित

सूर्यदीप्तिरपिचन्द्रानन ' इत्युक्तेर्विरोधाभासः । राणाशासन-नाशनाय राणाकृतराज्यशासनोन्मूलनाय दृढधीः स्थिरमतिः। नेपालाधिपति र्नेपालेश्वर स्त्रिभुवन इत्यर्थः । राजश्रियं राजलक्ष्मीं प्रीणयन् प्रसादयन् सन्। रम्यं सुन्दरं नृपवासयोग्यमित्यर्थः। अभयं भयरहितं राणाप्रत्यावर्तनभयहीनमित्यर्थः । भारतराज-दूतभवनं भारतादागतो यो राजदूतो राजसन्देशहरस्तस्य भवनं सदनं सत्वरं यथातथा तैलशकटस्य जवाधिक्यात् । प्राप प्राप्तवान्।

तत्राऽऽसाद्य च राजदूतविहितां भूपोचितां सत्कृतिं
मैत्र्या स्वप्रतिवेशिकं जिगमिषुः सम्राडभूत् भारतम् ।
कुर्वाणश्च तदीयसुन्दरविमानस्य प्रतीक्षां मुहुः
सानन्दे सदने दिनानि कतिचित् संयापयामास सः॥३१॥

तत्रेति ॥ तत्र राजदूतभवने च । स सम्राट् राजा । राज-दूतविहितां राजदूतकृतां भूपोचितां राजयोग्यां सत्कृतिमादर-मासाद्य प्राप्य स्वप्रतिवेशिकमात्मदेशनिकटवर्तिनं भारतं मैत्र्या मित्रत्वेन हेतुना जिगमिषु र्गन्तुमिच्छुरभूत्। ' सनाशंसभिक्षउः ' इति सन्नन्तात् गम् धातोरुः । तदीयसुन्दरविमानस्य भारतीय-चारुवायुयानस्य च प्रतीक्षां प्रतीक्षणं मुहुः कुर्वाणो विदधानः सन्

सानन्दे सदने दूतभवने कतिचिद्दिनानि संयापयामास गमयाञ्चकार।

दिल्लीनाथनिदेशतोऽवनितलादुड्डीय चाभ्रं गतः
सान्द्रश्यामलनीरदान्तरपथे लुप्तः क्षणाल्लक्षितः।
औत्सुक्यादसकृज्जनैः सुनयनैरुत्कन्धरैः प्रेक्षितः
शीघ्रं मन्द्ररवान्वितः पशुपतिक्षेत्रे विमानोऽपतत् ॥३२॥

दिल्लीति ॥ दिल्लीनाथनिदेशतो दिल्लीराष्ट्रपत्यादेशतः। अवनितलात् भूतलात्। उड्डीयोत्प्लुत्य। अभ्रं गतो गगनमितः। 'द्योदिवौ द्वे स्त्रियामभ्रं व्योमपुष्करमम्बर' मित्यमरः। सान्द्रश्यामलनीरदान्तरपथे सान्द्रा घनाः श्यामलाः कृष्णा एतादृशा ये नीरदा जलदास्तेषामन्तरपथेऽन्तरेऽभ्यन्तरे: पन्था मार्गस्तस्मिन्। "ऋक्पूरब्धूःपथामानक्षे" इत्यनेनाऽप्रत्ययः। 'कृष्णे नीलासितश्यामकालश्यामलमेचका' इत्यमरः। लुप्तोऽदृष्टः क्षणादचिरात् वेगाधिक्यात्। लक्षितो दृष्टश्च। चेति पूर्वार्धेन सम्बन्धः। औत्सुक्यादुत्कण्ठाया हेतोरसकृन्मुहुर्मुहुरुत्कन्धरैरुन्नतग्रीवैः सुनयनैः स्तीक्ष्णलोचनैरत्युन्नत्यामुड्डीयमानत्वात्। प्रेक्षितोऽवलोकितो मन्द्ररवान्वितो गम्भीरशब्दयुक्तः 'मन्द्रस्तु गम्भीर' इत्यमरः। विमानो वायुयानं पशुपतिक्षेत्रे पशुपतेः शङ्करस्य

पशुपतिरित्याख्यया प्रसिद्धस्य शिवस्येत्यर्थः। क्षेत्रेभूमौ (पशुपति गौचर इति भाषायाम्) शीघ्रमपतत्सत्वरमायया।वित्यर्थः। अत्र स्वभावोक्तिरलङ्कारः।

धीरः संहतपौरवृन्दविहिताद्रक्षाप्रबन्धादसौ
स्वैरं मार्गमियाय तैलशकटारूढः स जायादिकः।
पौरान् हारिवचोभिरक्षिसलिलासिक्तैः समाश्वासयन्
राष्ट्रस्योत्तमनायकः सपदि तत् क्षेत्रं प्रतस्थे ततः ॥३३॥

धीर इति ॥ धीरो धृतियुक्तः सजायादिकः स्त्रीपुत्रपौत्रसहितः। 'वोपसर्जनस्ये' त्यनेन सहशब्दस्य सादेशः। 'शेषाद्विभाषे' ति कप्रत्ययश्च। तैलशकटारूढोमृत्तरथः। असौपूर्वोक्तो राष्ट्रस्य राज्यस्योत्तमनायकः श्रेष्ठनेता संहतपौरवृन्दविहितात् संहता एकत्रस्थाने स्थिता ये पौरा नागरिकास्तेषांवृन्देन समूहेन विहितात् कृतात् रक्षाप्रबन्धात् रक्षाव्यवस्थाया मार्गं पन्थानं स्वैरं स्वच्छन्दं यथातथा। इयाय जगाम। इण्धातोर्लिट्। ततस्तदनन्तरम्। अक्षिसलिलासिक्तै र्नयनजलैरासमन्तात् सिक्तानि तैः। हारिवचोभि र्हारीणि च तानि वचांसि तै र्हृदयहारिवचनैः पौरान् नागरिकान् समाश्वासयन् सम्यक् आश्वासनं कुर्वन् सन्। सपदि सद्यः। तत् पूर्वोक्तं क्षेत्रं पशुपतिक्षेत्रमित्यर्थः। प्रतस्थे प्रस्थितवान्।

द्वे राजी पुरवेश्मनां घनलिहां रेजेऽन्तरा वर्त्मनि
रम्याट्टादिनिपातितैरुभयतः सिन्दूरपूरैरसौ ।
सप्ताश्वस्य नवांशुकैररुणितं भित्तिद्वयाधःपतत्
प्रालेयं निदधान उच्चधरयोरन्तश्चलन् सिंहवत् ॥३४॥

द्वे इति ॥ असौ त्रिभुवनः। कर्तृ पदम्। घनलिहां मेघचुम्बि-नां पुरवेश्मनां नगरगृहाणां द्वे राजी उभे श्रेण्यावन्तरा मध्ये वेश्म श्रेण्योर्मध्य इत्यर्थः। 'अन्तरान्तरेण युक्ते' इति द्वितीया। 'गृहं गेहोदवसितं वेश्म सद्म निकेतनम्' 'वीथ्यालि रावली पङ्क्तिः श्रेणीलेखास्तु राजय' इत्युभयत्राप्यमरः। वर्त्मनि मार्गे। उभ-यतः सद्मश्रेणिद्वयादित्यर्थः। रम्याट्टादिनिपातितै रम्याः सुन्दरा येऽट्टाः क्षौमाणि त आदय स्तेभ्यो निपातिता स्तै स्तथो-क्तै। 'स्यादट्टः क्षौममस्त्रिया' मित्यमरः। सिन्दूरपूरैः सिन्दूर-निचयैः। करणैः। सप्ताश्वस्य सूर्यस्य। 'भास्वद्विवस्वत्सप्ताश्वहरि-दश्वोष्णरश्मय' इत्यमरः। नवांशुकै र्नवा अंशवो नवांशव स्त एव नवांशुकास्तै स्तथोक्तै र्नूतनकिरणैररुणितमरुणं कृतमरुणितं शोणितं रक्तमित्यर्थः। 'तारकादित्वादि' तच्प्रत्ययः। 'प्रालेय' मित्यस्य विशेषणं चेतत्। भित्तिद्वयाधः पतत् भित्त्योः कुडययो-र्यत् द्वयं तस्मादधः पतत् नीचैः स्खलत्। 'भित्तिः स्त्रीकुडय'

मित्यमरः। एतादृक् प्रालेयं हिमम्। 'अवश्यायस्तु नीहार स्तुषार स्तुहिनं हिमम्। प्रालेयं मिहिके' त्यमरः। निदधानो धारयन् 'उच्चधरयो. रुच्चावुन्नतौ यौ धरौ पर्वतौ तयो स्तथोक्तयोः। महीध्रे शिखरिक्ष्माभृदहार्य धरपर्वता' इत्यमरः। अन्तश्चलन्नन्तर्गच्छन् सिंह वत् केशरीव। रेजे शुशुभे। पुरसद्मश्रेण्योरन्तर्वर्तिमार्गेऽसौ नृप उभयतोऽट्टादिस्थै र्जनैः पातितैः सिन्दूरपूरै स्तथा बभौ यथा सूर्यकिरणारुणितं पर्वतयो र्भित्तिद्वयात् पतद्धिमं धारयन् तत्पर्वन्तान्तश्चलन् सिंहो विभाति। अत्रपूर्णोपमालङ्कारः।

अन्तःप्रोज्ज्वलदुग्रमन्युदहनज्वालावलीढं मुखं
सद्यो राज्यवियोगजन्यनयनाम्भोबिन्दुभिः क्षालयन्।
आशाम्बु प्रवहत् स्वकीयविरहोत्पन्नव्यथापस्तथा
नृणां तत्र विलोकयन्नयनयो राष्ट्रप्रियोऽसौ ययौ ॥३५॥

अन्तरिति ॥ अन्तःप्रोज्ज्वलदुग्रमन्युदहनज्वालावलीढमन्तर्हृदि प्रोज्ज्वलन्नुद्दीप्यमान उग्रमन्युरतिशोक एव दहनोऽनल स्तस्यज्वालेन शिखयाऽवलीढं व्याप्तं तत् तथोक्तम्। 'मन्युशोकौ तु शुक् स्त्रियाम्' 'हिरण्यरेता हुतभुग्दहनो हव्यवाहनः' 'वह्ने र्द्वयो र्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रिया' मिति सर्वत्रा

मरः। मुखं वदनम्। सद्योराज्यवियोगजन्यनयनाम्भोविन्दुभिः सद्यः सपदि यो राज्यात् राष्ट्रात् वियोगो विरहस्तस्माज्जन्या जाता ये नयनाम्भोबिन्दवो नेत्रवारिकणास्तैस्तथोक्तैः। क्षालयन् प्रक्षालयन्। अश्रुपूर्णमुख इत्यर्थः। तत्र मार्गे नृणां जनानां नयनयो र्लोचनयोः प्रवहत् प्रकर्षेण वहत्। आशाम्बवाशाऽभिलाष एवाम्बुजलं तत्तथोक्तम्। राणान् विजित्य राजा प्रत्यावर्तेतेत्याशा। तथा स्वकीयविरहोत्पन्नव्यथापः स्वकीयविरहेण निजवियोगेन राजवियोगेनेत्यर्थः, उत्पन्ना या व्यथाः पीडा स्ता एवाऽऽपो जलानि तास्तथोक्ताः। विलोकयन् पश्यन्। राष्ट्रप्रियो देशवल्लभोऽसौ राजा ययौ जगाम।

नीरन्ध्रास्तरुराजयोऽपि न तथा राज्ञः पुरस्ताद् यथा
राजन्तेस्म विशालवर्त्मतटयोः सान्द्रस्थितास्ताः प्रजाः।
पश्चादध्वनि तु प्रकामतुमुलत्वेन प्रजासंहति-
रुत्तुङ्गोर्मिसमुद्रभासमधिकां भेजे 'जयं' भाषिणी ॥३६॥

नीरन्ध्रा इति ॥ राज्ञः पुरस्तादग्रे निरन्ध्रा निश्छिद्रा स्तरुराजयो वृक्षपङ्क्तयोऽपि तथा तेन प्रकारेण न राजन्तेस्म यथा विशालवर्त्मतटयो र्विशालमार्गोपान्तयोः सान्द्रस्थिताः सान्द्रं घनं यथातथा स्थिता वर्तमानाः ताः प्रजा जना राजन्तेस्मेति

पूर्वेणान्वयः । पश्चाद्राज्ञः पश्चादध्वनि मार्गे तु जयं भाषिणी 'जय' मिति वादिनी प्रजासंहतिः प्रजासमूहः प्रकामतुमुलत्वेनाऽति सङ्कुलत्वेनाऽधिकामत्यर्थमुत्तुङ्गोर्मिसमुद्रभासमुत्तुङ्गा उन्नता ऊर्मयो वीचयो यस्मिन् स एतादृशो यः समुद्रः सागरस्तस्येव भाश्छविस्तां तथोक्तां भेजे प्राप ।

स्रक्सिन्दूररजस्ततो रविनिशेशाकारनेत्रद्वय-
श्चक्रैस्तीव्रगतैश्चतुर्भिरुचितं धावंश्च रम्येऽध्वनि ।
आरूढो धरणीश्वरेण शकटस्तैलेन सञ्चालितः
प्राप स्निग्धवपुः सघर्घररवः क्षेत्रं विमानान्वितम् ॥३७॥

स्रगिति ॥ स्रक्सिन्दूररजस्ततः स्रङ्माल्यं सिन्दूरो रक्तचूर्णविशेषस्तयो रजोभिर्धूलिभि स्ततो व्याप्तः । रविनिशेशाकारनेत्रद्वयः रविः सूर्यश्च निशेशश्चन्द्रश्च तयोरिवाऽऽकारौ ययोस्ते रविनिशेशाकारे वर्तुलत्वात्, शुभ्रत्वाच्च, इत्थं ये नेत्रे तयोर्द्वयं यस्मिन् स तथोक्तः । तीव्रगतैस्तीव्रगमनैश्चतुर्भिश्चतुः सङ्ख्यकैश्चक्रै रथाङ्गै रम्ये सुन्दरेऽध्वनि मार्गे । उचितं यथातथा धावंश्च नातिवेगेन गच्छन्नित्यर्थः । धरणीश्वरेण पृथ्वीशेनाऽऽरूढः कृतारोहणस्तैलेन स्निग्धद्रवविशेषेण सञ्चालितः स्निग्धवपुः स्निग्धदेहः सघर्घररवो घर्घरशब्दसहितः शकटो मृत्तरो विमानान्वितं वायु-

यानयुक्तं क्षेत्रं पशुपतिक्षेत्रं प्राप। अत्र स्वभावोक्तिरलङ्कारः।

आदित्योऽथ चकार चारुकिरणोल्लासैरमुं स्वागतं
धुन्वाना करयुग्ममस्य जनता चक्रे प्रयाणोत्सवम्।
वाताः शीकरिणो ववुः प्रणयिनां बाष्पं वहन्तस्तदा
ज्ञातां गामपहाय तत्क्षणमसौ द्यां नूतनां सस्वजे ॥३८॥

आदित्य इति॥ अथ पशुपतिक्षेत्रगमनानन्तरम्। आदित्यः सूर्यश्चारुकिरणोल्लासैश्चारवः सुन्दरा अतापङ्करा इत्यर्थः, ये किरणा दीधितयस्तेषामुल्लासा विकाशास्तैः। अमुं नृपं स्वागतं चकार। करयुग्मं पाणिद्वयं धुन्वाना कम्पयन्ती जनता जनसमूहोऽस्य राज्ञः प्रयाणोत्सवं यात्रोद्भवं चक्रे। प्रणयिनां प्रेयसां जनानां बाष्पं नयनजलं वहन्तो धारयन्तोऽत एव शीकरिणः शीकरा जलकणाः सन्ति येषु ते। वाताः पवनास्तदा तस्मिन् दिने ववुर्वान्ति स्म। वाधातो लिंट्। आर्द्रत्वेन शीताः पवमाना ववुरित्यर्थः। तत्क्षणं सपदि। असौ राजा। ज्ञातां विदितामनुभूतामित्यर्थः। गां पृथ्वीमपहाय त्यक्त्वा नूतनामज्ञातामननुभूतामित्यर्थः। द्यामाकाशं सस्वज आलिलिङ्ग। पृथ्वी

त्यक्त्वा विमानादाकाशं गतवानित्यर्थः । अनुभूतां स्त्रियं त्यक्त्वा नवामालिङ्गन् नायक इवाऽसौ राजा रेज इति व्यङ्ग्यार्थो बोद्धव्यः ।

कौबेर्यां दिशि बिभ्रतीं हिममयीं भूषामिवाऽगावलिं
मध्ये शैलनितम्बिनीं गिरिसरिन्मार्गैर्विभक्ताकृतिम् ।
अन्त्ये चारुसमस्थलीं वनमयै र्नीलाम्बरै राजितां
रम्यां सूक्ष्मविभाविनां निजभुवं सोऽपश्यदाकाशतः ॥३९॥

कौबेर्यामिति ॥ कौबेर्यां कुवेरस्य धनाधिपस्येयं कौबेरी तस्याम् । दिशि काष्ठायामुत्तरस्यां दिशीत्यर्थः । 'तस्येद' मित्यण् " टिड्ढाणञ् " त्यादिना ङीप् । अगावलिं न गच्छन्तीत्यगाः पर्वतास्तेषामावलिः पङ्क्तिस्ताम् । हिममयीं तुषारयुक्ताम् । 'तत्प्रकृतवचने मयट्' इति मयट् । भूषामलङ्कृतिमिव बिभ्रतीं दधानाम् । मध्ये मध्यभागे शैलनितम्बिनीं शैलानां पर्वतानां नितम्बाः कटकाः सन्ति यस्यां सा तां तथोक्ताम् । 'कटकोऽस्त्री नितम्बोऽद्रे' रित्यमरः । गिरिसरिन्मार्गैः शैलनदीपथै र्विभक्ताकृतिं विभक्ता पृथक्कृताऽऽकृतिराकारो यस्यास्ताम् । अन्त्ये राज्यस्य दक्षिणदिगन्ते । चारुसमस्थलीं चारुः सुन्दरी समस्थली समभू

र्यस्यां सा ताम् । वनमयै र्नीलाम्बरैः श्यामलवस्त्रै राजितां शोभितां रम्यां रमणीयां सूक्ष्मविभावितामीषदवलोकितामतिदूरत्वात् । निजभुवं स्वधरां स राजाऽऽकाशतो गगनतः । 'अपादाने चाऽहीयसहो' रित्यनेन तसि प्रत्ययः । अपश्यत् ददर्श । सालङ्कारांनितम्बिनीं नीलवस्त्रशोभमानां रमणीयां स्त्रियमिव निजभुवं स ददर्शेति व्यङ्गार्थो बोद्धव्यः ।

नेपालस्य भुवो धनैरुपचितां रम्यां विशालां क्षणात्
पश्यन् भारतवर्षभूमिमभितः प्राप्तः स दिल्लीपुरीम् ।
राज्ञः सादरभारतीयपुरुषाश्चक्रुः परां सत्कृतिं
काङ्ग्रेसाख्यसभा ततो निजनृपाल्लेभे सदाश्वासनम् ॥४०॥

नेपालस्येति ॥ नेपालस्य भुवः पृथिव्या धनैरर्थैः प्रकृतिदत्तैर्धनैरित्यर्थः । उपचितां व्याप्तां रम्यां रमणीयां विशालामनल्पां भारतवर्षभूमि मभितः परितः पश्यन् विलोकयन् स नृपः क्षणादचिरेण दिल्लीपुरीं दिल्लीसंज्ञिकां नगरीं भारतवर्षराजधानीमित्यर्थः । प्राप्तः । सादरभारतीयपुरुषा आदरेण सहिताः सादरा स्ते च ते भारतीय पुरुषा भारतस्थजना राज्ञो भूपालस्य परामुत्तमां सत्कृतिं सत्कारं चक्रुः । ततो दिल्लीगमना-

नन्तरम् । काङ्ग्रेसाख्यसभा तदाख्यजनपरिषत् । निजनृपात् स्वकीयनरेशात् । सदा नित्यम् । आश्वासनं लेभे ।

नेपाले जननायकेन रहिते रिक्ते च सिंहासने
राणाभि धंरणीश्वराय सकलो दोषो ह्यदाय्युन्मदैः ।
मातृभ्रातृगृहस्थभूपसुतजं ज्ञानेन्द्र^मासिच्य ते
चक्रू रिक्तनृपासनं नृपतिना संशोभितं सत्वरम् ॥४१॥

नेपाल इति ॥ नेपाले नेपालदेशे जननायकेन प्रजानायकेन राज्ञेत्यर्थः । रहिते शून्ये सति । भावे सप्तमी । अतएव सिंहासने नृपासने च रिक्ते सति । अत्राऽपि भावे सप्तमी । उन्मदैरुत्कृष्टो मदोऽभिमानो येषां तैः । राणाभिः सकलः समग्रो दोषः सिंहासनरिक्तीकरणरूपापराधः । धरणीश्वराय पृथ्वीपतये त्रिभुवनायेत्यर्थः । अदायि दत्तः । हि निश्चयार्थे । त्रिभुवनो राष्ट्रद्रोहीति घोषित इत्यर्थः । ते राणा मातृभ्रातृगृहस्थभूपसुतजं मातुलनिकेतनवर्तिराजपौत्रं ज्ञानेन्द्रं तदाख्यं बालकमासिच्य नृपत्त्वेनाऽभिषिच्य । रिक्तनृपासनं रिक्तं राजरहितं यन्नृपासनं भद्रासनं तत्तथोक्तम् । नृपतिना संशोभितं नृपतिराजितं सत्वरं शीघ्रं यथातथा चक्रुः । सिंहासनमरिक्तं चक्रुरित्यर्थः ।

A (८ नवम्बर १९५० ई०)

नृपस्याज्ञाधीनं सचिवपदमत्राऽवनितले
न मन्त्री भूपालं क्वचिदपि नियोक्तुं प्रभवति ।
नियुक्तो नेपाले शिशुरपि नृपत्वाय सचिवै-
रतस्तानुत्खातुं मतिमिह दधौ 'राज'जनता ॥४२॥

इति श्रीभरतराजशास्त्रिकृतौ महेन्द्रोदये महाकाव्ये राजाङ्के त्रिभुवनदिल्लीप्रस्थानं नाम पञ्चमः सर्गः ॥५॥

नृपस्येति ॥ अत्राऽस्मिन्नवनितले । सचिवपदं नृपस्य नृन् पातीतिनृपस्तस्य नरपते राज्ञो वा राष्ट्रपतेरित्यर्थः । आज्ञाधीन मादेशाधीनमस्तीति शेषः । न केवलं राजतन्त्रात्मके देशे प्रजातन्त्रात्मकेऽपि सीमिताधिकारस्याऽपि नृपस्य वा राष्ट्रपते-राज्ञयैव प्रतिनिधिसभासदस्येष्वेकः प्रधानामात्यपदे नियुक्तो भवति। अत एवा'ऽवनितल' इति पदं निर्धारितम् । क्वचिदपि कुत्राऽपि स्थले । मन्त्री सचिवो भूपालं राजानं नियोक्तुं नियोगं कर्तुं न प्रभवति न समर्थो भवति। इह नेपाले शिशुरपि बालको ऽपि । सचिवै र्मन्त्रिभि र्नृपत्वाय भूपत्वाय। 'तस्य भावस्त्वतलौ' इत्यनेन त्वप्रत्ययः। नियुक्त आदिष्टः । अतोऽस्मात् कारणात् । राजजनता भूपप्रजासमूहः। 'ग्रामजनबन्धुभ्यस्तलि' ति तल्प्रत्ययः। तान् पूर्वोक्तान् सचिवान् सचिववन्धून् उत्खातुमुन्मलयितुं मतिं

बुद्धिं दधौ धारयामास । सर्गान्ताद् वृत्तभेदः । शिखरिणी वृत्तम् । "रसैरूद्रैश्छिन्ना यमनसभलागः शिखरिणी" इति लक्षणात् ।

इति श्रीशङ्करशास्त्रिणा विरचिते महेन्द्रोदये-
काव्यव्याख्याने कुञ्चिकाख्ये पञ्चमः सर्गः ॥५॥

षष्ठः सर्गः

ᴬयस्मिन् दिने दूतगृहान्नृपो ययौ
तस्यापऽरस्मिन् दिवसे ससाहसा।
स्वदेशसीमानमुपेत्य सायुधा
युधे प्रतस्थे परिषद्-बरूथिनी ॥१॥

यस्मिन्निति ॥ यस्मिन् दिने नृपस्त्रिभुवनः । दूतगृहात् भारतराजदूतभवनात् ययौ दिल्लीं जगाम । तस्याऽपरस्मिन्नन्यस्मिन् दिवसे। ससाहसा साहसेनोत्साहेन बलेन वाऽन्विता सहिता तथोक्ता। 'तेन सहेतितुल्ययोगे' इत्यनेन समासः । 'वोपसर्जनस्ये' त्यनेन सहशब्दस्य सादेशः। सायुधा सशस्त्रा परिषद्वरूथिनी सभासेना काङ्ग्रेससेनेत्यर्थः । 'समज्या परिषद् गोष्ठी सभासमितिसंसदः' बरूथिनी बलंसैन्यं चक्रं चानीकमस्त्रिया' मित्युभयत्राप्यमरः । स्वदेशसीमानं स्वदेशस्य नेपालस्य सीमानं दक्षिणसीमा मुपेत्य प्राप्य। युधे युद्धाय प्रतस्थे

A–(१० नवम्बर १९५० ई०)

प्रस्थानं चक्रे । सर्गेऽस्मिन् वंशस्थेन्द्रवज्रयोर्मिश्रणत्वादुपजाति-वृत्तम् । 'अनन्तरोदीरितलक्ष्मभाजौ । पादौ यदीयावुपजात-यस्ताः ॥ इत्थं किलान्यास्वपि मिश्रितासु । वदन्ति जातिष्विदमेव नाम ॥' इति लक्षणात् ।

पदाहतक्ष्मातलतः समुत्थितै-
रजोभि रभ्रं प्रथमं धरायितम् ।
युद्धाग्रगीतै र्जलमुग्रवैरिव
जयस्वनैर्भू र्गगनायिता ततः ॥२॥

पदेति ॥ पदाहतक्ष्मातलतः पदैश्चरणैराहतमासमन्तात् पीडितं यत्क्ष्मातलं भूतलंततः । 'पदंव्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तु' ष्वित्यमरः । समुत्थितैरूर्ध्वं गतै रजोभि र्धूलिभिः । अभ्रमाकाशः 'द्योदिवौ द्वे स्त्रियामभ्रं व्योमपुष्करमम्बर' मित्यमरः । प्रथमं प्राक् । धरायितं धरावत् आचरितम् । 'कर्तुः क्यङ् सलोपश्च' इत्यनेन क्यङ्प्रत्ययः क्तप्रत्ययश्च । ततस्तदन्तरम् । युद्धाग्रगीतैर्युद्धस्याऽग्रे प्रथमं गीता उदिता स्तैः । जलमुग्रवै र्जलानि मुञ्चन्तीति जलमुचोमेघा स्तेषां रवाघोषा स्तैरिव जयस्वनै र्जयघोषैर्भूः पृथ्वी गगनायिताऽऽकाशवत् कृता ।

दिदृक्षमाणा बृहतीं चमूमिमा-
मात्मान एयुर्गगनं दिवङ्गताः ।
प्रजायुधेभ्यो विजयेप्सया ध्रुवं
तेऽमोघशक्तिं विददुः परोक्षतः ॥३॥

दिदृक्षमाणेति ॥ इमां बृहतीं महतीं चमूं सेनां दिदृक्षमाणा द्रष्टुमिच्छन्तः । दृशेः सन्नन्ताल्लटः शानजादेशः । 'ज्ञाश्रुस्मदृशां सनः' इत्यात्मनेपदम् । दिवङ्गवाः स्वर्गं गता आत्मानो जीवा गङ्गालालादीनां दिवङ्गता आत्मान इत्यर्थः । गगनमाकाशमेयु राजग्मुः । आङुपसर्ग पूर्वकात् 'इणधातो' र्लिट् । 'दीर्घइणः किति' इत्यभ्यासदीर्घः । ते जीवाः । विजयेप्सया जयकाङ्क्षया प्रजायुधेभ्यो जनहेतिभ्यः परोक्षतोऽप्रत्यक्षतोऽमोघशक्ति मनिष्फलशक्तिं विददु ध्रुवम् ।
दशभिः 'श्लोकै र्वीरगञ्ज' युद्धं वर्णयति—

भुजे गृहीत्वाऽतिलघुं भुशुण्डिकां
विलोक्य चात्मानुसरां बरूथिनीम् ।
निदेशयामास पटुश्चमूपतिः
प्राग् 'वीरगञ्जा' क्रमणाय तां ततः ॥४॥

भुज इति ॥ ततः प्रस्थानानन्तरम्। अतिलघुमगुरुमेकहस्त-ग्रहणयोग्यामित्यर्थः । भुशुण्डिकां भुशुण्डिरेव भुशुण्डिका ताम्! अल्पार्थे कप्रत्ययः । हेतिविशेषम् (पिस्तवाल इति भाषायाम्) भुजे हस्ते गृहीत्वा धृत्वा । बरूथिनीं सेनामात्मानुसरामात्मानुगामिनों च विलोक्यदृष्ट्वा पटुश्चतुरश्चमूपतिः सेनापतिः स्थिरवंमल्लाख्यो वीर इत्यर्थः । प्राक् प्रथमं वीरगञ्जाक्रमणाय वीरगञ्जे तदाख्यप्रदेश आक्रमणं तस्मै । तां सेनां निदेशयामासाऽऽज्ञापयामास ।

समुच्छलत्सागरलोलवीचिका-

श्रियं दधाना बहुमृत्तरस्थिताः ।

युद्धोद्भटा वीरभटास्तडिच्छटां

विजित्य चात्मायुधतेजसाऽचलन् ॥५॥

समुच्छलदिति ॥ बहुमृत्त्तरस्थिता मृत्सु तरन्तीति मृत्तरास्तैलशकटा बहवोऽनल्पाश्च ते मृत्तरा बहुमृत्तरास्तेषु स्थिता निषण्णाः । अत एव समुच्छलत्सागरलोलवीचिकाश्रियं समुच्छलन्त्यः संवर्धमानाः सागरस्य समुद्रस्य या लोलाश्चपला वीचिका ऊर्मय स्तासां श्रीः शोभातां तथोक्ताम् । दधाना बिभ्राणाः । बहुमृत्तरस्थितत्वात् सागरोच्छलल्लोलोर्मितुलया इत्यर्थः । युद्धोद्भटा

रणोद्धता वीरभटा वीरसैनिकाः। आत्मायुधतेजसा निजहेतिदीप्त्या तडिच्छटां विद्युच्छटां च विजित्याऽचलन्नगच्छन्।

सौदामनीवाऽरिगणैर्विलोकिता
भुशुण्डिकानिःसृतचण्डवह्निभाः।
आकर्णितः स्फूर्जथुहेतिजध्वनिः
परन्तु तेऽचेतनतां गताः क्षणात्॥६॥

सौदामनीति॥ अरिगणैः शत्रुवृन्दैः राणाचमूवृन्दैरित्यर्थः। भुशुण्डिकानिःसृतचण्डवह्निभा भुशुण्डिकाभ्यो निःसृता निर्गता ये चण्डा वह्नयोऽग्नयस्तेषां भाश्छविस्तथोक्ता। सौदामनी विद्युदिव विलोकिता दृष्टा। 'तडित्सौदामनी विद्युच्चञ्चला चपला अपी' त्यमरः। स्फूर्जथुहेतिजध्वनि र्हेतिभ्य आयुधेभ्यो जातो हेतिजः। एतादृशो ध्वनिर्घोषो हेतिजध्वनिः स्फूर्जथु र्वज्रनिर्घोष इव हेतिजध्वनिस्तथोक्तः। 'स्फूर्जथुर्वज्रनिर्घोष' इत्यमरः। आकर्णितः श्रुतः। परन्तु किन्तु तेऽरिगणाः क्षणादचिरेणाऽचेतनतां मूर्च्छावस्थां गताः प्राप्ताः। अरिगणा हेतितेजोविलोकनात्तज्जध्वनिश्रवणाच्च मूर्च्छिता इतिभावः।

प्रकम्पयन्ती धरणीं रणोन्मदा
प्रपूरयन्ती ध्वनिभिश्च रोदसी।
स्वमुक्तिसङ्ग्रामरता बलावलिः
प्राप्ता रिपोः प्रान्तपतेश्च चत्वरम्॥७॥

प्रकम्पयन्तीति ॥ रणोन्मदा रण उत्कृष्टो मदो यस्याः सा रणोन्मदा युद्धोग्रगर्वा । अतएव धरणीं पृथ्वीं प्रकम्पयन्ती प्रकर्षेण वेपयन्ती । ध्वनिभिः शब्दै रोदसी भूद्यावौ च 'भूद्यावौ रोदस्यौ रोदसी च ते' इत्यमरः । प्रपूरयन्ती प्रपूर्णयन्ती ध्वनिभिर्भूद्यावौ गुञ्जायमानेत्यर्थः । स्वमुक्तिसङ्ग्रामरता स्वमुक्त्या आत्ममुक्त्यै यः सङ्ग्रामो रण स्तस्मीन् रताऽऽसक्ता । बलावलि र्बलानां सैन्यानामावलिः पङ्क्तिः । प्रान्तपतेः प्रान्ताधिपस्य रिपोः शत्रोः [बडाहाकिम इति भाषायाम्] चत्त्वरमङ्गणंच 'अङ्गणं चत्त्वराजिरे' इत्यमरः । प्राप्ता गतवती ।

बद्ध्वाऽथ तं सैन्यपतिं प्रजाबलं
जहार तद्रक्षितशस्त्रसम्पदः ।
जनौघमाश्वास्य सुधोपमोक्तिभि--
स्तदाशु शिष्टेरधिकारमग्रहीत् ॥८॥

बद्धेति ॥ अथाऽङ्गणप्राप्त्यनन्तरम् । प्रजाबलं जनसेना 'बरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्' मित्यमरः । कर्तृपदं चैतत् । तं पूर्वोक्तं सैन्यपतिं चमूनायकं सोमशमशेराख्यं नरमितीतिहासाज्ज्ञेयम् । बद्ध्वाबद्धं कृत्वा । तद्रक्षितशस्त्रसम्पदस्तेन रक्षिता याः शस्त्रसम्पदो हेतिसम्पत्तयस्तास्तथोक्ताः ।

जहार हृतवत् । तत् प्रजाबलं सुधोपमोक्तिभिरमृततुल्यवचनैर्जनौघं जनसमूहम् । 'स्तोमौघनिकरव्रातवारसंघातसंचया' इत्यमरः। आश्वास्याऽऽश्वासनं दत्त्वा। शिष्टेः शासनस्य प्रान्तीयशासनस्येत्यर्थः। अधिकारमधिकृतिमाशु शीघ्रं यथा तथाऽग्रहीज्जग्राह। ग्रहधातोर्लुङ्।

तेनाऽथ बद्धानपि बन्धनालयाद्
विमुच्य शक्तिः प्रचुरा समेधिता।
उपद्रवोऽकारि परन्तु तैस्ततो
ग्रामेषु, तस्माच्च ररक्ष तज्जनान् ॥९॥

तेनेति ॥ अथ प्रान्तीयशासनाधिकारग्रहणानन्तरम्। तेन प्रजाबलेन बद्धान् वन्दीभूतान् जनान् बन्धनालयात् कारागाराद् । 'अपादाने पञ्चमी' ति पञ्चमी । विमुच्य स्वतन्त्रान् कृत्वा प्रचुराऽनल्पा शक्तिः समेधिता बर्धिता। परन्तु ततो बन्धनागारमुक्तेरनन्तरम्। तैः प्राक्वन्दीभूतैर्जनैर्ग्रामेषूपद्रवश्चौर्यादिकर्माऽऽकारि कृतः। तत् प्रजाबलं तस्मादुपद्रवाच्च जनान् ररक्ष रक्षां चक्रे। जनसेना बद्धान् पुनर्नियन्त्रणे संस्थाप्य ग्रामजनान् ररक्षेतिभावः।

यथाऽभितो याति नगापगापयः-

प्रवाह उन्नद्ध इवोन्मदो द्विपः।

तथा महज्जानबलावलेर्बलं

निःशङ्कमाशासु ससार सत्वरम् ॥१०॥

यथेति ॥ उन्नद्धः प्रवृद्धः 'जातोन्नद्ध प्रवृद्धाः स्यु' रित्यमरः। नगापगापयः प्रवाहो नगच्छन्तीति नगाः पर्वतास्तेषां याऽऽपगा नदी तस्याः पयःप्रवाहो जलस्रोतस्तथोक्तः। 'स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगापगे' त्यमरः। उन्मद उत्कट मदो द्विपो द्वाभ्यां पिबतीति द्विपोऽनेकप इव हस्तीवेत्यर्थः। 'दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विप' इत्यमरः। यथा येन प्रकारेणाऽभितःसर्वत्र याति गच्छति। तथा तेन प्रकारेणोत्कूलगिरिसरिज्जलस्रोत इवेत्यर्थः। जानबलावले र्जनानामिमानि जानानि 'तस्येद' मित्यण्, तानि च तानि बलानि जानबलानि जनसेनास्तासां याऽऽवलिः पङ्क्ति स्तस्या महत् बृहत् निःशङ्कं निर्भीकं शत्रोः पराजयभयहीनमित्यर्थः। 'शङ्का वितर्कभययो' रितिविश्वः। बलं शक्तिः। आशासु काष्ठासु 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्चता' इत्यमरः। सत्वरं ससार संसृतमभवत्। दूरादपि

जनसेनाशक्तिःश्रुतेतिभावः । उन्मदो द्विप इवेत्यत्रोपमालङ्कारः । अङ्गी तु दृष्टान्ताऽलङ्कारः ।

जयोल्लसन्ती जनमण्डली मुदा
संयापयामास दिनानि कानिचित् ।
उपत्यकाप्रेषितसैन्यकेन तु
मितायुधं जानबलं पराजितम् ॥११॥

जयेति ॥ जयोल्लसन्ती जयेन विजयेनोल्लसन्ती शोभमाना । 'आच्छीनद्योर्नुम्' इति नुमागमः । जनमण्डली जनसमूहः । मुदा हर्षेण कानिचिद्दिनानि कतिपयान् दिवसान् । संयापयामास व्यतीयाय । तु किन्तूपत्यकाप्रेषितसैन्यकेनोपत्यकाया राजधान्याः प्रेषितं यत् सैन्यकं रिपुबलं तेन राणासेनयेत्यर्थः। मितायुधं मितान्यायुधानि हेतयो यस्य तत् । जानबलं जनस्येदं जानं तच्च तद्बलं जानबलं प्रजासेना पराजितं निर्जितम्। राणासेनया जनसेना पराजितेत्यर्थः ।

राणेष्टदेवेन जनेन केनचित्
व्यापादितो लोकबलेश्वरः 'स्थिरः' ।
स नूनमस्यां भुवि कीर्तिमक्षयां
निधाय नाकाधिपतेः प्रियोऽभवत् ॥१२॥

राणेति ॥ राणेष्टदेवेन राणाएव मोहनशमशेरादिराणा एवेष्टदेवोऽभिलषितदेवः कुलदेवतेत्यर्थो यस्य तेन । केनचिद्‌विदितेन जनेन । स्थिरो दृढो वा स्थिरसंज्ञकः स्थिरबंमल्ल इत्याख्य इत्यर्थः । नामैकदेशे नामग्रहणम् । लोकबलेश्वरो जनसेनानायकः । व्यापादितो मारितः । स स्थिरबंमल्लोऽस्यां भुवि । अक्षयामनाशिनीं कीर्तिं यशो निधाय संस्थाप्य नूनं निश्चयमेव नाकाधिपतेः स्वर्गेश्वरस्य शक्रस्येत्यर्थः । 'स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः' इत्यमरः । प्रियो वल्लभोऽभवत् ।

राणाधिपोच्छिष्टभुजोऽतिपीवराः
श्वानो यथा तद्बलनायकास्ततः ।
पथि स्वतन्त्रानपि खड्गमुष्टयः
पौरानकृन्तन् क्रुधपेतबुद्धयः ॥१३॥

राणेति ॥ ततः स्थिरबंमल्लनिधनानन्तरम् । राणाधिपोच्छिष्टभुजो राणाधिपस्य राणाप्रधानमन्त्रिण उच्छिष्टं भुक्तादवशिष्टान्नं भुञ्जन्ति खादन्तीति राणाधिपोच्छिष्टभुजः । 'क्विप्चे' त्यनेन क्विप्प्रत्ययः । अतएव श्वानो यथा कुक्कुरा इव 'शुनको भषकःश्वा स्या' दित्यमरः । अतिपीवरा अतिकठिनाः कठोरशरीरा इत्यर्थः । क्रुधपेतबुद्धयः क्रुधारोषेणाऽपेता गता बुद्धिर्मतिर्येषां

ते। खड्गमुष्टयः खड्गाः करवाला मुष्टिषु येषां ते। तद्बलनायकाः राणासैन्यपतयः स्वतन्त्रानपरन्त्रान् पौरान् नागरिकानपि। 'तत्र भव' इत्यण् प्रत्ययः। पथि मार्गेऽकृन्तन् जघ्नुः। 'कृती छेदने' इति धातोर्लङ्।

सेना प्रजानामथ पूर्वपश्चिम-
दिगाक्रमाय प्रचचाल तत्स्थलात्।
तदा श्रिया मानसतोयनिर्गतां
सरिद्द्वयीं भिन्नगतिं जिगाय सा ॥१४॥

सेनेति॥ अथाऽनन्तरम्। प्रजानां प्रजायन्त इति प्रजाः प्रपूर्वक जन् धातोः 'उपसर्गे च संज्ञाया' मित्यनेनऽप्रत्ययः। तासां जनानां सेना चमूः पूर्वपश्चिमदिगाक्रमाय पूर्वा च पश्चिमा च पूर्वपश्चिमे एतादृशौ ये दिशौ तयोराक्रम स्तस्मै पूर्वपश्चिमदिगाक्रमाय पूर्वपश्चिमकाष्ठाविजयाय तत्स्थलात् तदेव स्थलं तत्स्थलं तस्मात् वीरगञ्जादित्यर्थः। अपादाने पञ्चमी। प्रचचाल प्रतस्थे। तदा तस्मिन् दिने प्रस्थानदिवस इत्यर्थः। सा जनसेना मानसतोयनिर्गतां मानससरोवरजलनिःसृतां भिन्नगतिं भिन्ना पृथक् गति र्गमनं यस्यास्ताम्। पूर्वपश्चिमदिग्वाहिनी'मित्यर्थः। सरिद्द्वयीं नदीद्वयीं ब्रह्मपुत्रसिन्धुनद्याविति यावत्। श्रिया

शोभया जिगाय । मानसनिर्गतस्य पूर्वपश्चिमदिग्वाहिसरिद्द्वयस्याऽपि तादृशी शोभा नासीत् यादृशी वीरगञ्जात् पूर्वपश्चिमगामिन्या जनसेनायाः शोभाऽसीदित्यर्थः ।

पदे पदे नीरनिधी नदीरिव
ते सस्वजाते पृतने उभे प्रजाः ।
निरायुधास्ता ददुरद्भुतं बलं
बृहत्तरा यज्जनशक्तिरायुधात् ॥१५॥

पद इति ॥ ते पूर्वोक्तपूर्वपश्चिमगामिन्यावुभे द्वे पृतने सेने । कर्तृपदमेतत् । 'ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमू' रित्यमरः । पृतनेउभे इत्यत्र 'ईदूदेद्द्विवचनं प्रगृह्य' मित्यनेन प्रगृह्यसंज्ञत्वान्नसन्धिः । नीरनिधी समुद्रौ कौचिद् द्वौ समुद्रावित्यर्थः । नदीः सरित इव प्रजाजनान् । प्रपूर्वकजनधातोर्ड प्रत्ययः । पदे पदे स्थाने स्थाने । 'नित्यवीप्सयो' रिति द्वित्वम् । सस्वजाते आलिङ्गताम् । निरायुधाः शस्त्रहीनास्ताः प्रजा अद्भुतं विस्मयकारि बलं ददुः पूर्वोक्ताभ्यां सेनाभ्यामितिशेषः । तमेवार्थमर्थान्तरेण द्रढ़यति— यत् जनशक्तिर्जनबलमायुधात् शस्त्रात् बृहत्तरा महत्तरा अस्तीतिशेषः । पूर्वार्धे उपमा । उत्तरार्धेऽर्थान्तरन्यासश्च ।

दशभि र्विराणगरयुद्धं वर्णयति—

या पूर्वगाऽऽसीद् ध्वजिनी जयोन्मुखी
विराट्पुरं सा प्रविवेश निर्भयम् ।
साहाय्यमेत्याऽत्र जनौघतो भृशं
चिराय युद्धं रिपुभिश्चकार च ॥१६॥

येति ॥ जयोन्मुखी विजयोद्यता या ध्वजिनी सेना पूर्वगा पूर्वदिशंगताऽऽसीत् । सा विराट् पुरं विराणगरं निर्भयं यथातथा प्रविवेश । अत्र विराट् पुरे जनौघतो जनसमूहात् भृशमत्यर्थं सहायतामेत्य प्राप्य रिपुभिः शत्रुभिः सह युद्धं रणं च चिराय बहुदिनपर्यन्तं चकार ।

बभौ नभःपातुकतोयवृष्टिवत्
सान्द्रैर्भुशुण्डीपुटकोग्रवर्षणैः ।
तिरस्कृतानेकपविप्रपातज-
ध्वनिस्फुरद्व्हिकणं रणाङ्गणम् ॥१७॥

बभाविति ॥ नभःपातुकतोयवृष्टिवत् नभस आकाशात् पातुका पातिनी या तोयवृष्टिर्जलवृष्टिः सेव । 'लषपते–' त्या-दिनोकञ् प्रत्ययः । सान्द्रैर्घनैर्भुशुण्डीपुटकोग्रवर्षणैर्भुशुण्डीनां हेतिविशेषाणां यानि पुटकानि गोलकानि [गोलीतिभाषायाम्]

तेषामुग्रवर्षणानि भीषणवर्षाणि तैस्तथोक्तैः। तिरस्कृतानेकपविप्रपातजध्वनि स्तिरस्कृतो अवहेलिता अनेकेषां बहूनां पवीनां वज्राणां प्रपातात् स्खलनाज्जाता ध्वनयो येन तत् तथोक्तम्। 'ह्लादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पवि' रित्यमरः। स्फुरद्वह्निकणं स्फुरन्त उच्छलन्तो वह्निकणा अग्निस्फुलिङ्गा यत्र तत् तथोक्तम्। रणाङ्गणं युद्धाङ्गणम्। कर्तृ। बभौ शुशुभे।

राणाचमूनायक आत्मन्दिर-
प्राकारदुर्गावितभूरिसैन्यकः।
बिलाच्छतघ्नीज्वलदग्निजिह्वया
बहिर्जनानारभताऽथ खादितुम्॥१८॥

राणेति॥ अथ रणाग्नौ प्रज्वलिते सति। राणाचमूनायको राणासेनापतिः [बडाहाकिम इति भाषायाम्]। आत्ममन्दिरप्राकारदुर्गावितभूरिसैन्यक आत्ममन्दिरस्य निजगृहस्य सेनापतिवासस्थानस्येत्यर्थः। प्राकारा वरणा एव दुर्गास्तेष्ववितं रक्षितं भूरि बहु सैन्यकं बलं येन स तथोक्तः सन्। शतघ्नीज्वलदग्निजिह्वया शतं हन्तीतिशतघ्नी शस्त्रविशेषः [तोप इति भाषायाम्] तस्या ज्वलन्नग्निर्वह्निरेव जिह्वा तया। बहिः प्राकारात् बहिः स्थाने जनान् प्रजा बिलाद्रन्ध्रात् प्राकाररन्ध्रादित्यर्थः। खादितुमारभताऽऽरब्धवान्।

रणेन यातेषु दिनेषु केषु चित्

प्राकारदुर्गाश्रयिणाऽरिणा ततः ।

नाऽवापि साहाय्यमुपत्यकाञ्चलो-

दूषे मुधा तेन निकेतनान्तरे ॥१९॥

रणेनेति ॥ ततस्तदनन्तरम् । रणेन युद्धेन केषुचिद्दिनेषु यातेषु गतेषु सत्सु । भावे सप्तमी । प्राकारदुर्गाश्रयिणा प्राकारदुर्ग एवाऽऽश्रयो यस्य तेन प्राकारदुर्गाश्रयिणा वरणदुर्गावलम्बिना तेन पूर्वोक्तेन । अरिणा शत्रुणा । उपत्यकाञ्चलात् राजधान्याः साहाय्यं सहायतां 'गुणवचनब्राह्मणादिभ्यःकमणिचे' ति ष्यञ्प्रत्ययः । नावापि न प्राप्तम् । अतो निकेतनान्तरे गृहान्तरे मुधाऽव्यर्थं निष्क्रियत्वेनेत्यर्थः । ऊष उषितम् । 'वस निवासे' भावे लिट् 'वचिस्वपी' त्यादिना संप्रसारणम् ।

विश्वेश्वरो जानबलस्य नायकः

प्राकारदुर्गस्य रिपोः प्रलङ्घने ।

नासीत् समर्थस्तदपीह नाऽत्यजि

निसर्गधैर्यं प्रजया जयेच्छया ॥२०॥

विश्वेश्वर इति ।। रिपोः प्राकारदुर्गस्य प्रलङ्घनउल्लङ्घनकर्मणि जातबलस्य जनसेनाया नायको नेता विश्वेश्वर स्तदाख्यः पुरुषः 'विश्वेश्वरप्रसादकोइराला' इत्यर्थः । समर्थः सामर्थ्ययुक्तो नाऽऽसीत् । तदपि तथापि । इह रणे जयेच्छया जये विजय इच्छाकाङ्क्षा यस्यास्तया प्रज्ञया जनेन । जातावेकवचनम् । निसर्गधैर्यं स्वाभाविकधीरता नाऽत्यजि न मुक्तः ।

अदायि केनाऽपि वणिग्वरेण यद्
बलाय यन्त्रं शकटोपमं च तत् ।
सञ्चालितं नायकगर्भमस्थिरं
दुर्गस्य भेदाय बभूव साधनम् ।।२१।।

अदायीति ।। केनाऽपि केनचिदपि वणिग्वरेण वाणिजश्रेष्ठेन 'वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक्' इत्यमरः । बलाय सैन्याय जनसेनायायिति बोद्धव्यम् । शकटोपममनःप्रतिमम् । 'क्लीवेऽनः शकटोऽस्त्री स्या' दित्यमरः । यत् यन्त्रम् [ट्रयाक्टर इतिभाषायाम्] । अदायि दत्तम् । अस्थिरं चपलं नायकगर्भं नायको नेता गर्भेऽन्तरे यस्यतत् । तच्च सञ्चालितं सत् दुर्गस्य प्राकारदुर्गस्य भेदाय विभेदनाय साधनं कारणं बभूव ।

विभिद्य दुर्गं जनसेनया गतं
ततो भयाद् वैरिबलैः पलायितम् ।
औचित्यधीरारिचमूपतेःसुतः
पलायमानो विससर्ज भूतलम् ॥२२॥

विभिद्येति । दुर्गं प्राकारदुर्गं विभिद्य भेदनंकृत्वा जनसेनया गतं यातम् । गम् धातोर्भावेक्तः । ततो गमनानन्तरम् । भयात् भीतेः । वैरिबलैः शत्रुसैन्यैः पलायितम् परापूर्वकोऽय् धातो र्भावेक्तः । "उपसर्गस्याऽयतौ" इति लत्वम् । पलायमानो भयेन धावन् । औचित्यधीरारिचमूपतेरौचित्य उचितकर्मणि धीरो योऽरिचमूपतिः शत्रुसेनापति स्तस्य तथोक्तस्य । सुतः पुत्रो भूतलं पृथ्वीतलं विससर्ज तत्याज मृत इत्यर्थः ।

प्रजाबलं तत्परिरक्षिता बला-
ज्जहार सर्वायुधसम्पदस्ततः ।
नेत्रा रिपोः सैन्यपतिः स रक्षितो
वीरो हि वीर्येण भुवि प्रसीदति ॥२३॥

प्रजेति ॥ ततो विजयानन्तरम् । प्रजाबलं जनसेना तत्परिरक्षिता रिपुसेनापतित्राता सर्वायुधसम्पदो निखिलशस्त्रसम्पदो बलाद्धठात् जहाराऽहरत् । नेत्रा नायकेन जननायकेनेत्यर्थः । विश्वेश्वरेणेति यावत् । स पूर्वोक्तो रिपोः शत्रोः सैन्यपतिः सेनानायको रक्षितोऽवितः । हि यतो भुवि पृथिव्यां वीरो वीरपुरुषो वीर्येण पराक्रमेण प्रसीदति प्रसन्नो भवति । अत्राऽर्थान्तरन्यासोऽलङ्कारः ।

न्यूनीकृतायां रिपुसंहतौ प्रजा
प्रायोजयत् तत्र नवीनशासनम् ।
राज्येऽखिले 'शब्दविसारियन्त्र'तः
प्रचारयामास जनाहवस्थितीः ॥२४॥

न्यूनीकृतायामिति ॥ रिपुसंहतौ शत्रुसमूहे न्यूनीकृतायां दलितायां सत्याम् । 'अभूततद्भावेच्विः' 'भावे सप्तमी' च । तत्र विराण्णगरे प्रजा नवीनशासनं नूतनशिष्टिं प्रायोजयत् प्रयोजयामास । शब्दविसारितयन्त्रतः [रेडियो इति भाषायाम्] । अखिले समग्रे राज्ये राष्ट्रे जनाहवस्थितीः प्रजायुद्धावस्थाः । 'अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवा' इत्यमरः । प्रचारयामास प्रचारमकरोत् ।

धनायुधान्येत्य पुनाररणाय सा
चमूश्चलाङ्घ्रि प्रचचाल चञ्चला ।
वीर्येण जित्वा च सुदूरदिग्भवां
सपत्नसेनां शुशुभे यशस्विनी ॥२५॥

धनेति ॥ चञ्चलाऽस्थिरा सा चमूः सेना धनायुधानि वित्तशस्त्राण्येत्य प्राप्य पुना रणाय युद्धाय 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घः । चलाङ्घ्रि चपलचरणं यथातथा प्रचचाल प्रतस्थे । वीर्येण पराक्रमेण सुदूरदिग्भवां दूरकाष्ठास्थितां सपत्नसेनां वैरिचमूम् । 'रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृद' इत्यमरः । जित्वा च । यशस्विनी कीर्तिमती सती । 'अस्मायामेधास्रजो विनि' रिति विनिप्रत्ययः । ऋन्नेभ्यो ङीप् । शुशुभे रेजे । भोजपुरं जिगायेत्याह—

किरातजातिप्रबला बलावलि-
र्बलावलेपेन ययौ पुरः पुरः ।
उल्लङ्घ्य शैलान् क्रमतो जयोन्मदा
विना युधा 'भोजपुरं' जिगाय च ॥२६॥

किरातेति ॥ जयोन्मदा जयेन विजयेनोत्कृष्टो मदोऽभिमानो

यस्याः सा। किरातजातिप्रबला किरातजात्या तदाख्यजात्यो प्रकृष्टं बलं यस्याः सा। तत्र किराता जनसेनायै साहाय्यं ददुरिति बोद्धव्यम् । बलावलिर्बलानां सेनानामावलिः पङ्क्तिः। बलावलेपेन बलस्य शक्तेरवलेपोऽभिमानस्तेन। हेतौ तृतीया। पुरःपुरोऽग्रेऽग्रे ययौ जगाम । क्रमतः क्रमात् शैलान् पर्वतानुल्लङ्घ्याऽऽक्रम्य युधा रणेन विना रक्तपातेनविनेत्यर्थः। विनायोगे तृतीया । 'समुदायः स्त्रियः संयत्समित्याजिसमिद्युध' इत्यमरः भोजपुरं तदाख्यनगरं जिगाय च। किरातैर्भोजपुरं विनायुद्धेन निर्जितमितिभावः।

नवभिः श्लोकैर्दोलखायुद्धं वर्णयति—

करालकालः करवालपाणिभि-
र्जनैः समं जीवितकृन्तनोद्यतः।
नृत्यन्मुदा चाऽथ पदे पदे पथि
क्रमेण भैमीं नगरीं समाययौ ॥२७॥

करालेति ॥अथ भोजपुरविजयानन्तरम् । जीवितकृन्तनोद्यतो जीवनच्छेदनतत्परः करालकालः कराल उन्नतदन्त एतादृशः कालोऽन्तको मृत्युरित्यर्थः। 'करालो दन्तुरेतुङ्गे' 'कालो दण्डधरः श्राद्धदेवो वैवस्वतोन्तक' इत्युभयत्राप्यमरः।

करवालपाणिभिः करवालाः पाणिषु येषां तैः करवालपाणिभिः कृपाणकरैः ' कौक्षेयको मण्डलाग्रः करवालः कृपाणवत् ' इत्यमरः जनैः । पुरुषैः समं सह 'सहार्थे तृतीया' । पथि मार्गे भोजपुरा-द्दोलखानगरीपर्यन्ते मार्ग इत्यर्थः । पदे पदे स्थाने स्थाने ' नित्य वीप्सयो ' रिति द्वित्वम् । 'ओखल्दुङ्गा' इत्यादि स्थानेष्वित्यर्थः । नृत्यन् नर्तनं कुर्वंश्च । ओखल्दुङ्गादिस्थानेषु राणासेना विजित्येति यावत् । क्रमेण शनैः शनैः । भैमीं भीमस्य दोलखास्थित भीमेश्वरस्येयं भैमी तां नगरीं पुरीं दोलखानगरीमित्यर्थः । समाययौ समाजगाम ।

द्विलक्ष्यके प्राग्भवभूप्रदेशके
दिशोऽभितो व्याप्य निषण्णया तथा ।
चमूश्चमूर्वालिरिवाऽथ वैरिणा-
मालोकि कण्ठीरवराजिरोचिषा ॥२८॥

द्वीति ॥ अथ दोलखानगरीप्राप्त्यनन्तरम् । द्विलक्ष्यके द्विसंङ्ख्यायुक्ते । प्राग्भवभूप्रदेशके प्राचि भवः प्राग्भवः पूर्वदिक्स्थ एवादृशो यो भूप्रदेशो भूमिस्थानं स एव स्वार्थेकः । तस्मिन् तथोक्ते [' पूर्व २ नंबर जिल्ला ' इतिभाषायाम् ।] दिशः काष्ठा अभितः परितः ' अभितः परितः समया निकषाहा

प्रति योगेऽपि ' इति द्वितीया । व्याप्योऽऽक्रम्य निषण्णया स्थित-या कण्ठीरवराजिरोचिषा कण्ठीरवाणां सिंहानां या राजिः श्रेणी तस्या इव रोचिः कान्तिर्यस्यास्तया तथोक्तया । ' कण्ठीरवो मृग-रिपुर्मृगदृष्टिर्मृगाशनः' इति 'रोचिः शोचिरुभेक्लीवे' इति चामरः। तया जनसेनयेति यावत् । वैरिणां सपत्नानां राणामित्यर्थः। चमूःसेना चमूर्वालिश्चमूरूणां हरिणविशेषणामालिः पङ्क्ति-श्चमूर्वालिरिव यथा । ' कदली कन्दली चीनश्चमूरुप्रियका-वपी ' त्यमरः । आलोकि दृष्टा । सिंहपङ्क्त्या हरिणपङ्क्ति-रिव किरातसेनया राणासेना दृष्टेतिभावः । उपमालङ्कारः ।

हिमालयस्योच्चकटेर्विचुम्बके
रणाय राणारणवाहिनी गिरौ ।
परस्परस्पर्धिपरासुहारिणी-
श्चण्डी र्भुशुण्डी र्जगृहे स्वपाणिषु ॥२९॥

हिमालयस्येति ॥ हिमालयस्य तुषाराचलस्योच्चकटि-रुन्नतमध्यभाग स्तस्य विचुम्बके विशेषेण चुम्बतीति बिचुम्बक-स्तस्मिन् विचुम्बके संस्पर्शके । ण्वुल्प्रत्ययः । हिमालयमध्यभाग-पर्यन्तोन्नत इत्यर्थः । गिरौ शैले चरीकोटाख्ये शैल इत्यर्थः। 'अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चया' इत्यमरः । राणारणवा-

हिनी राणायुद्धसेना। स्वपाणिषु निजभुजेषु। रणाय युद्धाय। परस्परस्पर्धिपरासुहारिणीः परस्पर... ...ला: परस्परस्पर्धिनोऽहमहमिकयान्योन्यसंघर्षिण इत्यर्थं एतादृशा ये पराः शत्रवस्तेषामसून् प्राणान् हरन्तीति परस्परस्पर्धिपरासुहारिण्यस्ता स्तथोक्ताः " सुप्यजातौणिनिस्ताच्छील्ये " इतिणिनिप्रत्ययः स्त्रीत्वात् ङीप्। ' अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ' इति 'पुंसि भूम्न्यसवः प्राणा' इति चामरः। चण्डीर्भीषणा भुशुण्डीरस्त्रविशेषान् जगृहे गृहीतवती। अत्र छेकानुप्रासोऽलङ्कारः।

प्रजाबलौघा अपि संयुगोद्धता
यूथाधिपैः स्वैः प्रबलैः सुचालिताः।
क्ष्वेलन्त उच्चैः प्रति पर्वतं रिपून्
प्रजह्रुरित्थं निजतीक्ष्णहेतिभिः ॥३०॥

प्रजेति ॥ संयुगोद्धता रणोद्भटाः स्वैर्निजैः प्रबलै र्बलिभिर्यूथाधिपैः समूहनायकैः सेनापतिभिरित्यर्थः। सुचालिताः सुगमिताः प्रजाबलौघाः प्रजानां जनानां यानि बलानि सैन्यानि तेषामोघाः समूहा अपि। उच्चै रुन्नतं पर्वतं शैलं प्रति। प्रतियो द्वितीया। चरीकोटाख्यं शैलं प्रतीत्यर्थः। क्ष्वेलन्तः सिंहनादमापतन्तः सन्तो निजतीक्ष्णहेतिभिः स्वनिशितशस्त्रै रिपून् शत्रून प्रजह्रुः प्रहारं चक्रुः।

शैलाङ्कशीर्षस्थितयोरनीकयो-
स्तयो मृधं केन तदोपमीयते ।
उत्पातिपाषाणपतत्पवी रणः
कदापि पृथ्वीनभसोर्भवेन्न चेत् ॥३१॥

शैलेति ॥ पृथ्वीनभसोर्धराकाशयोरुत्पातिपाषाणपतत्पवि रुत्पतन्ति तच्छीला इत्युत्पातिनस्ते च ते पाषाणा उत्पातिपाषाणा ऊर्ध्वगामिशिलाः पृथ्वीपक्षात् , पतन्तश्च ते पवयः पतत्पवय स्खलद्वज्राणि, आकाशपक्षा त् ,उत्पातिपाषाणाः पतत्पवयो यस्मिन् स उत्पातिपाषाणपतत्पविः । एतादृशो रणो युद्धम् । कदापि कस्मिंश्चिद्दिनेऽपि न भवेच्चेत् । शैलाङ्कशीर्षस्थितयोरङ्कोः ऽधोभागोऽङ्कश्च शीर्षं शिखा चाऽङ्कशीर्षे शैलस्याङ्कशीर्षे शैलाङ्कशीर्षे तयोः स्थिते निषण्णे तयोस्तथोक्तयोः । पर्वताऽधोभागे जनसेनाऽऽसीत् तच्छिखायां राणासेनासीदिति बोद्धव्यम् । तयोः पूर्वोक्तयोः । अनीकयोः सैन्ययोर्जनराणासैन्ययोरित्यर्थः । 'वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रिया' मित्यमरः । तदा तस्मिन् दिने भूतं मृधं युद्धं 'मृधमास्कन्दनं सङ्ख्यं समीकं सांपरायिक' मित्यमरः । केन कतमोपमानेनोपमीयत उपमाक्रियते । नोपमीयत इत्यर्थः । शैलाङ्कवर्तिजनसेनाया

स्तच्छिखावर्तिराणासेनया सह यद्युद्धमभवत् तत् पृथ्वी नभसो रण इवाऽऽसीदिति गूढार्थः । अतिशयोक्तिरलङ्कारः ।

क: शक्नुयात् तद्रणभीषणोपमा-
मवाप्तुमस्मिन् भुवने पटुः कविः ।
जनौघराणाबलसंयुगो बभौ
जनौघराणाबलसंयुगो यथा ॥३२॥

क इति ॥ कः पटुश्चतुरः कविः काव्यनिर्माताऽस्मिन् दृश्यमाने भुवने जगति मर्त्यलोक इत्यर्थः। तद्रणभीषणोपमां तयोर्जनराणासैन्ययोः रणस्य युद्धस्य या भीषणा भयावहोपमा सादृश्यं तां तथोक्तामवाप्तुं प्राप्तुं शक्नुयात् समर्थो भवेत् । मर्त्यलोके तु न कोऽपि शक्नुयादित्यर्थः । अतो जनौघराणाबल संयुगो जनानामोघाः समूहा जनौघास्ते च राणाबलानि च जनौघराणाबलानि तेषां संयुगो रणस्तथोक्तः । जनौघराणाबलसंयुगो जनसमूहराणासैन्यरणो यथा बभौ रेजे । अत्राऽनन्वयोऽलङ्कारः । ' उपमानोपमेयत्वमेकस्यैवत्वनन्वयः ' इति लक्षणात् ।

गिरेरधस्तात् प्रजया कृतो दवः
संगच्छतेस्मोपरिदीपितानलैः ।
तदोर्ध्वगामी वनवह्निरम्बरा-
दालोकि नूनं दिविजै र्भयादयम् ॥३३॥

गिरेरिति ॥ गिरेः शैलस्याऽधस्तान्नीचैः प्रजया जनेन। जातावेकवचनम् । कृतोज्वालितो दवो वनहुताशनः । उपर्युर्ध्वभागे दीपितानलै र्ज्वालिताग्निभी राणासेनया ज्वालिताग्निभिरित्यर्थः । संगच्छतेस्म मिलतिस्म। 'समोगम्यृच्छिभ्या' मित्यात्मने पदम् । तदा तस्मिन् दिने । ऊर्ध्वगाम्युपरिगमनशीलोऽयं वनवह्नि र्दवो दिविजै र्देवै र्भयात् भीत्या । अम्बरादाकाशात् आकाशमागत्येत्यर्थः । आलोकि दृष्टः । नूनमिति तर्के ।

अल्पायुधा भूपतिवल्लभा चमूः
सहस्रशस्त्रात् सचिवाश्रयाद् बलात् ।
आसीद् ध्रुवं सा बलवत्तरा मृधे
यतो भुवि न्यायबलं विशिष्यते ॥३४॥

अल्पेति ॥ भूपति वल्लभा राजप्रिया राजैकपक्षपातिनीत्यर्थः। अल्पायुधाऽल्पशस्त्रा सा पूर्वोक्ता चमूः सेना जनसेनेत्यर्थः। मृधे

युद्धे सहस्त्रशस्त्रात् सहस्रं शस्त्राण्यायुधानि यस्य तस्मात् । सचिवाश्रयात् सचिवो मन्त्री मोहनशमशेर इत्यर्थ आश्रयोऽवलम्बो यस्य तस्मात् राणैकपक्षपातिन इत्यर्थः । बलात् सैन्यात् बलवत्तरा बलवती । ध्रुवं निश्चयमेवाऽऽसीत् । यतो भुवि न्याय बलं न्याय्यं सत्यतायुक्तनय एव बलं शक्तिस्तथोक्तं विशिष्यते विशेषेण वर्तते ।

न्यायाहवेऽन्यायिजनः प्रयत्नतो
जयं मनस्तापहरं य ईहते ।
आस्ते स पूर्णेन्दुमुखीमुखादृते
कश्चिज्जिगीषुः श्रियमैन्दवीमिव ॥३५॥

न्यायेति ॥ न्यायाहवे न्याययुद्धे योऽन्यायिजनोऽन्यायी चासौ जनोऽन्यायिजनोऽन्यायकर्तृपुरुषः प्रयत्नतः प्रयासात् । मनस्तापहरं चित्ततापनिवारकं जयं विजयमीहते । स यच्छब्दनिर्दिष्टः पुरुषः पूर्णेन्दुमुखीमुखादखण्डचन्द्रवदनावदनादृते । 'अन्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजायुक्ते' इति पञ्चमी । कश्चित् कुरूपः । ऐन्दवीं वैधवीं श्रियं शोभां जिगीषु विजयमभिलषन्निवाऽऽस्ते वर्तते । अकलङ्कत्वात् सुन्दरीवदनमेव शशिश्रियं जयति । नान्ये । यथा कुरूपः स्वशो-

भया चन्द्रश्रियं जिगीषुश्चेदपि तां विजेतुं न शक्नोति तथाऽन्यायी पुरुषः प्रयत्नशीलोऽपि न्याययुद्धे न्यायं प्राप्तुं न शक्नोति केवलमुपहासपात्रमेवभवेदित्याशयः । राणैकपक्षपातिनी सेनाऽन्यायमार्गगामिन्यासीदतः सा राजैकपक्षापातिनी न्यायमार्गवर्तिनीं जनसेनीं विजेतुं न शक्नोतिस्म । यत इदं युद्धं नकेवलं युद्धमासीदपि तु न्याययुद्धमासीदिति गूढार्थः ।

रक्ताऽप्पते दिग्वनितेव तत्क्षणं
जनस्य कार्यात् किल कामचारिणः ।
कदा प्रसह्य प्रणयेन वा कदा
प्रियंवदा तस्य वशंवदाऽभवत् ॥३६॥

रक्तेति ॥ कामचारिणः स्वेच्छाचारिणो राणा-प्रतिबन्धक्षयात्, पक्षे कामुकस्य । तस्य पूर्वोक्तस्य जनस्य प्रजाया जनसेनाया इत्यर्थः, पक्षे तस्य पूर्वपरिचितस्य जनस्य पुरुषस्य । कार्यात् क्रियायाः परोपकारक्रियाया वा युद्धक्रियायाः, पक्षे विलासक्रियायाः । तत्क्षणमविलम्बमेव । रक्ता शोणिता रणाद्धेतोर्वाऽनुरक्ता प्रणयाद्धेतोः, पक्षे रक्ताऽरुणिता निधुवनक्रीड़ाया हेतो र्वाऽनुरक्ता प्रणयाद्धेतोः । अप्पते र्वरुणस्य दिक् काष्ठा पश्चिमा दिगित्यर्थः । 'प्रचेता वरुणः पाशी यादसां पतिरप्पति'

रित्यमरः । कदा कस्मिंश्चिद्दिने प्रसह्य हठात् । वा कदा प्रणयेन प्रीत्या प्रियंवदा प्रियभाषिणी वनिता स्त्रीव वशंवदाऽऽधीन्यं गता । 'प्रियवशेवदः खच्' इतिखच् । 'अरुर्द्विषदजन्तस्य मुम्' इति मुम् च । अभवत् । किल । जनबलेन रणैःप्रीत्या च वशीकृता पश्चिमा दिक् कामुकेन हठैः प्रणयैश्च वशीकृता वनितेवाऽभवदिति सरलोभावः । अत्रश्लिष्टोपमालङ्कारः ।

अपश्चिमा वीर्यवतां हि पश्चिमां
दिशं गता लोकचमूः पदे पदे ।
पराजयन्ती रिपुसंहतिं स्थिता
'गोरक्ष' देशे नृपपूर्वजोषिते ॥३७॥

अपश्चिमेति ॥ वीर्यवतां पराक्रमवतामपश्चिमाऽग्रे भूता वीर्यवतामग्रगण्येत्यर्थः । पश्चिमां पूर्वेतरां दिशं काष्ठां गतायाता लोकचमूर्जनसेना पदेपदे स्थाने स्थाने रिपुसंहतिं शत्रुसमूहं पराजयन्ती विजयमाना सती नृपपूर्वजोषिते नृपस्य त्रिभुवन नृपतेः पूर्वजै रग्रजैर्द्रव्यशोहादिभिरित्यर्थ उषितः कृतवासस्तस्मिन् । गोरक्षदेशे गोरक्षाख्यजनपदे (गोरखा इति भाषायाम) स्थिता निषण्णाऽभवदिति शेषः ।

अस्यैव देशस्य नृपः पुरा युधि
परामवं नाऽरिजनादविन्दत ।
सखण्डनेपालमखण्डतां चिरं
य आनयत्तस्य गुणस्य का कथा ॥३८॥

अस्येति ।। पुरा प्राचीनसमयेऽस्योक्तस्यैव देशस्य नृपो राजा पृथ्वीनारायणशाह इत्यर्थः युधि सङ्ग्रामेऽरिजनाच्छत्रुजनात् पराभवं पराजयं नाऽविन्दत न ज्ञातवान् । युधिसर्वान् शत्रूञ्जिगायेत्यर्थः । यो नृपः सखण्डनेपालं खण्डैः शकलै रल्पसत्वै र्जनपदै रित्यर्थः सहितः सखण्ड एतादृशो नेपाल स्तं तथोक्तम् । अखण्डतामैक्यं चिरं चिरकालायाऽऽनयत् । लघुजनपदैर्विभक्तं नेपाळराज्यमेकं विस्तीर्णनेपालराष्ट्रं चकारेत्याशयः । तस्य नृपस्य गुणस्यगुणविषयस्य का कथा का चर्चा । गुणवर्णनं कर्तुं न शक्यत इत्यर्थः ।

तद्वंशजस्याऽपि नृपस्य सेनया
नाऽज्ञायि शत्रो र्बलतः पराजयः ।
तस्मायिवास्मायपि तादृशं वरं
ददौ स गोरक्षपतिर्वरं किमु ॥३९॥

तदिति ॥ तद्वंशजस्य तस्यवंशे जातस्तस्य तत्कुलजस्य "सप्तम्यां जनेर्डः" इतिड्प्रत्ययः। नृपस्य नरेशस्य त्रिभुवनस्येत्यर्थः। सेनया बलेनाऽपि शत्रो रिपो र्बलतः सैन्यतः पराजयः पराभवो नाऽज्ञायि न विदितः। स प्रसिद्धो गोरक्षपतिर्गोरक्षनाथस्तस्मै पृथ्वीनारायणशाहायेवाऽस्मै त्रिभुवनायाऽपि तादृशं युद्धविजयकारकं वरं श्रेष्ठं वरं वृतिम्। 'वरो वृता' वित्यमरः। ददौ दत्तवान् किमुत्प्रेक्षायाम्।

सदादिगुद्भूतरणाग्निधूमतो
राणावधूनां नयनस्थमञ्जनम्।
निर्गत्य बाष्पैः सह गण्डभित्तिषु
चन्द्राननान्यावृणुते स्म निर्दयम् ॥४०॥

सदेति ॥ दिगुद्भुतरणाग्निधूमतो दिक्षु काष्ठासूद्भूत उत्पन्नो यो रणो युद्धमेवाऽग्नि र्वह्नि स्तस्य धूमो धूम्र स्तत स्तथोक्तः। नयनस्थं लोचनवर्त्यञ्जनं कज्जलं बाष्पै रश्रुभिः सह। 'सहयुक्तेऽप्रधाने' इति तृतीया। गण्डभित्तिषु कपोलदेशेषु निर्गत्य निष्क्रम्य राणावधूनां राणाङ्गनानां चन्द्राननानि विधुवदनानि। निर्दयं निष्कृपं यथातथा सदाऽऽवृणुतेस्माऽऽच्छादयतिस्म। रणाद्धेतो राणास्त्रियः सर्वदा रुदन्तिस्मेति तात्पर्यम्।

इत्थं समन्तात् प्रबलै र्जनैः क्रमा-
दुपत्यकाऽऽसन्नभुवो वशीकृताः ।
दिने दिने राजपुरेऽपि मानवै-
राणा विरोधाय जयाशयोत्थितम् ॥४१॥

इत्थमिति ॥ इत्थं समन्तादभितः प्रबलै र्बलिभि-र्जनैः प्रजाभिरुपत्यकासन्नभुवो राजधानीनिकटवर्तिप्रदेशाः क्रमात् वशीकृता वशमानीता निर्जिता इत्यर्थः । अभूततद्भावे च्विः । राजपुरे राजधान्यामपि मानवै र्मनुष्यै र्नागरिकैरि त्यर्थः । जयाशया जयस्य विजयस्याऽऽशाऽभिलाष-स्तया । राणाविरोधाय राणैः सह विरोधः प्रातिकूल्यं, निरङ्कुश-राज्यशासनत्वात्, तस्मै । दिनेदिने प्रतिदिनमुत्थितम् ।

राणावधूगर्भनिपातनक्षमैः
प्रकम्पयन्ती गिरिशृङ्गकं रवैः ।
करोद्धृतोच्चध्वजभीषणा प्रजा
सन्निर्ययौ राजपथे निरायुधा ॥४२॥

राणेति ॥ राणावधूगर्भनिपातनक्षमै राणावधूनां रा-

णाङ्गनानां गर्भाणां भ्रूणानां निपातने पातनकर्मणि क्षमैः कुशलैः 'गर्भोभ्रूण इमौसमौ' इत्यमरः। रवैः शब्दैः। 'इन्क्लाव जिन्दाबाद' इत्यादिशब्दैरित्यर्थः। गिरिशृङ्गकं पर्वतशिखरं प्रकम्पयन्ती प्रकर्षेण वेपयन्ती। करोद्धृतोच्चध्वजभीषणा करेषु भुजेषूद्धृता गृहीता य उच्चा उन्नता ध्वजाः पताकास्तै भीषणा भयावहा। निरायुधा निःशस्त्रा प्रजा राजपथे राजमार्गे। 'ऋक्पूरब्धूः पथामानक्षे' इत्यनेनाऽप्रत्ययः। संनिर्ययौ सम्यक् निर्जगाम।

अनेकवारं जनसेनयाऽनया
रिपौ परास्तं गमितेऽपि 'भैरवा'।
अश्रान्तयुद्धोद्भवरक्तबिन्दुभि-
रुरो निजं क्षालयति स्म सर्वदा ॥४३॥

अनेकेति ॥ अनया जनसेनया रिपौ शत्रावनेकवारं बहुवारं परास्तं पराजयत्वं गमिते नीतेऽपि। भैरवाः तदाख्यप्रदेशः। अश्रान्तयुद्धोद्भवरक्तबिन्दुभिरश्रान्तमखिन्नं यत् युद्धं रणस्तस्मादुद्भवा भूता ये रक्तबिन्दवः शोणितकणास्तैस्तथोक्तैः। निजं स्वकीयमुरो वक्षः सर्वदा क्षालयतिस्माऽक्षालयत्। भैरवाप्रदेशे बहुदिनपर्यन्तं युद्धमभूदित्यर्थः।

जयाभिलाषं स विहाय मोहनो
राज्ञे चकाराऽऽत्मसमर्पणं ततः ।
सर्वत्र युद्धं नृपते निदेशतो
न्यषेधि, शान्तं न तु भैरवाभुवि ॥४४॥

जयेति ॥ तत स्तदनन्तरम् । स पूर्वोक्तो मोहनो मोहनशमशेरो जयाभिलाषं विजयाशां विहाय त्यक्त्वा राज्ञे नृपाया-ऽऽत्मसमर्पणं चकार नृपशरणं ययावित्यर्थः । नृपते राज्ञो निदेशत आज्ञायाः सर्वत्रयुद्धं न्यषेधि निवारितम् । तु किन्तु भैरवाभुवि तदाख्यभूमौ । न शान्तं निवारितं नाऽभूत् ।

राणाकुलोन्मूलनदत्तधीः स्थिरः
स 'इन्द्रजिद्' युद्धबलौघनायकः ।
राज्ञोऽपि वाणीमवधीरयन् बली
पश्चाद् गृहीतः कृतनूतनस्थितेः ॥४५॥

राणेति ॥ राणाकुलोन्मूलनदत्तधी राणाकुलस्योन्मूलनाय मूलतोनाशाय दत्ताधी बुद्धिर्येन सः । स्थिरोऽचलो बलवान् सैन्यवान् वा । अत एव राज्ञो नृपस्य वाणीमपि । अवधीरयन्

तिरस्कुर्वन् स प्रसिद्धो युद्धबलौघनायकः । युद्धे आहवे ये बलौघाः सैन्यसमूहास्तेषां नायको नेता इन्द्रजित् तदाख्योवीरः । कृतनूतनस्थितेः कृता विहिता या नूतना नवीना प्रजातन्त्ररूपेत्यर्थः । स्थितिरवस्था तस्या स्तथोक्तायाः । पश्चादनु गृहीतः । अभूदितिशेषः । राजाज्ञाया अवहेलनात् राजसैनिकै गृहीतोऽभूदित्यर्थः ।

अङ्गानि नेपालभुवः प्रपेदिरे
ततोऽम्बुवर्षाण्यनु भास्वतीं छविम् ।
मेघाद् विमुक्ति ह्यनु वैधवी दशा
कारागृहोन्मुक्तजनैरभाज्यपि ॥४६॥

अङ्गानीति ॥ ततो युद्धस्थगनानन्तरम् । नेपालभुवो नेपालचराया अङ्गान्यवयवाः । 'अङ्ग प्रतीकोऽवयवोऽपघन' इत्यमरः' अम्बुवर्षाणि जलवृष्टीरनु पश्चात् । 'अनुर्लक्षणे' कर्मप्रवचनीयसंज्ञत्वात् 'कर्म प्रवचनीय युक्ते द्वितीया' इत्यनेन द्वितीया । भवां भास्वतीं वैवस्वतीं छविं दीप्तिं प्रपेदिरे प्रापुः । जलवृष्टिस्थगनानन्तरं प्रकाशमाना सूर्यच्छविर्यथा राजते तथा रणस्थगनानन्तरं नेपालभूकान्तिः शुशुभ इतिभावः । कारागृहो

न्मुक्तजनैरपि कारागृहोदुन्मुक्ताः स्वतन्त्रा ये जना टङ्कप्रसादादयस्तै स्तथोक्तैः। मेघाज्जलदात् विमुक्तिमनु। कर्मप्रवचनीयसंज्ञत्वात् द्वितीया। भवा वैधवी चान्द्री दशाऽवस्था मेघविमुक्तित्वान्निर्मलैन्दवी दशेत्यर्थः। अभाजि प्रापि। हीति निश्चयार्थे। मेघविमुक्तेः पश्चात् यथा चन्द्रस्य दशा शोभते तथा कारागृहविमुक्तेः पश्चाज्जनानामवस्था रेज इतिभावः।

'काङ्ग्रेस' नाम्नी समितिर्न केवला
बभूव सङ्ग्रामजयस्य कारणम्।
राजप्रजान्योन्यिकयोगतो यतो
राजप्रजावैरिण आशु निर्जिताः ॥४७॥

काङ्ग्रेसेति ॥ केवला काङ्ग्रेसनाम्नी समितिः पारिषद् सङ्ग्रामजयस्य रणविजयस्य कारणं निदानं न बभूव। यतो यस्मात् कारणात्। राजप्रजान्योन्यिकयोगतो राजा च प्रजा च राजप्रजे तयोरान्योन्यिकः पारस्परिको यो योगः सहयोगस्ततः। राजप्रजावैरिणो राजप्रजाशत्रवो राज्यशासनासक्ता राणा इत्यर्थः। आशु शीघ्रं यथातथा निर्जिता आसन्निति शेषः। अतो राजसहयोगमवज्ञाय 'नेपाले राणाशासनं मयैवोन्मूलित' मितिगर्वं काङ्ग्रेसाख्यपरिषद् मा दधात्विति भावः।

भूमिभारभरणाय महीश-आययौ स्वविषये मुदितान्तः।
लोकरञ्जनममुं जनताऽथ स्वागतं पुरि चकार सुचारु॥४८॥

भूमीति ॥ महीशः पृथ्वीपतिस्त्रिभुवन इत्यर्थः। मुदितान्तो मुदितं प्रसन्नमन्तश्चित्तं यस्य स तथोक्तः सन्। भूमिभारभरणाय भूमेर्भारो भूमिभारस्तस्य भरणं तस्मै भूमिभारभरणाय भूभारवहनाय राज्यशासनायेत्यर्थः। स्वविषये स्वदेशे। 'नीवृज्जनपदो देशविषयौ तूपवर्तन' मित्यमरः। आययावाजगाम। अथाऽऽगमनानन्तरम्। जनता जनसमूहो लोकरञ्जनं जनरञ्जनममुं नृपमुद्दिश्येतिशेषः। पुरि नगरे सुचार्वतिसुन्दरं तोरणपताकादिभिरतिसुन्दरमित्यर्थः। स्वागतं चकार। स्वागतावृत्तम्। 'स्वागतेति रनभाद्गुरुयुग्म' मितिलक्षणात्।

व्योम्नि पूर्णशशिनां यदि राजिः सम्भवेत् तदुपमा न हि किञ्चित्।
स्वागताय पथि पङ्क्तिनिबद्धं यौवतं विधुमुखं न भवेच्चेत्॥४९॥

व्योम्नीति ॥ पूर्णशशिनां पूर्णेन्दूनां राजिः पङ्क्तिर्यदि व्योम्नि गगने सम्भवेत् भवेत्। असम्भवे वस्तुनि कवेस्तर्कः। स्वागताय नृपस्वागताय पथि मार्गे पङ्क्तिनिबद्धं वीथीस्थं 'वीथ्यालिरावलिः पङ्क्तिः श्रेणीलेखास्तु राजय' इत्यमरः। विधुमुखं विधु-

A (१५ फरवरी १९५१ ई०)

रिव मुखं यस्यतत् विधुमुखं चन्द्रवदनम् । 'विधुः सुधांशुःशुभ्रांशु-रोषधीशो निशापति' रित्यमरः । यौवतं युवतिसमूहः । 'भिक्षा-दिभ्योऽण्' इत्यनेनाऽण्प्रत्ययः । 'यौवतं गणे' इत्यमरः । न भवेच्चेत् । तदुपमा तस्या उपमा तदुपमा पूर्णशशिराजिसा-दृश्यं किञ्चित् वस्त्वपि न भवेत् । हि निश्चयायार्थे । नृपस्वाग-ताय पथि पङ्क्तिनिबद्धश्चन्द्रवदनो युवतिसमूह एव कविक-ल्पनया व्योम्नि कल्पितायाः पूर्णचन्द्रपङ्क्तेरुपमाऽभवदिति ज्ञेया ।

पुत्रसूनुरपि तस्य महौजास्तं निरीक्ष्य पितरं जनकस्य ।
द्राङ्मुमोच विनयेन नतास्यो हैममासनमथाऽऽदरपूर्वम् ।५०।

पुत्रेति ॥ अथ नृपागमनानन्तरम् । महौजा महातेजा स्तस्य नृपस्य पुत्रसूनुः पौत्रोऽपि ज्ञानेन्द्रवीरवीक्रमोऽपीत्यर्थः । जनक-स्य पितुः पितरं जनकं पितामहमित्यर्थः । तं त्रिभुवनं निरीक्ष्य विलोक्य विनयेन नम्रभावेन नतास्योऽवनतवदनः सन् । हैमं सौवर्णमासनं पीठं सिंहासनमित्यर्थः । आदरपूर्वमादृति-पूर्वकं द्रागञ्जसा मुमोच तत्याज ।

भूपतिर्निजपवित्रपदाब्जं स्थापयेन्न हि मयीति विचिन्त्य ।
पौत्रपादरजसाऽप्रयतं तद्धैममासनमतीव विभाय ॥५१॥

भूपतिरिति ॥ भूपतीराजो निजपवित्रपदाब्जं स्वपूतचरणकमलं मयि मदुपरि न स्थापयेन्नधारयेत् । हि निश्चयमिति विचिन्त्य वितर्क्य पौत्रपादरजसा नृपपुत्रसूनुचरणपांसुनाऽप्रयतमपवित्रमनधिकारत्वात् । हैममासनं सिंहासनमति भृशं बिभाय भीतमभूदिवोत्प्रेक्षायाम् ।

चारुचामरमरुच्चलशीर्षहीरहाररुचिरच्छविमिश्रम् ।
आतपत्रमवदातममुष्य शुभ्रकान्तियशसा सह रेजे॥५२॥

चार्विति ॥ चारु सुन्दरम् । 'सुन्दरं रुचिरं चारु' इत्यमरः । यच्चामरं प्रकीर्णकं 'चामरं तु प्रकीर्णक' मित्यमरः । तस्य मरुता चलश्चपलो यः शीर्षहीरहारः शिरोरत्नहारस्तस्य या रुचिरा शुभ्रा छवि दीप्तिस्तया मिश्रं तथोक्तम् । अमुष्य त्रिभुवनस्याऽवदातं श्वेतम् 'अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुन' इत्यमरः । आतपत्रं छत्रं शुभ्रकान्तियशसा शुभ्राकान्ति यस्मिन् तच्छुभ्रकान्त्येतादृक् यत् यश स्तेन शुभ्रकान्तियशसा धवलवर्णकीर्त्या यशसः शुभ्रवर्णत्वात् । सह साकम् । सहयोगे तृतीया । रेजे बभ्राज ।

दुहृदा व्यपहृताऽपि पवित्रा सङ्गमेन दयितस्य सहर्षा ।
सस्वजे जनकजेव तदीया श्रीरपि 'त्रिभुवनं' भुवनेशम् ।५३।

दुर्हृदेति ॥ दुर्हृदा दुष्टं हृत् यस्य तेन दुष्टचित्तेन शत्रुणा वा। जङ्गवहादुरेण वा रावणेनेत्यर्थः। व्यपहृता विशेषेणाऽपहृता नीताऽपि। पवित्रा पूता दयितस्य प्रियस्य पत्युरित्यर्थः। त्रिभुवनस्य वा रामचन्द्रस्येति यावत्। सङ्गमेन पुनर्मेलनेन। हेत्वर्थे तृतीया। सहर्षा हर्षेण सहिता सहर्षा सानन्दा। जनकजा जनकात् पितुः पृथ्वीवीरविक्रमभाज्जाता जनकजा 'जनेर्ड' इतिडप्रत्ययः। पृथ्वीवीरविक्रमादनन्तरं प्राप्तेत्यर्थः। पक्षे जनकाज्जनकाख्यान्नृपाज्जाता जनकजा सीतारूपेत्यर्थः। तदीया त्रिभुवनसम्बन्धिनी श्रीरपि राज्यलक्ष्मीरपि वा रमा। भुवनेशं जगत्पतिं राजानमित्यर्थः, पक्षे जगदीशं रामचन्द्रमित्यर्थः। इव यथा त्रिभुवनं सस्वज आलिलिङ्ग। अत्र श्लिष्टोपमालङ्कारः।

मोहनं समयधूसरचान्द्रोमोहनः स समयेशमिवाऽसुम्।
व्याजहार जनलोचनचन्द्र चन्द्रसम्पद इमा नहरेति ।५४।

मोहनमिति ॥ अमोहनोहृदयानाकर्षको गौरवक्षयात् वा मोहनो मोहनशमशेराख्यः। पक्षेऽमोहनो दिवसे सूर्यप्रकाशात्। स पूर्वोक्तः, पक्षे प्रसिद्धः। समयधूसरचान्द्र श्चन्द्रस्याऽपत्यं पुमान् चान्द्रः समयेन धूसरः समयधूसरः समयधूसरश्चासौ चान्द्रः समयमलिनचन्द्रशमशेरसूनुः। 'समय एव करोति बला-

वल ' मितिमाघकवेर्नीतिपूर्वोक्तिमनुसारेण साम्प्रतं मोहन-शमशेरोऽपि समयेन मलिन इतिज्ञेयः। पक्षे समयमलिनविधुसुतो दिनादृष्टबुध इत्यर्थः। मोहनं हृदयाकर्षकं सर्वाधिकारसम्पन्नत्वात् पक्षे सर्वप्राणिजीवनदातृत्वगुणयुक्तत्वात्। समयेशं समयेन कालेन भूतईश ईश्वरः सर्वशक्तिसम्पन्न इत्यर्थस्तं समयेशम्। साम्प्रतं त्रिभुवनोऽपि समयेन सर्वशक्तिसम्पन्न इतिज्ञेयः। अमुं त्रिभुवनम्। पक्षे समयेशं समयानां कालानामीश ईश्वर-स्तं समयेशं सूर्यमित्यर्थः। इव यथा। जनलोचनचन्द्र जन-लोचनानां चन्द्रइवाऽऽह्लादकत्वाज्जनलोचनचन्द्रस्तत्संबुद्धौ जनलोचनचन्द्र भो प्रजानयनेन्दो? इमा इहस्थिता नेपाले स्थिता इत्यर्थः! चन्द्रसम्पदश्चन्द्रशमशेरैश्वर्याणि न हर न गृहाण। अस्मत्पितृसम्पदो नहरेत्यर्थः। पक्षे जनलोचनचन्द्र–चन्द्रसम्पदो जनलोचनानां प्राणिनयनानां चन्द्र इव कर्पूर इव शैत्याह्लादकत्वाच्च जनलोचनचन्द्र एतादृशो यश्चन्द्रःशशी तस्य सम्पदः श्रियस्तास्तथोक्ताः। न हर दिवसेऽपीत्यूह्यम्। 'कर्पूरमस्त्रियाम्। घनसारश्चन्द्रसंज्ञ' इति 'हिमांशुश्चन्द्रमाचन्द्र' इतिचामरः। इतीत्थं व्याजहार बभाषे निवेदयामासे-त्यर्थः। बुधेन सूर्य इत्थमनुक्तेऽपि कविः स्वपाण्डित्यदर्शनार्थमुक्त इति तर्कयति। अत्र श्लिष्टोपमा।

तं जगाद सचिवः सचिवेशं "भोशरण्य ! शरणे भवतोऽस्मि। द्रागमेयदय मे दयतां च। दुष्कृतं मम कुलस्य, न मेऽस्ति॥५५॥

भूपते ! न समयं परिभाव्य पूर्वजस्य सरणिं ह्यनुयातः। देशवंशविकचीकरणाय तां विमुच्य सुकृतं भवते" ति॥५६॥

तमिति ॥ भो शरण्य ! शरणे साधुः शरण्य स्तत्संबुद्धौ भो शरण्य भोशरणागतरक्षक ! "तत्र साधु" रिति यप्रत्ययः। भवतः शरणेऽस्मि। शरण्यत्वात्भवच्छरणगमनं मे न निरर्थकत्वं भवेदितिभावः। अमेयदय ! मातुं शक्या मेया न .मेयाऽमेयैतादृशी दया यस्य सोऽमेयदयस्तत्संबुद्धौ तथोक्त । अपरिमेयकरुण मे " अधीगर्थदयेशां च कर्मणि " इति षष्ठी। द्राक्झटिति दयतां च कृपां च करोतु भवानितिशेषः। मम कुलस्य दुष्कृतं दुश्चरितं राजाधिकारग्रहणरूपं दुष्कृत मित्यर्थः। अस्ति। मे मम नास्ति। मत्कुलपरम्परानुसारेणैव मया तथा कृतं नतु केवलेन मयेति भावः। व्याख्यानावशिष्टानां पदानामुत्तरेण श्लोकेन सम्बन्धः।

भूपत इति ॥ भूपते राजन्। समयं कालं विंशतितमीं शताब्दीमित्यर्थः। न परिभाव्य न विचार्य। पूर्वजस्य सरणिं मार्गं चन्द्रशमशेरादिगृहीतमार्गमित्यर्थः। राजप्रजावहेलनरूपमार्गमि-

तियावत् । अनुयातोऽनुसृतः । हिनिश्चयत्वे । अहमासमितिशेषौ ।
वां पूर्वजसरणिं भवत्पूर्वजमार्गमित्यर्थः । निजमन्त्रिकृतात्मा-
वहेलनसहनरूपमार्गमितियावत् । देशवंशविकचीकरणाय देशश्च
वंशश्च देशवंशौ तयोर्विकचीकरणं विकाशनं तस्मै तथोक्ताय ।
विमुच्य त्यक्त्वा । मन्त्रिकृतावहेलनं न सहित्वेत्यर्थः । भवता
श्रीमता सुकृतं सुष्ठु विहितम् । इति सचिवो मन्त्री मोहनशमशेर
इत्यर्थः । तं पूर्वोक्तं सचिवेशं मन्त्रिप्रभुं स्वस्वामिनमित्यर्थः ।
राजानमितियावत् । जगाद उवाचेति पूर्वश्लोकेन सम्बन्धः ।

पार्थिवोऽपि सचिवप्रणिपातैर्हृष्टउत्तममतिः स शरण्यः ।
मन्त्रिमण्डलमथ प्रजयाऽर्धं राजितं व्यरचयत् समराणम् ॥५७॥

पार्थिव इति ॥ अथाऽमात्यनिवेदनानन्तरम् । उत्तममतिः
सुबुद्धिः शरण्यः शरणे साधुः । स पूर्वोक्तः पार्थिवो राजाऽपि ।
सचिवप्रणिपातैर्मन्त्रिप्रणतिभिर्हृष्टःप्रसन्नः सन् । प्रजया जनेन ।
जातावेकवचनम् । जनैरित्यर्थः ॥ अर्धमेकार्धभागं यथातथा
राजितं शोभितं समराणं समास्तुल्यसंख्यकाराणा यत्रतत्
तथोक्तम् । प्रजाराणातुल्यसंख्यकमित्यर्थः । प्रथमे दक्षसदस्य-
के मन्त्रिमण्डले पञ्च प्रजाप्रतिनिधयः पञ्चराणाप्रतिनिधय-

A (१८ फरवरी १९५१ ई०)

श्चाऽऽसन् । मन्त्रिमण्ड़लं मन्त्रिणां सचिवानां मण्ड़लं चक्रवाल-मितिमन्त्रिमण्डलं तत् तथोक्तम् 'चक्रवालं तु मण्डल' मित्यमरः। व्यरचयत् विशेषेण रचयामास।

प्रधानसचिवासनं विनतमोहनस्याऽमुना
ह्यदाय्यधिपतित्वमस्थिरधियो धृतं चात्मना।
विभिन्नविषयाधिकारमुपलभ्य शिष्ट्यै भृश-
मभूत् सचिवमण्डली प्रणयसादरा भूभुजि ॥५८॥

प्रधानेति ॥ अमुना त्रिभुवनेन । अस्थिरधियश्चपलमतेः प्रधानमन्त्रिपदापहरणशङ्कयेति बोद्धव्यम् । विनतमोहनस्य प्रणत-मोहनशमशेरस्य । 'रजकस्य वस्त्रं ददातीत्यादिवत् षष्ठी । प्रधा-नसचिवासनं मुख्यामात्यपीठमदायि दत्तं हि निश्चयत्वे । आत्मनाच स्वयं राज्ञाऽपि अधिपतित्वं राज्यस्वाम्यं धृतं गृही-तम् । नतु पूर्ववत् सर्वेऽधिकारा दत्ता इत्यर्थः । सचिवमण्ड़ली मन्त्रिमण्ड़ली मन्त्रिसभेत्यर्थः । शिष्ट्यै शासनाय विभिन्नविष-याधिकारं विभिन्नेषु नानाविधेषु विषयेष्वधिकारोऽधिकृति-स्तं तथोक्तम् उपलभ्य प्राप्य । राजनि नृपे भृशमत्यर्थं प्रणय-सादराऽऽदरेणाऽऽदृत्या सहिता सादरा प्रणयेन प्रेम्णा सादरा प्रणयसादराऽभूत् । अत्र यतिभङ्गे सञ्जातेऽपि न रसनिष्पत्तौ

श्री ५ महेन्द्र वीर विक्रमसाहदेवः श्री ५ रत्न राज्यलक्ष्मी देवी

नवीन परिणीतया युवतिधन्यया रम्यया
सु 'रत्न' पदयुक्तया ललित 'राज्यलक्ष्म्या' ख्यया।
हरेस्तनययाऽन्ययाऽखिल गुणाढ्यया, ज्योत्स्नया
शशीव, विरराज भूपतिसुतो "महेन्द्रो"ऽपि सः ॥

हानिः। पृथ्वीवृत्तम्। जसौ जसयलावसुग्रहयतिश्च पृथ्वीगुरु' रितिलक्षणात्।

नवीनपरिणीतया युवतिधन्यया रम्यया
सु'रत्न' पदयुक्तया ललित 'राज्यलक्ष्म्या' ख्यया।
हरेस्तनययाऽन्ययाऽखिलगुणाढ्यया, ज्योत्स्नया-
शशीव, त्विर'राज' भूपतिसुतो 'महेन्द्रो'ऽपि सः॥५६॥

इति श्रीभरतराजशास्त्रिकृतौ महेन्द्रोदये महाकाव्ये राजाङ्के विजयपूर्वकं त्रिभुवनप्रत्यागमनं नाम षष्ठः सर्गः।६।

नवीनेति॥ स पूर्वोक्तो भूपतिसुतो राजसूनुर्महेन्द्रोऽपि नवीनपरिणीतया नवोढया, रम्यया कान्तया युवतिधन्यया तरुणीभाग्यवत्या। सुरत्नपदयुक्तया रत्नेति पदं रत्नपदं सुष्ठु च तद्रत्नपदं तेन युक्ता तया सुरत्नपदयुक्तया रत्नपदसहितया। ललितराज्यक्ष्म्याख्यया राज्यलक्ष्मीत्याख्या राज्यलक्ष्म्याख्या ललिता चासौ राज्यलक्ष्म्याख्या ललित राज्यलक्ष्म्याख्या तया ललितराज्यलक्ष्म्याख्यया राज्यलक्ष्मीतिचारुसंज्ञया रत्न-राज्यलक्ष्मीनाम्न्येत्यर्थः। अखिलगुणाढ्यया समस्तगुणपूर्णया। अन्ययाऽपरयेन्द्रराज्यलक्ष्मीभगिन्येत्यर्थः। हरेर्हरिशमशे-

रस्य तनयया सुतया। ज्योत्स्नया चन्द्रिकया शशीव चन्द्रवत्।
विरराज शुशुभे। पृथ्वी वृत्तम्।

इति श्रीशङ्करशास्त्रिकृते महेन्द्रोदयकाव्यव्याख्याने कुञ्चिकाख्ये षष्ठः सर्गः ॥६॥

सप्तमः सर्गः

चतुर्भिः श्लोकैर्मन्त्रिमण्डलं वर्णयति–

अथ परस्परवैरवतां सदः

किमजयत् स्वरुचा दशमन्त्रिणाम् ।

उभयपक्षहिताय दिवःसभा-

मदितिजैर्दितिजैश्च निषेविताम् ॥१॥

अथेति ॥ अथ मन्त्रिसंसन्निर्माणानन्तरम् । परस्परवैरवतां परस्परस्मिन्नन्योन्यस्मिन् यत् वैरं शत्रुता तदस्ति येषां ते तेषां तथोक्तानाम् । दशमन्त्रिणां दशसचिवानां सदः परिषद् जनगणप्रतिनिधिनिर्मिता सभेत्यर्थः । नवमन्त्रिमण्डलमिति यावत् । कर्तृपदमेतत् । उभयपक्षहिताय पक्षद्वयकल्याणाय देवदानवकल्याणायेत्यर्थः । अदितिजैरदितिपुत्रैर्देवैरित्यर्थः । दितिजैर्दितिपुत्रैर्दनुजैरित्यर्थः । च । निषेवितां सेवितां विहितामित्यर्थः । दिवः स्वर्गस्य सभां समितिं समुद्रमन्थनादिकार्याय देवदैत्यविहितां सभामित्यर्थः । स्वरुचाऽऽत्मकान्त्याऽजय-

जिगाय किमुत्प्रेक्षायाम् । जनराणाप्रतिनिधिनिर्मितमन्त्रिपरिषद् देवदैत्यविहितां सभामपि रुचा जिगाय किम्विति भावः । अत्रसर्गे त्रयोविंशतिश्लोकपर्यन्तं यमकं शब्दालङ्कारः । तल्लक्षणं यथा साहित्यदर्पणे " सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः । क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥ " अस्मिन् सर्गे यमकात्मकश्लोकपर्यन्तं द्रुतविलम्बितं वृत्तम् । 'द्रुतविलम्बितमाह नभौ भरौ' इति लक्षणात् ।

जयपराजययोः परिणामतो
विकचसंकुचिताननवारिजैः ।
अनुचकार सभा नलिनीं स्फुटा-
ममलिनां मलिनां च कुमुद्वतीम् ॥२॥

जयेति ॥ सभा मन्त्रिपरिषद् । जयपराजययो र्जयश्च पराजयश्च जयपराजयौ तयोर्जयपराजययोर्विजयपराभवयोः । जनप्रतिनिधीनां विजयो राणाप्रतिधीनां पराजय इति वेदितव्यम् । 'रणे भङ्गः पराजय' इत्यमरः । परिणामतो विकारतः । 'परिणामो विकार' इत्यमरः । विकचसंकुचिताननवारिजै विंकचानि च प्रफुल्लानि च, विजयात् , संकुचितानि च म्लानानि च पराजयात् विकचसङ्कुचितान्येतादृशानि यान्याननानि

मुखानि सभासदस्यवदनानीत्यर्थः, तानि वारिजानीव जलजानीव तैस्तथोक्तैः। हेतौ तृतीया। स्फुटां विकचामत एवाऽमलिनामम्लानां नलिनीं कमलिनीं मलिनां म्लानां कुमुद्वतीं कुमुदिनीं चाऽनुचकाराऽनुकृतवती। सभा कमलिनीव कुमुद्वतीव च बभूवेत्यर्थः। एकस्यैव वस्तुनः परस्परविरोधिन्याः कमलिन्याः कुमुदिन्याश्च सादृश्येऽसम्भवत्वादतिशयोक्तिरलङ्कारः।

दिनतमीद्युतिसंतमसद्वयी-

सम विभाजितभूमितलत्विषम्।

ननु जिगाय सभाऽवयवश्रिया

रुचिररोचिररोचिरधीश्वरा: ॥३॥

दिनेति ॥ रुचिररोचिररोचिरधीश्वरा रुचिरं सुन्दरं रोचिः प्रभा येषां ते रुचिररोचिषो, जनप्रतिनिधय इत्यर्थः, न विद्यते रोचिर्येषां तेऽरोचिषः कान्तिहीनाराणाप्रतिनिधय इत्यर्थः, रुचिररोचिषश्चाऽरोचिषश्च, ते अधीश्वरा यस्यां सा तथोक्ता। 'रोचिः शोचिरुभे क्लीबे' इत्यमरः। सभा मन्त्रिपरिषद्। अवयवश्रियाऽङ्गशोभया। दिनतमीद्युतिसंतमसद्वयीसमविभाजितभूमितलत्विषं दिं दिव-

सश्च तमी रात्री च दिनतम्यौ तयोर्द्युति सतमसे प्रभातिमिरे तयोर्द्वयी तया समं समानं यथातथा विभाजितं द्विधाकृतं यत् भूमितलं भूतलं पूर्वपश्चिमगोलार्धमित्यर्थस्तस्य त्विड् शोभा तां तथोक्ताम् । 'विभावरी तमस्विन्यौ रजनी यामिनी तमी' ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः । विष्वक् संतमसं' चेत्युभयत्रामरः । जिगायाऽजयन्ननु तर्के । प्रभातमोमयस्य भूगोलकस्य शोभामपि सभा स्वश्रिया जिगाय न्विति भावः ।

नवपुरातनरीतिविधित्सया
सचिवसंसदि या मतिभेदता ।
अभवदत्र महीशमतोषयत्
'त्रिभुवनं' भुवनं च कदा न सा ॥४॥

नवेति ॥ अत्र सचिवसंसदि मन्त्रिमण्डले । नवपुरातनरीतिविधित्सया नवा च नूतना च जनप्रतिनिधीनाम्, पुरातना च पुराणा च राणाप्रतिनिधीनाम्, नवपुरातन्यावेतादृश्यौ ये रीतिव्यवस्थे तयो र्विधित्सा विधातु मिच्छा तया तथोक्तया । या मतिभेदता बुद्धिवैषम्यमभवत् । सा मतिभेदता महीशं पृथ्वीशं त्रिभुवनं तदाख्यं नृपं भुवनं च लोकमपि कदा कस्मिंश्चिद्दिनेऽपि नाऽतोषयत् ।

बहु-विभिन्न सदःसु सदस्यतां
पुरजना दधति स्म यथामति ।
वचनलेखनगा प्रतिबन्धता
विधुरिता धुरि तापदहद्धियाम् ॥५॥

बह्विति ॥ पुरजनाः पौरा बहुविभिन्नसदःसु बहून्यनल्पानि विभिन्नानि नानाविधानि यानि सदांसि सभाः काङ्ग्रेस-प्रजापरिषदित्यादिसभा इत्यर्थः । तेषु तथोक्तेषु । 'आस्थानी क्लीवमास्थानं स्त्रीनपुंसकयोः सद' इत्यमरः । सदस्यतां सदस्यत्वं यथामति बुद्ध्यनुसारं यथातथा दधतिस्म धारयन्ति स्म । वचनलेखनगा वचनं च लेखनं च वचनलेखने तयो र्गच्छतीति वचनलेखनगा वाक्लेखभवा प्रतिबन्धता निरोधनं राणाकृतप्रतिबन्धतेत्यर्थः । तापदहद्धियां तापेन पराभवतापेन दहन्ती धी बुद्धि र्येषां तेषां राणामित्यर्थः । धुर्यग्रे विधुरिता विह्वलिता अभवदितिशेषः । राणाकृतवाक्लेखप्रतिबन्धता तेषां पुरस्तादेव नष्टेति भावः । सर्वे जना यथेच्छं लिखन्ति स्म वदन्ति स्म चेति सरलार्थः ।

करधृतोन्नततारकितध्वजः
कुत्ररमन्त्रिविरोधिजनव्रजः ।
अवनिपस्य रुषोष्णमुखो ययौ
पुरजनीरजनीशरुचः पुरः ॥६॥

करेति ।। करधृतोन्नततारकितध्वजः करेषु पाणिषु धृतानि गृहीतान्युन्नतान्युच्चानि तारकितानि ताराचिह्नितानि ध्वजानि केतनानि येन तथोक्तः । ‘ पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रिया ’ मित्यमरः । तारकितानीत्यत्र तारकादित्वादितच् प्रत्ययः । रुषा क्रुधा । ‘ कोपक्रोधामर्षरोषप्रतिघारुट् क्रुधौ स्त्रियां ’ मित्यमरः । उष्णमुखस्तप्तवदनो राणाप्रतिनिधीनां मन्त्रिमण्डले स्थापनादुद्भूतेन रोषेणेति भावः । पुरजनिः पुरे नगरे जनिर्जन्म यस्य स पुरजनि र्नगरोत्थित इत्यर्थः । ‘जनु जनन जन्मानि जनिरुत्पत्तिरुद्भव ’ इत्यमरः । कुवरमन्त्रिविरोधिजनव्रजः कुवराश्च ते मन्त्रिणः कुवरमन्त्रिणः [भाषायां कुँवर] राणासचिवास्तेषां विरोधिनो विपरीतगामिनो ये जनाः पुरुषास्तेषां व्रजः समूहः । ‘ समूहो निवहव्यूहसंदोहविसरव्रजा ’ इतिचामरः । रजनीशरुचो रजन्या ईशोरजनीशस्तस्येव रुक् यस्य तस्य रजनीशरुचश्चन्द्रकान्तेरवनिपस्याऽवनीं पातीत्यवनिपस्तस्य भूपतेः पुरोऽग्रे । ययौ जगाम । याधातोर्लिट् । रोषोष्णतानिवारणाय चन्द्रशीतलस्य राज्ञोऽग्रे जनव्रजो जगामेति भावः ।

“ सचिवमण्डलमस्ति मलीमसं
रिपुजनै र्नृप तानपवारय ” ।
इति निवेदनमाप ततः स तं
वचनतश्च मतः समतोषयत् ।।७।।

सचिवेति ॥ नृप राजन् ! सचिवमण्डलं मन्त्रिपरिषद् । रिपुजनैररिभी राणाभिरित्यर्थः । हेत्वर्थे तृतीया । मलीमसं मलिनमस्ति ! 'ज्योत्स्ना तमिस्रे' त्यादिना, ईमस प्रत्ययः । अतस्तान् रिपुजनानपवारयाऽपसारय । मन्त्रिमण्डले राणाभ्यः स्थानानि मा देहीतिभावः । स त्रिभुवन इतीत्थं निवेदनमाप प्राप शुश्रावेत्यर्थः । ततः श्रवणानन्तरम् । नतःसन् प्रजादरेण विनतः सन्नित्यर्थः । तं जनसमूहं वचनतो भाषितात् । मन्त्रिमण्डले राणा-स्थानदानकारणोऽन्युक्त्वेत्यर्थः । समतोषयत् सन्तुष्टमकरोच्च ।

कुवरवंशजपालितजीवितैः
प्रचुरमूढजनैर्मदिरोद्धतैः ।
भवन एव निहन्तुमथैकदा
कुचरितं चरितं गृहमन्त्रिणम् ॥८॥

कुवरेति ॥ अथाऽनन्तरम् । एकदैकस्मिन् दिने गृहमन्त्रिणं गृहा-मात्यं विश्वेश्वरसंज्ञकं नेवारमित्यर्थः । भवने वासस्थान एव । निहन्तुं मारयितुम् । कुवरवंशजपालितजीवितैः कुवरस्य ये वंशजा राणा मोहनशमशेरादय इत्यर्थः, तैः पालितानि जीवितानि जीवनानि येषां तैस्तथोक्तैः । मदिरोद्धतैर्मद्योन्मत्तैः प्रचुरमूढजनैः प्रचुराश्च ते मूढजनास्तैर्बहुमूर्खपुरुषैः । कुचरितं कुत्सितचरित्रं षडयन्त्रात्मकं कर्मेत्यर्थः । चरितमाचरितम् ।

गृहविभागपतेर्भवनं गता
हठयुता शठसंहतितामसी ।
अभवदाशु तदायुधहव्यभुक्-
तपनतापनताऽथ पलायिता ॥९॥

गृहेति ॥ गृहविभागपते र्गृहमन्त्रिणो भवनं वासस्थानं गता प्राप्ता हठयुता शठसंहतितामसी शठानां निकृतानां संहतिः समूह एव तामसी रात्रिस्तथोक्ता । [गोरखादल इति भाषायाम्] कर्तृ पदमेतत् । 'निकृतस्त्वनृजुः शठः' 'तमिस्रा तामसी रात्रि' श्चेत्युभयत्रामरः । आशु शीघ्रं यथातथा । तदायुधहव्यभुक्तपनतापनता तस्य गृहविभागपते र्यदायुधं शस्त्रं तस्य यो हव्यभुगग्निः स एव तपनः सूर्य स्तस्य ताप स्तेन नतो दलिता तथोक्ता । 'भानुर्हंसः सहस्रांशुस्तपनः सविता रवि' रित्यमरः । अभवत् । अथ तदनन्तरम् । पलायिताऽपयाता । अत्र शब्दालङ्कारातिरिक्तो रूपकञ्च ।

क्षितिपतिर्विपदाहतधीस्ततो
व्यघटयत् समितिं दशमन्त्रिणाम् ।
रचितवांश्च नवां जननायकान्
स सहसा सहसान् विनियुज्य तान् ॥१०॥

क्षितिपतिरिति ॥ ततो राणाजनाक्रमणानन्तरम् । स प्रसिद्धः क्षितिपतिर्महीशस्त्रिभुवन इत्यर्थः। विपदाहतधी रापदाक्रान्तबुद्धिः सन् । दशमन्त्रिणां समितिं सभां व्यघटयत् विघटितां चक्र । विपूर्वकघटधातोर्लङ् । मन्त्रिमण्डलभङ्गोऽभूदित्यर्थः। सहसा शीघ्रम् 'अतर्किते तु सहसे' त्यमरः। सहसान् हसेन सह वर्तन्त इति सहसास्तान् सहसान् सहास्यान्। 'तेन सहेति तुल्ययोगे' इति समासः। 'वोपसर्जनस्ये' ति सहशब्दस्य सादेशः। 'स्वनहसोर्वा' इति विकल्पादप्प्रत्ययः। 'अथो हसः। हासोहास्यं चे' त्यमरः। तान् प्रसिद्धान् जननायकान् जननेतॄन् मातृकादीनित्यर्थः। विनियुज्य विशेषेण नियुक्तान् कृत्वा। नवां नूतनां समितिं च रचितवान् रचयामास। पुनर्मन्त्रिमण्डलं निर्मितमितिभावः।

सचिवमण्डलनायकतावधू-
रभिषिषेच वरं किल मातृकाम्।
जनसमूहपतिर्नियतिप्रियः
स नतया न तया चिरमुज्झितः ॥११॥

सचिवेति ॥ सचिवमण्डलनायकतावधूः सचिवानां मन्त्रिणां यन्मण्डलं परिधिस्तस्य नायकता नेतृत्वं सैववधू विवाहोद्य-

त्ताकन्या तथोक्ता। वरं वरस्वरूपं श्रेष्ठं वा। मातृकां मातृका-प्रसादमभिषिषेच सिक्तवती किल। मातृकाप्रसादः प्रधानामा-त्योऽभूदिति भावः। नियतिप्रियो नियतेर्भाग्यस्य प्रियो दयितो जनसमूहपतिर्जनगणाधिपः काङ्ग्रेससभापतिरित्यर्थः। स मातृकाप्रसादः। नतया नम्रीभूतया तया सचिवमण्डलनायक-तावध्वा प्रधानामात्यपदेनेत्यर्थः। चिरं चिरकालपर्यन्तं बहुमा-सपर्यन्तमित्यर्थः। नोज्झितो न त्यक्तः। दीर्घकालाय प्रधान-मन्त्र्यभूदित्यर्थः।

जनपदे च जना जनतन्त्रतां
न विमलां तु तथापि समभ्यगुः।
सद इदं न विधानसभा नवा
जनतयाऽनतया हि विनिर्मिता ॥१२॥

जनपद इति॥ तु किन्तु तथापि मन्त्रिमण्डले निर्मितेऽपि। जनाः प्रजा जनपदे देशे ' नीवृज्जनपदो देशो विषयस्तूपवर्तन' मित्यमरः। विमलां शुद्धां जनतन्त्रतां प्रजातन्त्रतां न समभ्यगुर्न प्रापुश्च। सम् + अभ्युपसर्गपूर्वकात् गम्धातो लुङि प्रथमपुरुषे बहुवचनान्तम्। हि यतः। इदं सदः सभा मन्त्रिमण्डलमित्यर्थः। अनतया ननताऽनता तयाऽनतया। निर्वाचितत्वादभीतयेत्य-

र्थः । जनतया जनसमूहेन विनिर्मिता विशेषेण रचिता नवा नूतना नेपालदेशेऽभूतेत्यर्थः । विधानसभा विधानपरिषद् । न ।

" बहुजनप्रियनायकनिर्मिता
नवविधानसभाऽशु भविष्यति " ।
इति जगाद जनान् स जनेश्वरः
करुणयाऽरुणयामविशुद्धधीः ॥१३॥

बह्विति ॥ अरुणयामविशुद्धधीररुणयामोऽरुणप्रहरः प्रभातसमय इत्यर्थः स इव विशुद्धा निर्मला धीर्बुद्धिर्यस्य स तथोक्तः । 'द्वौ यामप्रहरौ समा' वित्यमरः । स पूर्वोक्तो जनेश्वरः प्रजाधिप स्त्रिभुवन इत्यर्थः । बहुजनप्रियनायकनिर्मिता बहवोऽनेके ये जनास्तेषां ये प्रिया अभीष्टा नायका नेतारो बहुजननिर्वाचितप्रतिनिधयइत्यर्थस्तै निर्मिता रचिता तथोक्ता । नवविधानसभा नूतनविधानपरिषद् । आशु शीघ्रं यथातथा । भविष्यति । इतीत्थं प्रकारेण जनान् जगादाऽवदत् । गदधातो र्लिट् ।

सचिवमण्डलमेतदनेकधा-
स्थितिषु लग्नमभून्नवशासने ।
जनपदोद्धरणाय बहून् नवान्
न नियमान् नियमान्नु चकार च ॥१४॥

सचिवेति ॥ एतन्नवनिर्मितं सचिवमण्डलं - मन्त्रिमण्डलं नवशासने नूतनशिष्ट्याम्। अनेकधास्थितिषु नानाप्रकाराव-स्थासु लग्नमभूत् । जनपदोद्धरणाय देशोत्थानाय बहून् भूरीन् नूतनान् नियमान् व्रतान् 'नियमो व्रतमस्त्री' त्यमरः। निय-मांश्च प्रतिज्ञानान्यपि । इदं करिष्य इत्यङ्गीकारादिकमपीत्यर्थः। 'संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः' इत्यमरः । न चकार च । नु तर्के ।

क इह वा जनशासनयष्टिकां
समधिगत्य भवेज्जनसेवकः ।
धनविलासरसात् सचिवैरतो
विनयता नयता च तिरस्कृते ॥१५॥

क इति ॥ वाऽथवा । इहभुवि । जनशासनयष्टिकां प्रजाशासनदण्डं समधिगत्य संप्राप्य कः कोनाम पुरुषः । जनसेवको जनशुश्रूषको भवेत् । कोऽपि न भवेदित्यर्थः । अतोऽस्मात् कारणात् । सचिवै मन्त्रिभिर्धनविलासरसात् धनंवित्तं च विलासो विभ्रमश्च तयो र्योः रस आस्वाद स्तस्मात्तथोक्तात् । हेत्वर्थे पञ्चमी । विनयता विनयस्य भावो विनयता नम्रता । नयता नयस्य भावो नयता सुनीतित्वं च । 'तस्य भावस्त्वतलावित्यनेन तल्प्रत्ययः । 'तल-

न्तं स्त्रिया' मिति स्त्रीत्वम् । तिरस्कृते अपमानिते । नयविनयावुज्झितावित्यर्थः ।

न शमशेरभुजामिव शासनं
स्वभवदस्य तथापि न तोषकृत् ।
सचिवशिष्टिविरोधकरी सभा
जनतया न तया न कृता पुरे ॥१६॥

नेति ॥ तु किन्तु । अस्य मन्त्रिमण्डलस्य शासनं भूशासनम् । शमशेरभुजां शमशेर इतिपदं भुञ्जत इति शमशेरभुजस्तेषां शमशेराभिधानानामित्यर्थः । राणामिति यावत् । इव यथा । नाऽभवत् । तथापि तोषकृत् जनरञ्जकं न । अभवदिति पूर्वेणान्वयः । अतः पुरे नगरे तया सुशासनाभिलाषिण्या जनतया जनगणेन सचिवशिष्टिविरोधकरी मन्त्रिशासनविरोधकारिणी सभा परिषद् । न कृता न विहितेति न । कृतैवेत्यर्थः ।

सचिवमण्डलनाथ उपार्जयत्
बहुवसूनि स निर्धनवंशजः ।
तृणकुटीरगृहोऽरमताऽन्यथा
सितनिशान्तनिशान्तकरे कथम् ॥१७॥

सचिवेति ॥ निर्धनवंशजो दीनकुलोत्पन्नोऽकिञ्चन इत्यर्थः । स पूर्वोक्तः । सचिवमण्डलनाथो मन्त्रिमण्डलेश्वरः प्रधानमन्त्रीत्यर्थः । मातृकाप्रसाद इति यावत् । बहुवसून्यनल्पधनान्युपार्जयत् । अन्यथा यदि धनमुपार्जितं न भवेत् । तृणकुटीरगृहस्तृणानां घासानां यत् कुटीरं लघुगृहं तदेव गृहं वासस्थानं यस्य स तथोक्तः । 'कुटीर' इत्यत्र 'कुटीशमीशुण्डाभ्यो र' इत्यनेन रप्रत्ययः । स इति पूर्वेणान्वयः । सितनिशान्तनिशान्तकरे सितं धवलं यन्निशान्तं गृहं तदेव निशाया रात्र्या अन्धकारस्येत्यर्थः, अन्तकरं नाशकरं धवलत्वात्, तस्मिन् तथोक्ते वा सितनिशान्तं निशान्तकरः सूर्य इव धवलत्वेन साम्यम्, तस्मिन् तथोक्ते । 'निशान्तपस्त्यसदनं भवनागारमन्दिर' मित्यमरः । कथं केन प्रकारेण । अरमत रेमे ।

जनसदः स्वपतिं सचिवेश्वरं
ह्यकुरुत च्युतमस्य पदादपि ।
अथ गतेषु दिनेषु नृणाममुं
नवसभाऽऽव सभासमहो पुनः ॥१८॥

जनेति ॥ जनसदो जनसभा काङ्ग्रेस इत्यर्थः । सचिवेश्वरं प्रधानमन्त्रिणं स्वपतिं निजनाथं सभापतिमित्यर्थः । मातृ-

काप्रसाद मित्रियावत्। अस्य सभापतेः प्रधानमन्त्रिणश्च पदादपि स्थानाच्च च्युतं पतितमकरोत्। जनसभाऽस्मै सभापतिपदं नाऽददात्। तत एव प्रधानमन्त्रिपदाच्च मातृकाप्रसादश्च्युतोऽभूदित्याशयः। हीति पदं निश्चयार्थे। पदस्खलनानन्तरम्। दिनेषु गतेषु सत्सु नृणां जनानां नवसभा नूतनसदः। अपरा जनसभेत्यर्थः। सभासं तेजस्विनममुं मातृकाप्रसादं पुनराव रक्ष। 'अवरक्षणे' धातो र्लिट्। सभापतिं चकारेत्यर्थः। अहो आश्चर्यम्।

सुनियतिः पटुधीः खलु मातृका
पुनरवाप स मन्त्रिगणेशताम्।
अहह! 'केशर' मत्यजदादृतं
जनवरो नवरोचिरधीश्वरः ॥१९॥

सुनियतिरिति ॥ सुनियतिः शोभना नियतिर्यस्य स सुनियतिः सुभागधेयः। "दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधि" रित्यमरः। पटुधी श्चतुरमतिः स पूर्वोक्तः। मातृका मातृकाप्रसादः। पुन र्भूयः। मन्त्रिगणेशतां मन्त्रिणां गणो मन्त्रिगणस्तस्येशता तां मन्त्रिगणेशतां सचिवमण्डलेश्वरत्वमवाप

लेभे । पुनरपि प्रधानाऽमात्योऽभूदित्यर्थः । खलु निश्चयार्थे । नवरोचिरभिनवकान्तिर्जनवरो नरश्रेष्ठः । अधीश्वरो भूपतिस्त्रिभुवन इत्यर्थः । ‘राजा तु प्रणताशेषसामन्तः स्यादधीश्वर’ इत्यमरः । आद्दृतं सम्मानितं मातृकाऽनुपस्थित्यां सम्मानितमित्यर्थः । ‘प्रधानपरामर्शदाता’ इतिपदेन व्यवहृतमिति यावत् । केशरं केशराख्यं चन्द्रशमशेरसूनुमत्यजत् मुमोच । केशरः प्रधानपरामर्शदातृपदादपसारितस्तत्स्थाने मातृकाप्रसादः प्रधानमन्त्रीति पदेन राज्ञा स्थापित इति भावः । अहहेति खेदे । ‘अहहेत्यद्भुते खेद’ इत्यमरः ।

ललितमन्त्रिपदं प्रति लोलुभा
जनसभाः समितिर्जनमन्त्रिणाम् ।
किमु विनङ्क्ष्यति देश इतीह हा !
नहि दरं हि दरं च दधुर्हृदि ॥२०॥

ललितेति ॥ इह नेपाले ललितमन्त्रिपदं प्रति । प्रतियोगे द्वितीया । लोलुभा लोलुपाः । ‘लुब्धाऽभिलाषुकस्तृष्णक् समौ लोलुपलोलुभौ’ वित्यमरः । जनसभाः प्रजासमितयः ‘काङ्ग्रेस’ ‘प्रजापरिषद्’ ‘गोरखा परिष’ दित्यादय इत्यर्थः । जनमन्त्रिणां जनाः प्रजा एव मातृकादय इत्यर्थः ,मन्त्रिणः सचिवा इति

जनमन्त्रिणस्तेषां तथोक्तानां समितिः परिषद् । मन्त्रिमण्डल-मित्यर्थः । 'देशो राष्ट्रं विनङ्क्ष्यति नष्टो भविष्यति किमु' इतीत्थं दरमीषत् दरं भयं च । 'दरस्त्रासो भीतिर्भीः साध्वसं भय' मित्यमरः । हृदि हृदये । न हि मा । 'अभावे नह्य नो नापि मास्ममालं च वारण' इत्यमरः । दधुर्धारयामासुः । हि निश्चयार्थे । 'हि हेताववधारण' इति चामरः ।

स्वविषयोद्धरणाय कृतश्रमः

परिनिरीक्ष्य जनान् नृप ईदृशान् ।

विचिखिदे ह्यत एव नृजाऽस्य हृ-

न्मृदुतमं द्रुतमन्तरकामया ॥२१॥

स्वेति ॥ स्वविषयोद्धरणाय निजराष्ट्रोन्नत्यै 'नीवृज्जनपदो देशो विषय स्तूपवतन' मित्यमरः । कृतश्रमो विहितयत्नो नृपो राजा । जनान् । ईदृशानित्थं प्रकारान् स्वार्थपरायणानित्यर्थः । परिनिरीक्ष्य प्रसमीक्ष्य । विचिखिदे विशेषेण खिन्नोऽभूत् । हि निश्चयार्थे । अतएवाऽस्मात् कारणादेव । अस्य नृपस्य मृदुतमं

कोमलतमम् । 'अतिशायने तमबिष्ठनौ' इति तमप्रत्ययः । हृत् स्वान्तं 'स्वान्तंहृन्मोनसं मन' इत्यमरः । अन्तककान्तया मृत्युप्रेयस्या रुजा रोगेण दुतंपीड़ितम् 'टुदु उपतापे' धातोः कर्मणि क्तः ।

जनहिताय निजाधिकृतीरसौ
परिमिता विचिकीर्षुरनुत्तमाः ।
सरलधीःभवज्जनसेवकः
सहृदयो हृदयोग्ररुजा कृशः ॥२२॥

जनेति ॥ अनुत्तमा नविद्यत उत्तमा याभ्यस्तास्तथोक्ताः । निजाधिकृतीः स्वकीयाधिकारान् राजकीयाधिकारानित्यर्थः । जनहिताय लोककल्याणाय परिमिताः सीमिता विचिकीर्षु विविधित्सुः । "सनाशंसभिक्ष उ' रित्युप्रत्ययः । निखिलराजकीयाधिकारान विधानसभायै दत्वा स्वयं तु सीमितशक्ती राजा भवितुमुत्सुक इत्यर्थः । अतएव जनसेवकः प्रजानुरागी सरलधीरुदारबुद्धिः सहृदयो रसिकोऽसौ त्रिभुवनः । हृदयोग्ररुजा हृदयोत्पन्नकठिनरोगेण । कृशः क्षामोऽभवत् ।

हृदयरुक्प्रतिकारविधित्सुना
बत विदेश इतः प्रियभूभुजा ।
ध्रुवमदायि च तेन सुताय सा
नृपतिता पतिताय निजे पदि ॥२३॥

हृदयेति ॥ हृदयरुक्प्रतिकारविधित्सुना हृदयरुजस्तदाख्यरोगस्य यः प्रतिकारो निवारणं तं विधित्सुश्चिकीर्षुस्तेन तथोक्तेन । 'शनाशंसभिक्षउ' रित्यनेनोप्रत्ययः । प्रियभूभुजा लोकप्रियमहीभुजा । विदेशः परदेश इतः प्राप्तः । बतेति खेदे । तेन त्रिभुवनेन निजे स्वे पदि चरणे 'पदङ्घ्रिश्चरणोऽस्त्रिया' मित्यमरः । पतिताय प्रणताय । सुताय तनयाय महेन्द्रवीरविक्रमायेत्यर्थः । सा प्रसिद्धा । नृपतिता नृपते र्भावो नृपतिता भूपत्वं भूपाधिकारचिह्नानीत्यर्थः । 'तस्य भावस्त्वतला' विति तल्प्रत्ययः । अदायि दत्ता च । ध्रुवमिति निश्चयत्वे ।

A (१७ आश्विन २०११ वि०)


मा
का
ह्य
न्या
मा
घ ब प्र ति मं का तं ने पा ला धी श्व रं त
ज्य रा स्तु ल क लो मा त या शं र्व धे णा रु
दा

खड्गबन्धात्मकं युग्मकम्--

माधवप्रतिमं कान्तं नेपालाधीश्वरं तदा।
दारुणाधेर्वशं यातमालोकत सुराज्यमा ॥२४॥

मारशत्रोः पुरी भूयाज्ज्ञानतन्त्र्यान्मनोरमा।
मान्या ह्यवामा स्वप्नेऽस्मै शं सेत्युक्त्वा रमा ददौ ॥२५॥

माधवेति॥ तदा तस्मिन् दिने नृपतित्वदानदिन इत्यर्थः। सुराज्यमा सुष्ठु च तत् राज्यं सुराज्यं सुराष्ट्रं तस्य मा लक्ष्मीः सुराज्यमा नेपालराज्यलक्ष्मीरित्यर्थः। कर्त्री। 'इन्दिरा लोकमाता मा क्षीरोद-तनया रमे' त्यमरः। कान्तं सुन्दरं पतिं वा। माधवप्रतिमं मायाः लक्ष्म्या धवः पतिर्माधवस्तस्य प्रतिमोपमा यस्य तं माधवप्रतिमं विष्णुप्रतिमानं विष्णोरंशभूतमित्यर्थः। नृपो विष्णुरिति यथा श्रीमद्भगवद्गीतायाम्- 'नराणां च नराधिपः' इति। दामोदरो हृषीकेशः केशवो माधवः स्वभू' रित्यमरः। प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया' चेत्यमरः। नेपालाधीश्वरं नेपालस्याऽधीश्वरस्तं तथोक्तं नेपालमहीपालं त्रिभुवनमित्यर्थः। 'राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः' इत्यमरः। दारुणाधेर्दारुणश्चासावाधिर्दारुणाधिस्तस्य दारुणाधेर्भीषणमनोव्यथायाः 'पुंस्याधिर्मानसी व्यथे' त्यमरः। वशमाधीन्यं यातं गतं 'मया विरहितो नेपालः कीदृशो भवेदि'ति

स्वदेशानुरागात्मकचिन्ताग्रस्तमित्यर्थः । आलोकताऽपश्यत् ।

मारेति ॥ मान्या माननीया । अवामाऽवक्रा सरलेत्यर्थः । सा पूर्वोक्ता रमा लक्ष्मी राज्यलक्ष्मीरित्यर्थः । कर्त्री । मारशत्रोः स्मररिपोः शिवस्येत्यर्थः पशुपतेरिति यावत् । 'मदनो मन्मथो मारः प्रद्युम्नो मीनकेतन' इत्यमरः । पुरी नगरं कान्तिपुरीत्यर्थः । जानतन्त्र्यात् प्रज्ञातन्त्रत्वेन मनोरमा सुन्दरी भूयात् । राजधानी भूताया: कान्तिपुर्या उल्लेखेन समस्तराज्ये प्रजातन्त्रता भूयादिति बोद्धव्यम् । इतीत्थं स्वप्ने स्वप्नावस्थायामुक्त्वा कथयित्वा । अस्मै राज्ञे त्रिभुवनायेत्यर्थः । शं शर्म ददौ । हीति निश्चयार्थे । पद्ययुग्मकेऽत्र चित्रालङ्कारः । लक्षणं यथा 'पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते' इति । अत्र खड्गबन्धचित्रम् खड्गबन्धचित्रं यथा काव्यप्रकाशे – 'मारारिशक्ररामेभमुखैरासारंहसा । सारारब्धस्तवानित्यं तदार्तिहरणक्षमा ॥ माता नतानां संघट्टः श्रियां बाधितसम्भ्रमा । मान्याथ सीमा रामाणां शं मे दिश्यादुमाद्रिजा' इति ।

चिकित्सया विदेशेऽस्य रुजोऽगच्छन् यमालयम् ।
परन्तु धर्मराज्ञोऽस्य देहादपि प्रियोऽभवत् ॥२६॥

चिकित्सयेति ॥ विदेशे परदेशे यूरोपाख्यदेश इत्यर्थः ।

अस्य त्रिभुवनस्य रुजोरोगाः । चिकित्सया रुक्प्रतिक्रियया । 'अप्रत्ययादि' त्यकारप्रत्ययः । 'चिकित्सा रुक्प्रतिक्रिये' त्यमरः । यमालयं यममन्दिरमगच्छन् ययुः । रोगा एव मृता इत्यर्थः । असौ नीरोगोऽभूदित्याशयः । परन्तु किन्तु । धर्मराजः पितृपतिः । अस्यराज्ञो देहाच्छरीरादपि प्रियोऽभवत् । धर्मराजसंगमहेतवे देहमपि तत्याजेत्यर्थः ।

पार्थिवः पार्थिवं रूपं त्यक्त्वा दिव्यं दधौ वपुः

पृथिवी विकला भूता द्यौस्तु नूनं समङ्गला॥२७॥

पार्थिव इति ॥ पार्थिवोराजा । पार्थिवं पृथिव्या इदं पार्थिवं पृथ्वीतत्त्वनिर्मितं रूपं स्वरूपं त्यक्त्वा दिव्यं स्वर्गीयमदृश्यमित्यर्थः । वपुः शरीरं दधौ । पृथिवी विकला खिन्ना भूताऽभवत् । तु किन्तु । द्योरमरपुरी सुरलोको द्योदिवौ द्वे स्त्रियाम्" इत्यमरः । नूनंध्रुवं समङ्गला भूतेति पूर्णान्वयः ।

पञ्चतत्त्वान्यप्यखिद्यन्तेत्याह-

पृथिवी पार्थिवादेतत्स्वं तत्त्वमप्यखिद्यत ।

न शक्ष्यामीति निर्मातुं तथा चारु पुनर्वपुः ॥२८॥

पृथिवीति ॥ पृथिवी भूः । पार्थिवात् राज्ञः पृथिव्या ईश्वरा

पार्थिवस्तस्मात् 'तस्येश्वरः' इत्यण् । स्वं निजं तत्त्वं पृथ्वीतत्त्वमेत्याऽपि प्राप्याऽपि । 'पुनस्तथा तादृक् चारु सुन्दरं वपुः शरीरं निर्मातुं रचयितुं न शक्नोमि न शक्तास्मीतीत्थं चिन्तयाऽखिद्यत खिन्नाऽभूत् । उत्प्रेक्षाऽलङ्कारः । भूरपि मलिनाऽदृश्यतेतिभावः ।

ईदृशो निजतत्त्वेन करुणावरुणालयः ।
पुनर्न लप्स्यत इति सागरा रुरुदुर्ननु ॥२९॥

ईदृश इति ॥ सागरा अब्धयः । निजतत्त्वेन जलतत्त्वेन । ईदृश एतादृशः । करुणावरुणालयो दयासागरः । पुनर्भूयो न लप्स्यते न प्राप्स्यत इतीत्थं चिन्तया रुरुदुर्ननूत्प्रेक्षायाम् । सागरा अपि सशोका आसन्निति भावः ।

यथा भानोः प्रकाशेन दीपो भुवि मलीमसः ।
तथोर्ध्वतेजसाऽस्याऽभूत् सूर्यो नु दिवि धूसरः ॥३०॥

यथेति ॥ भानोः सूर्यस्य प्रकाशेन द्योतेन 'प्रकाशो द्योत आतप' इत्यमरः । भुवि पृथिव्यां दीपो यथा यादृशो मलीमसो मलिनो 'ज्योत्स्नातमिस्रे' त्यादिना निपातनादीमसप्रत्ययः । भवतीति शेषः । अस्य त्रिभुवनस्योर्ध्वतेजसोर्ध्वगामिना शरीरान्निर्गतेन तेजसा सूर्यतत्त्वेनेत्यर्थः । दिवि गगने सूर्यो भानुस्तथा

तादृशो धूसरो मलिन इत्यर्थः। अभूत्। नूत्प्रेक्षायाम्। अस्य सूर्यतत्त्वं सूर्यादप्यधिकतरमासीदित्यर्थः। सूर्योऽपि शोकेन मलिनोऽभूदित्याशयः।

वायवः "प्राणदातृत्वगुणेन प्रथिता वयम्।
अद्य प्राणहरा भूता" इति चिन्तापरा ननु ॥३१॥

वायव इति ॥ वायवः प्राणादिवायवो वायुतत्त्वानीत्यर्थः। प्राणदातृत्वगुणेनाऽसुदातृत्वधर्मेण प्रथिताः प्रख्याता वयमद्य प्राणहरा असुहारिणो भूता अभवामेतीत्थं चिन्तापरा आधिग्रस्ता ननु तर्के। आसन्निति शेषः। वायवोऽपि शोकग्रस्ता आसन्निति भावः।

आकाशीयगुणेनाऽस्य व्याप्तं खं नु समन्ततः।
न नूनं दुर्दिने प्राप्तस्तथा तेन पराभवः ॥३२॥

आकाशीयेति ॥ अस्य त्रिभुवनस्य। आकाशीयगुणेन नभस्तत्त्वेन शब्दात्मकतत्त्वेनेत्यर्थः। 'शब्दगुणकमाकाशम्' इति तर्कसङ्ग्रहः। 'वृद्धाच्छ' इतिछप्रत्ययः। खमभ्रं समन्ततः सर्वत्र व्याप्तं नु। अखिल आकाशः शब्देन व्याप्तः किम्वित्यर्थः। तेनाऽऽकाशेन तथा तादृशः पराभवः पराजयो नूनंध्र र

दुर्दिने मेघाच्छन्नेऽह्नि 'मेघाच्छन्नेऽह्नि दुर्दिन' मित्यमरः। न प्राप्तः। अस्याऽऽकाशतत्त्वमाकाशादधिकतरमासीदित्यर्थः। खमपि मलिनमभूदिति भावः।

ज्ञात्त्वेमं शोकवृत्तान्तं क्षणात् तद्बान्धवाः प्रजाः।
दिशां मुखानि शून्यानि व्यलोकन्ताऽश्रुनिभराः ॥३३॥

ज्ञात्त्वेति॥ इमं शोकवृत्तान्तं शोकोदन्तं क्षणादचिरेण वैज्ञानिकयन्त्रविशेषसाहाय्यात्। ज्ञात्वा विदित्वाऽश्रुनिर्भरा बाष्पपूर्णास्तद्बान्धवा राजबन्धवः। 'प्रज्ञादिभ्यश्च' त्यनेनाऽण्प्रत्ययः। प्रजाः जना दिशां काष्ठानां मुखानि शून्यानि व्यलोकन्ताऽपश्यन्।

विमानेन क्षणा न्नीतं नेपालं तत्कलेवरम्।
तीव्रस्वरेण जनता विह्वलाक्षी रुरोद हा! ॥३४॥

विमानेनेति॥ तत्कलेवरं त्रिभुवनशरीरं विमानेन वायुयानेन क्षणादचिरेण नेपालं नेपालाख्यामुपत्यकाम्। नेपालदेशवास्तव्या जना उपत्यकामप्युद्दिश्य 'नेपाल' इति वदन्ति। नीतं प्रापितम्। णीञ्धातोः क्तप्रत्ययः। विह्वलाक्षी विधुरितनयना जनता प्रजासंहतिस्तीव्रस्वरेण रुरोद हेति खेदे।

महिष्यस्तनयाश्चैव प्रजया सह विह्वलाः ।
आर्यतीर्थे ह्यकुर्वन् तच्छवसंस्कारमग्निना ॥३५॥

महिष्य इति ॥ विह्वला विधुरिता महिष्यो राजाङ्गनास्त-नयाश्च पुत्राअपि प्रजया जनतया सहैव साकमेव । अग्निना वह्निना । तच्छवसंस्कारं त्रिभुवननिर्जीवदेहदाहादिकर्म । आर्य-तीर्थे तदाख्यतीर्थे पशुपत्यासन्नवर्तिवाग्वतीकूल इत्यर्थः । अ-कुर्वन् विदधिरे । हीति निश्चयार्थे ।

अस्तमुत्तम इते भुवनेशे व्यापृताऽपि तमसा धरणीयम् ।
प्राप्य चन्द्रविशदाननकान्तिं 'श्रीमहेन्द्र' नृपतिं विर'राज' ३६

इति श्रीभरतराजशास्त्रिकृतौ महेन्द्रोदये महाकाव्ये राजाङ्के त्रिभुवनस्वर्गारोहणं नाम सप्तमः सर्गः ॥७॥

अस्तमिति ॥ उत्तमे श्रेष्ठतमे भुवनेशे जगदीशे राजनीत्य-र्थः । अस्तं मरणमिते प्राप्ते सति तमसा तमोगुणेन शोकेनेत्यर्थः । व्यापृताऽऽच्छादितापीयं दृश्यमाना धरणी पृथ्वी चन्द्रविशदान-नकान्तिं चन्द्र इव विशदाऽऽननस्य कान्तिर्यस्य तं तथोक्तमिन्दु-

निर्मलवदनश्रियं श्रीमहेन्द्रनृपतिं तदाख्यनृपालं प्राप्याऽधिगत्य विरराज शुशुभे । सूर्येऽस्तंगते सति तमसाऽऽच्छादिताऽपि पृथ्वी चन्द्रं प्राप्य शोभत इत्यपि व्यज्यते । स्वागतावृत्तम् 'स्वागतेति रनभाद्गुरुयुग्मम्' इतिलक्षणात् ।

इति श्रीशङ्करशास्त्रिविरचिते महेन्द्रोदयकाव्य-
व्याख्याने कुञ्चिकाख्ये सप्तमः सर्गः ॥७॥

अष्टमः सर्गः

स्वर्याते पितरि जनप्रिये स्वकीये
शोकेन व्यपहृतमानसो 'महेन्द्रः' ।
[A]बिभ्राणो धुरमवनेरपि प्रतापी
राज्यस्य द्रुतमभिषेकमाददे मा ॥१॥

स्वर्यात इति ॥ जनप्रिये प्रजावल्लभे स्वकीये निजे पितरि जनके त्रिभुवन इत्यर्थः । स्वर्याते स्वर्गं गते सति । भावे सप्तमी । स्वरव्ययंस्वर्गनाकत्रिदिवत्रिदशालया ' इत्यमरः शोकेन विषादेन व्यपहृतमानसो हृतचित्तः प्रतापी वीर्यवान ' अतइनिठना ' विनिप्रत्ययः । महेन्द्र स्तदाख्यो नृपः । अवनेः पृथिव्या धुरं भारं बिभ्राणो दधानः सन्नपि राज्यस्याऽभिषेकं द्रुतं सपदि यथातथा 'स्राग्झटित्यञ्जसाह्नाय द्राङ् मङ्क्षु सपदि द्रुत ' इत्यमरः । माऽऽददे न गृहीतवान् । प्रहर्षिणीवृत्तम् । ' म्नौज्रौगस्त्रिदशयतिः प्रहर्षिणीयम् ' इति लक्षणात् ।

A (बुधवार १६ फाल्गुन २०११ वि०)

राष्ट्रस्य स्थितिरखिलान्तरी सबाह्या
प्रत्य ा विपदमिता च हा तदासीत् ।
गम्भीरः सततनिगूढकार्य आदौ
तन्निष्ठामकुरुत स द्रुतं तथापि ॥२॥

राष्ट्रस्येति ॥ तदा तस्मिन् दिने राज्यशासनभारग्रहणदिन इत्यर्थः । राष्ट्रस्य राज्यस्य । सबाह्या बहिर्भवा बाह्या बाह्यया सहिता सबाह्या । आन्तरी स्वराष्ट्रान्तर्वर्तिनी । अखिला समग्रा स्थितिरवस्था प्रत्यग्रा नवा 'प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नव' इत्यमरः । विपदमापदमिता प्राप्ता च विपद्ग्रस्ता चेत्यर्थः । आसीत् । हेति खेदे । तथापि गम्भीरोऽज्ञातधीः सततनिगूढकार्यः सततं नित्यं निगूढं निष्पत्तेः पूर्वमविज्ञातं कार्यं यस्य स तथोक्तः । भगवान् वेदव्यासोऽपि पृथुं 'निगूढकार्यं' इतिं विशेषणेनाऽवर्णयत् यथा श्रीमद्भागवते चतुर्थस्कन्धे षोडशेऽध्याये-'अव्यक्तवर्त्मैष निगूढकार्यो गम्भीरवेधा उपगुप्तवित्तः । अनन्तमाहात्म्य गुणैकधामा पृथुः प्रचेता इव संवृतात्मे' ति । स महीन्द्रः । आदौ प्रथमम् । तन्निष्ठां तस्या राष्ट्रस्थितेर्निष्ठा निष्पत्ति स्तथोक्ताम् । 'निष्ठा निष्पत्तिनाशान्ता' इत्यमरः । द्रुतमञ्जसाऽकुरुत व्यधात् ।

चौरेभ्यो भयमभितः ससार राज्यं
तद्रोद्धुं व्यपगतधीरपारयन् द्राक्।
आमात्यं पदमथ 'मातृकाप्रसाद'-
^स्तत्याज प्रचुरजनै विंरोधितः सन् ॥३।

चौरेभ्य इति ॥ राज्यं राष्ट्रमभितः सर्वत्र । 'अभितः परितः समया निकषा हा प्रति योगेऽपी' ति द्वितीया । चौरेभ्यः स्तेनेभ्यः । 'भीत्रार्थानां भयहेतु' रितिपञ्चमी । भयं भीतिः ससार प्रसृतमभूत्। अथाऽनन्तरम् । द्राक् झटिति तत् भयं रोद्धुं निवारयितुमपारयन्नशक्नुवन्नतएव व्यपगतधीर्नष्टबुद्धिर्मातृकाप्रसादस्तदाख्यप्रधानामात्यः प्रचुरजनैर्बहुजनैर्विरोधितः सन् विहितविरोधः सन् । आमात्यममात्यस्येदमामात्यं साचिवम् । 'तस्येद' मित्यण् । पदं स्थानं तत्याज मुमोच । 'मन्त्री धीसचिवोऽमात्योऽन्ये कर्मसचिवास्तत' इत्यमरः ।

व्याकीर्णञ्जनपदशासनाधिकारा-
नेकाकी नृपतिरसौ दधौ स्वयं हि ।
राष्ट्रस्य स्थितिरिह पूर्ववत् सदोषा
माभूद् वै पुनरितिघोषणां च चक्रे ॥४॥

A (१६ फाल्गुन २०११ वि०)

व्याकीर्णानिति ॥ एकाक्येकः । ' एकदाकिनिच्चासहाय" इत्याकिनिच् प्रत्ययः। असौनृपति नृ पो महेन्द्र इत्यर्थः । व्याकीर्णान् विस्तृतान। जनपदशासनाधिकारान् देशशिष्ट्यधिकृतीः। स्वयमात्मना दधौ । हीतिनिश्चये। इह राज्ये राष्ट्रस्य राज्यस्य स्थिति मर्यादा पुनर्भूयः। पूर्ववत् प्रागिव विगतवर्षचतुष्टय इवेत्यर्थः।सदोषा दोषपूर्णा मा भूत् न भवेत् वै । इतीत्थं प्रकारेण घोषणां प्रवचनं च चक्रे ।

भूभारं वहति सति स्वयं महीन्द्रे
राज्येऽभूत् प्रतिजनमानसं सशान्ति ।
द्यौरासीदुचितपयोदशोभितान्ता
पृथ्वीयं समधिकशस्यशालिनी च ॥६॥

भूभारमिति ॥ महीन्द्रे महीशे भूभारं पृथ्वीधुरं स्वयमात्मना वहति धृते सति राज्ये नेपालराज्ये प्रतिजनमानसं निखिलप्रजाहृदयं सशान्ति शान्त्या सहितं सशान्ति। अभूत्। द्यौर्गगनमुचितपयोदशोभितान्तोचिता अनुकूलाश्च ते पयोदा मेघास्तैः शोभिता राजिता अन्ता अन्त्यभागा यस्याः सा तथोक्ता। आसीत्। इयं दृश्यमाना पृथ्वी धरा च समधिकशस्यशालिनी समधिकैः प्रचुरैः शस्यैर्धान्यादिभिः शालते शोभते तच्छीलेति। तथोक्ता आसीदिति पूर्वेणान्वयः।

श्री युवराजधिराजो वीरेन्द्रवीरविक्रम साहदेवः

धीमन्तं स्वतनुजमिन्द्रराज्यलक्ष्म्यां सञ्जातं कुलतिलकं वरं सद्विद्यम् ।
वीरेन्द्रं हरिरिव पुत्रकं जयन्तं भूपालः किल युवराट्पदेऽभ्यसिञ्चत् ॥

धीमन्तं स्वतनयमिन्द्रराज्यलक्ष्म्यां
सञ्जातं कुलतिलकं प्रियं सविद्यम् ।
वीरेन्द्रं हरिरिव पुत्रकं जयन्तं
भूपालः किल युवराट् पदेऽभ्यसिञ्चत् ॥७॥

धीमन्तमिति ॥ धीमन्तं बुद्धिमन्तमिन्द्रराज्यलक्ष्म्यां तन्नाम्न्यां ज्येष्ठमहिष्यां सञ्जातं प्रियं वल्लभं कुलतिलकं वीरेन्द्रं वीरेन्द्रवीरविक्रमाख्यं स्वतनयं निजात्मजं हरिरिन्द्रो जयन्तं तदाख्यं पुत्रकमिव भूपालो युवराट्पदे युवराजपदेऽभ्यसिञ्चत् किल ।

मार्गाणां गिरिविषमप्रदेशकेषु
निर्माणं कृषिविषये नवां व्यवस्थाम् ।
शिक्षायास्त्वरितविसारणं च कर्तुं
व्यासक्तोऽभवदवनेः स शासनाय ॥८॥

मार्गाणामिति ॥ स महेन्द्रः । अवनेः पृथिव्याः शासनाय शा... ...द्रवं... पृथ्वीशासितुमित्यर्थः । गिरिविषमप्रदेशकेषु गिरीणां पर्वतानां ये विषमप्रदेशा असमस्थलान्यारोहावरोहत्वात् । तेषु तथोक्तेषु । मार्गाणां वर्त्मनां निर्माणं कर्तुमित्यत्र सम्बन्धः । कृषि-

विषयेऽनृतकर्मणि 'अनृतं' कृषिरित्यमरः । नवां नूतनां व्यवस्थां प्रबन्धम् । शिक्षायाः शिक्षणस्य त्वरितविसारणं च शीघ्रप्रसारमपि कर्तुं विधातुं व्यासक्तो विशेषेणाऽऽसक्तो लग्नोऽभवत् ।

आरब्धं 'त्रिभुवनराजवर्त्म' पूर्तं
पन्थानः कति रचिताः समप्रदेशे ।
उत्तुङ्गाः शिखरिशिखाश्च वाजिमार्गै-
राश्लिष्टा नृपतिवरे प्रशासकेऽस्मिन् ॥६॥

आरब्धमिति ॥ अस्मिन्नृपतिवरे राजवरे प्रशासके शासितरि सति । आरब्धं कृतारम्भं त्रिभुवनसमय एवाऽऽरब्धमित्यर्थः । त्रिभुवनराजवर्त्म तदाख्यः पन्था उपत्यकाया भारतवर्षोत्तरसीमा [रक्सौल] पर्यन्तायतं तैलशकटचालनोपयोगि वर्त्मेत्यर्थः । पूर्तं समाप्तम् । निर्मितमित्यर्थः । समप्रदेशेऽविषमप्रदेशे 'तराइ' इत्याख्यप्रदेश इत्यर्थः । कति पन्थानोऽध्वानो रचिता निर्मिताः । उत्तुङ्गा अत्युन्नताः । 'उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे' इत्यमरः । शिखरिशिखाश्च शिखरिणां पर्वतानां शिखाश्चूडास्तथोक्ताः । 'महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः' इत्यमरः । वाजिमार्गैरश्ववर्त्मभिरश्वचालनोचित-

मार्गै रित्यर्थः । आश्लिष्टा आलिङ्गिता युक्ता इत्यर्थः । अभवन्नि-तिशेषः । उच्चाद्रिशृङ्गेष्वपि हयगत्यनुकूलानि वर्त्मानि निर्मिता-नीत्यर्थः ।

कुल्यानां बहुषु च देवमातृकेषु
क्षेत्रेषु द्रुतखननार्थमर्थ आत्तः ।
सञ्जाताः कति किल कौद्रवीणवप्राः
शालेयाः कृषकजनप्रमोदभाजः ॥१०॥

कुल्यानामिति । बहुषु प्रचुरेषु देवमातृकेषु वृष्ट्यम्बुफलि-तान्नेषु कुल्यादिरहितेष्वित्यर्थः । 'देशो नद्यम्बुवृष्ट्यम्बुसम्पन्न-व्रीहिपालितः । स्यान्नदीमातृको देवमातृकश्च यथाक्रम' मित्य-मरः । क्षेत्रेषु केदारेषु 'पुंनपुंसकयोर्वप्रः केदारः क्षेत्र' मित्यमरः । कुल्यानां कृत्रिमसरिताम् । कुल्याल्पा कृत्रिमासरि' दित्यमरः । द्रुत खननार्थं द्रुतं यथातथा खननं द्रुतखननं तदर्थं द्रुतखननार्थं शीघ्रनिर्मार्गार्थमर्थो वित्ताम् । आत्तो गृहीतः कोषादित्यर्थः । तेन राज्ञेति पूर्वप्रसङ्गाऽज्ज्ञेयम् । कति कतिपयाः कौद्रवीण-वप्राः कोद्रवोद्भवोचितक्षेत्राणि 'धान्यानां भवने क्षेत्रे ख' ञि-तिखञ्प्रत्ययः । कृषकजनप्रमोदभाजः क्षेत्राजीवानन्दकारिणः । 'क्षेत्राजीवः कर्षकश्चकृषिकश्च कृषीबल' इत्यमरः । शालेयाः ।

शाल्युद्भवोचितकेदाराः । 'व्रीहिशाल्योर्ढगि' ति ढक्प्रत्ययः। 'क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितम्' इति चामरः। सञ्जाता भूनाः किलेति निश्चयार्थे।

धान्यानां नवनवबीजकप्रयोगं
प्रत्यब्दं कृषकहिताय सञ्चयञ्च।
वित्तानां वितरणमल्पके कुसीदे
राजाऽसौ जनशिवकारकश्चकार ॥११॥

धन्यानामिति ॥ जनशिवकारको जनहितविधायकोऽसौ राजा। धान्यानां व्रीहीणां नवनवबीजकप्रयोगं नवप्रकारबीजप्रयोगम्। 'प्रकारे गुणवचनस्ये' ति द्विर्भावः। प्रत्यब्दं प्रतिवर्षं कृषकहिताय क्षेत्राजीवकल्याणार्थ। सञ्चयनमपि। वित्तानामर्थानामल्पके लघुप्रकारे कुसीदे वृद्धिजीविकायाम्। 'अर्थप्रयोगस्तु कुसीदं वृद्धिजीविका' इत्यमरः। वितरणमृणदानकर्म च प्रजाभ्य इति बोद्धव्यम्। चकार।

स्थानेषु प्रचुरतमेषु शिक्षणादेः
संस्थानामपि विदधे स सुव्यवस्थाम्।
सौहार्दप्रमुदितमित्रदेशकेषु
च्छात्रान् स्वागमयदात्मवित्तकैश्च ॥१२॥

स्थानेष्विति ॥ स महेन्द्रः। प्रचुरतमेष्वनल्पतमेषु स्थानेषु स्थलेषु नगरग्रामादिष्वित्यर्थः। शिक्षणादेः शिक्षाप्रभृतेः संस्थानामपि स्थितीनां च विद्यालयादिसंस्थानामित्यर्थः। 'संस्था तु मर्यादा धारणा स्थिति'रित्यमरः। सुव्यवस्थां सुप्रबन्धं विदधे चकार। छात्रान् विद्यार्थिन आत्मवित्ताकैश्च निजधनैरपि राष्ट्रकोषाऽतिरिक्तधनैरपीत्यर्थः। सौहार्दप्रमुदितमित्रदेशकेषु सौहार्देन मैत्र्या प्रमुदितानि हृष्टानि यानि मित्राणि सुहृदस्तेषां देशा एव देशकास्तेषु तथोक्तेषु भारतादिदेशेष्वित्यर्थः। स्राक् झटिति। अगमयत् प्रेषयामास।

> शिक्षाया इह च महत्तमैकसंस्था
> संस्थाप्याऽखिलविषयप्रपाठनाय।
> मात्रेत्थं गदितममुष्य कोविदैश्च
> प्रारब्धा बहुविधयोजनास्तदर्थम् ॥१३॥

शिक्षाया इति ॥ इह च नेपालेऽपि। अखिलविषयप्रपाठनाय समस्तविषयाऽऽध्यापनाय। शिक्षायाः शिक्षणस्य महत्तमैकसंस्था बृहत्तमैकस्थिति र्विश्वविद्यालयस्थितिरित्यर्थः। संस्थाप्या कार्या। इतीत्थममुष्य महेन्द्रस्य मात्रा जनन्या त्रिभुवनमहिष्येत्यर्थः। गदितमुक्तम्। कोविदैश्च मनीषिभिरपि। तदर्थं विश्वविद्यालयस्थापनार्थं बहुविधयोजना अनेकविधकार्याणि प्रारब्धाः प्रकर्षेणारब्धाः।

स्वास्थ्यस्याऽखिलजनतोषकारणार्थं
सेनाया अपि निजराज्यरक्षणार्थम् ।
त्राणार्थं घनविपिनस्य भूतिदस्य
प्राकारि प्रबलतमोऽमुना प्रबन्धः ॥१४॥

स्वास्थस्येति॥ अमुना महेन्द्रेणाऽखिलजनतोषकारणार्थं समस्तप्रजासन्तोषहेत्वर्थं स्वास्थ्यस्यौषधोपचारस्य, निजराज्यरक्षणार्थं स्वराष्ट्रत्राणार्थं न तु परराष्ट्राक्रमणार्थमिति बोद्धव्यम् । एतेन राजा शान्तिप्रिय इतिज्ञेयः। सेनाया सैन्यस्यापि, भूतिदस्य भूतिं ददातीति भूतिदस्तस्य भूतिदस्यैश्वर्यदायकस्य। एतेन नेपालस्य महाधनं वनमितिज्ञेयम् । "विभूतिर्भूतिरैश्वर्य'मित्यमरः । घनविपिनस्य गहनकाननस्य त्राणार्थं रक्षार्थं प्रबलतमो दृढतमः प्रबन्धो व्यवस्था प्राकारि प्रकर्षेणोऽकारि।

वाणिज्यं गृहरचनादिकाः कलास्ताः
सङ्गीतं जनहृदयानुरञ्जकं च ।
साहित्यं गमयति चात्मनः स्म यत्नैः
प्राचुर्यं कविवर एष भूमिपालः ॥१५॥

वाणिज्यमिति ॥ एष कविवरः कविश्रेष्ठोभूमिपालो भूपतिः। आत्मनो निजस्य यत्नैः प्रयासैः। करणभूतैः। वाणिज्यं वणिज्यां 'वाणिज्यं तु वणिज्या स्या' दित्यमरः। गृहरचनादिका भवननिर्माणादिका आदिशब्देन शिल्पादिकलाश्च ज्ञेयाः। ताः प्रसिद्धाः कलाः। जनहृदयानुरञ्जकं जनमानसाह्लादकं सङ्गीतं च। साहित्यं च। 'गुणवचनब्राह्मणादिभ्यः कर्मणिचे'' ति ष्यञ् प्रत्ययः। प्राचुर्यं प्रचुरतां समृद्धिमित्यर्थः। गमयतिस्म प्रापयामास।

चीनेन प्रबलमनाः सहाऽऽशु दूत्यं
सम्पर्कं स्वजनपदस्य स व्यधाच्च।
दाढर्यं चाऽनयदथ भारतस्य मैत्रीं
नेपालोऽभवदधुनेत्थमाप्तरक्षः ॥१६।

चीनेनेति ॥ प्रबलमना दृढचितः स महेन्द्रः। चीनेन चीनाख्यदेशेन सह। सहयोगे तृतीया। स्वजनपदस्यात्मराष्ट्रस्य दूत्यं दूतसम्बन्धि सम्पर्कं सङ्गमाशु शीघ्रं यथा तथा। व्यधाच्चाऽकुरुताऽपि। अथाऽनन्तरम्। भारतस्य भारतवर्षस्य मैत्रीं च सौहार्दमपि दाढ्र्यं दृढताम्। गुणवचनब्राह्मणादिभ्यः ष्यञ्' इति ष्यञ्प्रत्ययः। अनयत्। इत्थमनेन प्रकारेण नेपाल आप्तरक्ष आप्ता लब्धा रक्षा त्राणं येन स तथोक्तः। अभवत्

पारेऽब्धि क्षितितलभिन्नभागवर्ति-
स्वच्छन्दप्रचुरसमृद्धिराष्ट्रसंघे ।
स्वातन्त्र्यं निजविषयस्य चेच्छता नो
नेपालो नरपतिना कृतः सदस्यः॥१७॥

पारेऽब्धीति ॥ निजविषयस्य स्वदेशस्य । 'नीवृज्जनपदो देशो विषयस्तूपवर्तन' मित्यमरः । स्वातन्त्र्यं चाऽपारतन्त्र्यमपि । इच्छताऽभिलषता । स्थिरतां नेतुमिच्छतेत्यर्थः । नरपतिना नृपेण । नोऽस्माकं नेपालवास्तव्यानामित्यर्थः । नेपालो नेपालदेशः । पारेऽब्धि 'पारेसमुद्रम्' । पारे मध्येषष्ठ्या वा' इत्यव्ययीभावः । तत्संयोगादेकारान्तत्वं च पारेशब्दस्य । अवनि-विभिन्नभागवर्तिस्वच्छन्दप्रचुरसमृद्धिराष्ट्रसंघेऽवन्याः पृथिव्या ये विभिन्नभागा 'एशियायूरोप' इत्याद्याख्यभागास्तेषु वर्तीन्यवनिविभिन्नभागवर्तीनि तानि च तानि स्वच्छन्दानि स्वतन्त्राणि प्रचुरसमृद्धीनि धनधान्यसम्पन्नान्येतादृशानि यानि राष्ट्राणि तेषांसंघः समुदायस्तस्मिन् तथोक्ते । राष्ट्रशब्दपर्यन्तंविशेषणसमासः । संयुक्तराष्ट्रसंघ इत्यर्थः । सदस्यो विधिदर्शी 'सदस्या विधिदर्शिन' इत्यमरः । कृतोविहितः । हि निश्चयत्वे ।

राज्यस्थाखिलजनतोषणप्रवीणः
सद्धर्मः स्वयमवनेः सुशासकोऽपि ।
यत् पूर्वं निजजनकेन भाषितं तत्
कर्तुं चैहत मतिमान् स जानतन्त्र्यम् ॥१८॥

राज्यस्थेति ॥ मतिमान् धीमान् सद्धर्मः सुकृती । अतएव राज्यस्थाखिलजनतोषणप्रवीणो राज्येतिष्ठन्तीति राज्यस्था येऽखिलाः समग्राजनाः प्रजास्तेषां तोषणं सन्तोषकरणं तस्मिन् प्रवीणः कुशलस्तथोक्तः । स महेन्द्रः स्वयमवनेः पृथिव्याः सुशाकोऽपि सुशासिताऽपि । प्रजातन्त्रशासनादपि सुन्दरतरं शासनं कर्तुं क्षमोऽपीत्यर्थः । प्रागेव पुरैव । निजजनकेनाऽऽत्मपित्रा त्रिभुवनेनेत्यर्थः । यत् भाषितं गदितं तत् सर्वविदितं जानतन्त्र्यं प्रजातन्त्रत्वं कर्तुं विधातुं च । ऐहतैच्छत् ।

राष्ट्रेऽथ प्रचुरजनैः समीहितं तत्
कर्तुं स क्षितिपतिराशु नीतिदक्षः ।
स्थानीयप्रतिनिधिवृन्दसंसदर्थं
द्राङ् निर्वाचनतिथिघोषणां चकार ॥१९॥

राष्ट्र इति ॥ अथानन्तरम् । नीतिदक्षो नयनिपुणो राजनीतिनिपुण इत्यर्थः । स क्षितिपतिर्महीपतिः । राष्ट्रेराज्ये प्रचुरजनै र्बहुजनैः समीहितमाकाङ्क्षितं तत् प्रजातन्त्रत्वमाशु शीघ्रं यथा तथा कर्तुं विधातुं स्थानीयप्रतिनिधिवृन्दसंसदर्थं स्थानीयं 'स्थाने भवं' 'तत्र भव' इति छप्रत्ययः । यत् प्रतिनिधिवृन्दं निर्वाचितजनसमूहस्तस्य या संसद् सभा तदर्थं तथोक्तम् । द्रागञ्जसा निर्वाचनतिथिघोषणां निर्वाचनदिननिर्धारणव्याहृतिं चकार ।

राष्ट्रस्थस्थितिपरिवर्तनोत्सुकानां
संस्कारान् बहुविषयेष्वसौ प्रजानाम् ।
कृत्वेत्थं जनहृदयेषु राजसत्ता
ह्यादर्या सततमिति न्यवेशयच्च ॥२०॥

राष्ट्रस्थेति ॥ असौ राजा । राष्ट्रीयस्थितिपरिवर्तनोत्सुकानां राज्यरीतिपरिवर्तनोत्कानां प्रजानां बहुविषयेषु प्रचुरव्यापारेषु संस्कारान् परिष्कारान् । इत्थं पूर्वोक्तप्रकारेण कृत्वा विधाय । राजसत्ता नृपास्तित्वं देशे नृपोपस्थितिरित्यर्थः । सततं नित्यमादर्या मान्या हीति निश्चयार्थे । इतीत्थं भावं देशे राजसत्तया भवितव्यमिति भावमित्यर्थः । जनहृदयेषु प्रजामानसेषु न्यवेशयच्चाऽस्थापयच्च ।

आहूयाऽखिलनृपनीतिकोविदान् स
प्रासादे जनगणनायकान् कदाचित् ।
आमात्यान्नवसमितेर्विधातुकाम-
स्तेषामाशयममलं ग्रहीतुमैच्छत् ॥२१॥

आहूयेति ॥ स महेन्द्रः । कदाचित् कस्मिंश्चिद्दिने । आमात्यानवसमितेरामात्याया मन्त्रिसम्बन्धिन्या नवसमिते-र्नूतनसभाया नवमन्त्रिमण्डलस्येत्यर्थः । विधातुकामो निर्मा-तुकामः सन् । अखिलनृपनीतिकोविदान् समस्तराजनीति-ज्ञान् । जनगणनायकान् जनसमूहनेतॄन् प्रासादे निजभवन आहूय । तेषां जनगणनायकानाममलं निष्कपटमाशयमभि-प्रायं ग्रहीतुं ज्ञातुमैच्छदैहत ।

यातानां निखिलमनीषिणां तु सौधे
पार्थक्यात् प्रकटितनीतिभावनानाम् ।
तेभ्यः स्वाङ्नृपनयकोविदो ददौ न
क्ष्माधीशः सचिवसभासदस्यतां सः ॥२२॥

यातानामिति ॥ तु किन्तु सौधे प्रासादे यातानां निखिल-मनीषिणां सम्पूर्णविदुषां प्रकटितनीतिभावनानां प्रकटितानि

व्यक्तीकुर्वन्ति यानि नीते राजनीते भावनानि विवेचनानि तेषां तथोक्तानाम् । पार्थक्यादनैक्यात् । हेतौ पञ्चमी । तेभ्यस्तत्र-गतेभ्यो मनीषिभ्यः । नृपनयकोविदो राजनीतिविद्वान । स पूर्वोक्तः क्ष्माधीशःक्ष्मायाया अधीश क्ष्माधीशः पृथ्वीपतिः । 'गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनि मेदिनी मही' त्यमरः । सचिवसभासदस्यतां मन्त्रिपरिषद्विधिदर्शित्वम् । स्राक् झटिति । न ददौ ।

'टङ्क' प्राक्पदसहित 'प्रसाद' शब्द-
प्रख्यातं प्रथितयशोधनं जनं सः ।
आमात्ये प्रथमपदेऽभिषिच्य [A]जातु
प्रत्यग्रां सचिवसभां चकार चैकाम् ॥२३॥

टङ्केति ॥ स महेन्द्रः . जातु कदाचित् । टङ्कप्राक्पद-सहितप्रसादशब्दप्रख्यातं 'टङ्के' ति यत् प्राक्पदं पूर्ववर्ति पदं तेन सहितो युक्तो यः 'प्रसाद 'शब्दः 'प्रसाद' इति शब्दस्तेन प्रख्यातः प्रसिद्धस्तं तथोक्तम् । टङ्कप्रसादाख्यमित्यर्थः । प्रथित-यशोधनं प्रथितं प्रसिद्धं यशः कीर्तिरेव धनं वित्तं यस्यतम् । जनं नरमामात्ये मन्त्रिसम्बन्धिनि प्रथमपदे मुख्यस्थाने प्रधान-मन्त्रिपद इत्यर्थः । अभिषिच्याऽभिषेचनं कृत्वा । प्रधानामात्यं

A (२ शुक्रवार १३ माघ २०१२ वि०)

विधायेत्यर्थः। प्रत्यग्रां नवीनां 'प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनोनव' इत्यमरः। एकां सचिवसभां मन्त्रिपरिषदं चकार निर्ममौ च।

कारायां सह सखिभिर्न्यधायि यः प्राग्
जुद्धेनाऽऽमरणऽमतीवनिष्कृपेण।
आमात्यं पदमधुना स एव लेभे
सर्वत्र प्रभवति भाग्यमत्र लोके ॥२४॥

कारायामिति ॥ यः प्राक् पुरा जुद्धशमशेरशासनसमय इत्यर्थः। अतीवनिष्कृपेणाऽतिनिर्दयेन जुद्धेन तदाख्याभात्येनाऽऽमरणं मरणपर्यन्तं सखिभिः सह मित्रैः सार्कं रामहरिचूडाप्रसादादिमित्रैः सहेत्यर्थः। कारायां कारागृहे न्यधायि निहितः। अधुना सम्प्रति प्रजातन्त्रसमय इत्यर्थः। स एव यच्छब्दनिर्दिष्टः पुरुष एव। टङ्कप्रसाद एवेत्यर्थः। आमात्यं साचिवं पदं स्थानं लेभे। प्रधानामात्योऽभूदित्यर्थः। अर्थमसुमर्थान्तरेण द्रढयति–अत्रलोकेऽस्मिन् मर्त्यलोके सर्वत्र सर्वविषयेषु भाग्यं नियतिः प्रभवति समर्थं भवति। अत्राऽर्थान्तरन्यासोऽलङ्कारः।

आलोक्याऽवनिपतिकार्यमेतदच्छं
सर्वाऽभूत् प्रमुदितमानसा प्रजाऽथ ।
योग्येऽस्मिन् भुवनतले न कः प्रहृष्येत्
संप्राप्ते पदमनुकूलमञ्जसा नु ॥२५॥

आलोक्येति ॥ अथानन्तरम् । एतत् पूर्वोक्तं टङ्कप्रसाद-नियुक्त्यात्मकमच्छं शुद्धं कपटहीनमित्यर्थः । अवनिपतिकार्यं राजकर्माऽऽलोक्य समीक्ष्य सर्वा समग्रा प्रजा प्रमुदितमानसा हृष्टहृदया । अभूत् । योग्ये योग्यपुरुषेऽनुकूलमुचितं पदमञ्जसा शीघ्रं यथातथा सम्प्राप्ते सति । भावे सप्तमी । अस्मिन् भुवनतले जगतीतले कः को नाम सज्जनो न प्रहृष्येत् हृष्टो न भवेत् । सर्वे प्रसन्ना भवेयुरित्यर्थः । सज्जना गुणैकपक्षपातिनः खलु । नु तर्के ।

एष प्रागकुरुत पञ्चवर्षसाध्या
राष्ट्रस्था अभिनवयोजनाः सुशिष्ट्यै ।
ता दृष्ट्वा निखिलजना वदन्ति च स्म
'द्राग्देशो जगति धनी भविष्यतीति ॥२६॥

एष इति ॥ एष टङ्कप्रसादः । प्राक् प्रथमं सुशिष्ट्यै सुशासनाय पञ्चवर्षसाध्याः पञ्चाब्दीसमाप्या राष्ट्रस्थां राष्ट्रसम्ब-

निधनी । अभिनवयोजना नूतनकार्यप्रणालीरकुरुताऽरच-यत्। ता योजना दृष्ट्वा निखिलजनाः सर्वप्रजाः। देशो नेपाल-देशो जगति भुवने द्राक् झटिति धनी धनसम्पन्नो भविष्यतीति वदन्ति च स्म कथयन्ति स्म च।

भूयोऽसावयतत पार्थिवाय दातुं
राज्यार्थं कुलविधिपूर्वकाऽभिषेकम्।
राष्ट्रेभ्यो बहुधनभाञ्जि साधनानि
स्वं रम्यं विषयमनाययत्तदर्थम् ॥२७॥

भूय इति॥ असौ टङ्कप्रसादः। भूयः पुनः। राज्यार्थं राज्याय राज्यशासनायेत्यर्थः। कुलविधिपूर्वकाभिषेकं कुलस्य वंशस्य ये विधयः शास्त्रोक्तविधयस्तत्पूर्वकस्तद्युक्तो योऽभिषेकः स्नानं तं तथोक्तम्। पार्थिवाय राज्ञे दातुमयतताऽयतिष्ट। तदर्थं राज्याभिषेकार्थमसाविति पूर्वेणान्वयः। बहुधनभाञ्जि बहुमूल्यानि साधनानि साधनभूतपदार्थान्। राष्ट्रेभ्यो राष्ट्रान्तरेभ्यो भारतादिराष्ट्रेभ्य इत्यर्थः। स्वमात्मीयं रम्यं सुन्दरं विषयं देशं नेपालमित्यर्थः। अनाययत् प्रापयत्।

विस्तारं समुचितवर्त्मनां समन्ता-
न्निर्माणं नवदलपुष्पिनिष्कुटानाम् ।
संस्कारं बहुसरसां च राजधान्यां
विज्ञैर्द्राक् पटुमतिभि र्ह्यकारयत् सः ॥२८॥

विस्तारमिति ॥ स मन्त्री राजधान्यां कान्तिपुर्य्यां समन्तात् सर्वत्र समुचितवर्त्मनामुचिताध्वनां विस्तारं, नवदलपुष्पिनिष्कुटानां नवदलानि यानि पुष्पाणि तानि सन्ति येषु ते नवदलपुष्पिणो नूतनपर्णकुसुमिन एतादृशा ये निष्कुटा गृहारामास्तेषां तथोक्तानाम्। 'गृहारामास्तु निष्कुटा' इत्यमरः। निर्माणं रचनां, बहुसरसां चाऽनल्पतडागानामपि संस्कारं निर्मलीकरणं, पटुमतिभिश्चतुरधीभिर्विज्ञैर्विशेषज्ञैर्द्रागव्जसाऽकारयत् विधापयामास। हि निश्चयत्वे ।

वासन्तेऽहनि करणीय उत्तमेऽस्य
क्ष्माजानेरधिकृतराज्यकाभिषेकः ।
इत्युक्त्या गणकगणस्य तेन शीघ्रं
प्राकार्युन्नतपुरसौधसंस्कृतिश्च ॥२९॥

वासन्त इति ॥ अस्य क्ष्माजानेः क्ष्मा भूर्जाया यस्य तस्य तथोक्तस्य ।'जायाया निङि'ति समासान्तो निङ् । अधिकृतराज्य-

काभिषेकोऽधिकृतं गृहीतं पितुः प्राप्तमित्यर्थः । अधिकृतं यद्राज्यं तदेव राज्यकं तस्याऽभिषेकस्तथोक्तः । वासन्ते वसन्तभवे उत्तमे वरेऽहनि दिने, 'घस्रो दिनाहनी वा तु क्लीवे दिवसवासरा' वित्यमरः । करणीयो विधेयः । इतीत्थंभूतया गणकगणस्य ज्योतिर्विज्जनवृन्दस्य 'सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपी-त्यमरः । उक्त्या कथनेन । तेन टङ्कप्रसादेन । उन्नतपुरसौध-संस्कृतिश्च पुरेभवः सौधः पुरसौध उन्नतो यः पुरसौधस्तस्य संस्कृतिः परिस्कृतिरित्युन्नतपुरसौधसंस्कृतिर्नगरस्थोच्चभवन-परिष्कारोऽपि नगरमध्यस्थहनुमद्द्वाराख्यराजसदनसंस्कारो-पीत्यर्थः । तस्यैव भवनस्याभिषेकस्थानत्वात् । 'सौधोऽस्त्री राज-सदनं' मित्यमरः । शीघ्रं यथा तथा प्राकारि प्रकर्षेणाऽकारि ।]

संप्रेष्याऽखिलनिजमित्रदेशकीयान्

प्रख्यातान् प्रति सचिवान् निमन्त्रणानि ।

तेषां स्वागतकरणाय कारिताश्च

द्राक् तेन प्रचुरतमा नवा व्यवस्थाः॥३०॥

संप्रेष्येति ॥ अखिलनिजमित्रदेशकीयान् सर्वात्मिमित्र-राष्ट्रभवान् प्रख्यातान् प्रसिद्धान् सचिवानमात्यान प्रति निम-न्त्रणान्याह्वानानि संप्रेष्य प्रेषितानि कृत्वा तेषां निमन्त्रितमन्त्रि-

णां स्वागतकरणाय स्वागतार्थं च। तेन टङ्कप्रसादेन। नवा नूतनाः प्रचुरतमा बह्व्यो व्यवस्थाः प्रबन्धा द्राक् झटिति कारिताः।

स्थानं चाधिकरुचिरं स कन्दुकादेः
केल्यर्थं जनहृदयानुरञ्जनाय।
निर्माप्य प्रमुदितमानसैर्हि पौरै-
र्गीतोऽभूत् विमलयशाःस्वदेशभक्तः ॥३१॥

स्थानमिति॥ विमलयशा निर्मलकीर्तिः स्वदेशभक्तः स्वदेशानुरागी स टङ्कप्रसादः। कन्दुकादेः गेन्दुकप्रभृतेः। 'गेन्दुकः कन्दुकः' इत्यमरः। केल्यर्थं क्रीडार्थं भूतं स्थानं च स्थलमपि [सानो टुँड़ीखेल" इतिभाषायाम्] जनहृदयानुरञ्जनाय जनचित्तविनोदनायाऽधिकरुचिरमतिसुन्दरं निर्माप्य कारयित्वा। अत एव प्रमुदितमानसैः हृष्टचित्तैः पौरैः पुरवासिभि र्गीतः प्रशंसित इत्यर्थः। ह्यभूत्

धीमद्भि र्बहुविषयान्तरागतैस्तै-
र्नेपाले विरचितचारुवस्तुपुञ्जः।
द्रष्टव्यो निगदति मन्त्रिणीति पौरा-
वस्त्वैच्छन् नवविपणे प्रदर्शनाय॥३२॥

धीमद्भिरिति ॥ नेपाले विरचितचारुवस्तुपुञ्जो निर्मित-सुन्दरपदार्थसमुदायः । बहुविषयान्तरागतैरनेकराष्ट्रान्तरायातै-स्तैः प्रसिद्धैर्निमन्त्रितैर्वा। धीमद्भिर्विद्वद्भिः । द्रष्टव्यो विलो-कनीयः । इतीत्थं मन्त्रिणि सचिवे निगदति कथयति सति पौरा नागरिका नवविपणे नूतनापणे वस्तुप्रदर्शिन्यामित्यर्थः । वस्तु पदार्थं जातावेकवचनम्। प्रदर्शनायैच्छत।

वस्तूनामिह निचयो वणिग्गणेन
प्रासारि स्वविषयकीयगौरवाय।
कोऽप्यासीन्न खलु जनः पुरस्य शोभा
मौच्छ्रित्यं कुतुकतया विना विनेतुम् ॥३३॥

वस्तूनामिति। इह नवविपणे वणिग्गणेन वणिजां वाणिजानां गणः समूहस्तेन । 'वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक्' इत्यमरः। वस्तूनां पदार्थानां निचयः पुञ्जः । स्वविषयकीयगौरवाय स्वविषयकीयमात्मदेशीयं वा निज-व्यापारहितकरं यत् गौरवं महत्वं तस्मै तथोक्ताय 'तस्मै हित' मिति छप्रत्ययः । 'नीवृज्जनपदो देशो विषयस्तूपवर्तन' मित्यमरः। प्रासारि विस्तारितः। पुरस्य नगरस्य शोभां श्रियम् । औच्छ्र्यमुच्छ्रितस्यभाव औच्छ्रत्यमौन्नत्यम् ।

'गुणवचनब्राह्मणादिभ्यः कर्मणि च' तिष्यञ्प्रत्ययः। 'उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्ग' इत्यमरः। विनेतुं विशेषेणनेतुं विनेतुं संप्रापयितुं पुरशोभामधिकं वर्धयितुमित्यर्थः। कुतुकतया कुतुकस्यभावः कुतुकता तया कुतुकतया कुतूहलत्वेन 'कौतूहलं कौतुकं च कुतुकं च कुतूहल' मित्यमरः। विना रहितः। विनायोगे तृतीया। जनो नरः। कोऽपि नाऽऽसीत्। खलु निश्चयत्वे। सर्वेजनाः पुरश्रीवर्धयिष्यन्त आसन्निति भावः।

रम्याऽपि प्रकृतिगुणेन राजधानी
शृङ्गारैरधिरमणीयतामियाय।
युक्ताप्युत्तमवयसा तनूस्तरुण्या
भूषाभिर्ननु सुतरां द्युतिं विधत्ते ॥३४॥

रम्येति॥ राजधानी राजनगरी कान्तिपुरीत्यर्थः। प्रकृतिगुणेन निसर्गधर्मेण रम्या रमणीयाऽपि। स्वयं रम्यापीत्यर्थः। शृङ्गारैर्मण्डनैरधिरमणीयतामतिरम्यत्वमियाय जगाम। 'अभ्यासस्यासवर्णे' इतीयङादेशः। अतिरमणीयाऽभूदित्यर्थः। दृष्टान्तमाह-तरुण्या युवत्यास्तनूः शरीरमुत्तमवयसा श्रेष्ठवयोवस्थया यौवनेनेत्यर्थः। युक्ता सहिताऽपि प्रकृत्या चारु-

रपीत्यर्थः । भूषाभिरलङ्करणैः । हेत्वर्थे तृतीया । सुतरां नितरां द्युतिं शोभां विधत्ते विशेषेण धारयति । ननु निश्चयत्वे । भूषाभिरधिकसुन्दरी भवतीत्यर्थः ।

प्राकाराकृतिशिखरिप्रवेष्टितेयं

भाति स्मोपवनमुपत्यकेव लक्ष्म्याः ।

अत्राऽऽसन् मणिजटिता गृहावकाशाः

कुञ्जानामिव कुसुमान्वितान्तराणि ॥३५॥

प्राकारेति ॥ प्राकाराकृतिशिखरिप्रवेष्टिता प्राकाराणामिव आकृतयो येषां ते तादृशा ये शिखरिणः पर्वतास्तैः प्रकर्षेण वेष्टिता प्राकाराकृतिशिखरिप्रवेष्टिता वरणरूपपर्वतपरिवेष्टिता । 'प्राकारो वरणः साल' इत्यमरः । इयमुपत्यका राजधानीत्यर्थः । लक्ष्म्याः श्रिय उपवनमुद्यानमिव भाति शोभते स्म । अत्रोपत्यकायां मणिजटिता मरकतखचिता गृहावकाशा वेश्मान्तर्भागा धनिनां कोष्ठा इत्यर्थः । कुञ्जानां लतागृहाणां कुसुमान्वितान्तराणि कुसुमैः प्रसूनैरन्वितानि युक्तानि कुसुमान्वितानि तादृशान्यन्तराण्यन्तर्भागास्तथोक्तानि । इव यथा । आसन् । अत्रोपमा ।

दृष्टाऽपि प्रतिदिनमेव मानसेऽसौ
पौराणां नवनवकौतुकं वितेने ।
ये दूरादिह समये चिरान्निवृत्ता :
का तेषां कुतुककथा सविस्मयानाम् ॥३६॥

दृष्टेति॥ असौ राजधानी। प्रतिदिनमनुदिनं दृष्टाऽपि विलोकिताऽपि पौराणां पुरवासिनां मानसे हृदये नवनवकौतुकमभिनवकुतूहलम्। 'प्रकारे गुणवचनस्ये'ति द्विर्भावः। वितेने विस्तारयामास। ये जना इह राजधान्याम्। चिरात् समये बहुकाले दूरात् दूरस्थलात्। निवृत्ता परावृत्ताः। आसन्निति शेषः। सविस्मयानां साश्चर्याणां तेषां तादृशानां जनानां कुतुककथा कुतुकस्य कथा कुतुककथा कौतुकवार्ता का। तेषां कौतुकातिशयो न वर्ण्यत इत्यर्थः।

याति स्म प्रतिदिनमेव शैत्यभावो
वासन्तोदयमविलम्बमाकलय्य ।
आसीन्नु प्रकृतिरपीह सानुकूल्या
नेपालाधिपतिवराभिषेककामा ॥३७॥

यातीति॥ शैत्यभावः शीतस्य भावः शैत्यं तदेव भावः शीतता शिशिरर्तुलक्षण इत्यर्थः। अविलम्बं शीघ्रं वासन्तोदयं

वसन्तस्याऽयं वासन्तः स चासावुदयो वासन्तोदयस्तं मध्वाविर्भावमाकलय्योत्प्रेक्ष्य । प्रतिदिनमेवाऽनुदिनमेव यातिस्म गच्छतिस्म । शिशिरर्तुः शनैरगच्छदित्यर्थः । इह नेपाले प्रकृतिरपि भूगगनादिसृष्टिरपि नेपालाधिपतिवराभिषेककामा; नेपालस्य नेपालदेशस्य योऽधिपतिरधीश्वरस्तस्य यो वराभिषेक उत्तमाभिषेचनं तस्मिन् कामः काङ्क्षा यस्याः सा तथोक्ता । नेपालनरेशराज्याभिषेचनमनोरथा सतीत्यर्थः । 'इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः । कामोऽभिलाषस्तर्षश्च' त्यमरः । सानुकूल्याऽनुकूलस्य भाव आनुकूल्यं 'गुणवचनब्राह्मणादिभ्यः कर्मणिचे" तिः ष्यञ्' आनुकूल्येन सहिता सानुकूल्या साऽनुगुण्या । आसीन्नु ।

नृपाभिषेकस्य महोत्सवाय
महीव कान्तं मधुमाजुहाव ।
प्रसूनक्लृप्तिं दधती वनान्ते
मुदाऽऽविरासीदृतु'राज'लक्ष्मीः ॥३८॥

इति श्रीभरतराजशास्त्रिकृतौ महेन्द्रोदये महाकाव्ये राजाङ्के महेन्द्रभूपासनवर्णनं नाम अष्टमः सर्गः ॥८॥

नृपेति ।।मही पृथ्वी नृपाभिषेकस्य राजाभिषेचनस्य महोत्सवाय महोद्भवाय कान्तं सुन्दरं मधुं वसन्तर्तुम्। आजुहावाऽऽह्वानं चक्रे। इवोत्प्रेक्षायाम्। ऋतुराजलक्ष्मी वसन्तश्रीः 'शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरपि गद्यते' इति विश्वः। मुदा हर्षेण प्रसूनक्लृप्तिं पुष्पसम्पत्तिं दधती बिभ्रती वनान्ते काननान्ते। आविरासीदाविर्बभूव। उपेन्द्रवज्रावृत्तम् 'उपेन्द्रवज्रा प्रथमे लघौ से' ति लक्षणात्।

इति श्रीशङ्करशास्त्रिविरचिते महेन्द्रोदय-
काव्यव्याख्याने कुञ्चिकाख्ये अष्टमः सर्गः ॥८॥

नवमः सर्गः

नवभिः श्लोकै र्वसन्तं वर्णयति—

भूमण्डले क्षितिजकल्पितमध्यरेखां

प्राप्ते विवस्वति तदुत्तरभूमिभागः ।

गुञ्जद्द्विरेफवनपुष्पपरागवर्षै-

राज्याय कामसुहृदं सुरभिं सिषेच ॥१॥

भूमण्डल इति ॥ विवस्वति सूर्ये भूमण्डले भूगोलके क्षितिजकल्पितमध्यरेखां क्षितौजाताः क्षितिजा मानवा इत्यर्थो भूगोलशास्त्रवेत्तार इति यावत्, तैः कल्पिता मनोरचिता या मध्यरेखा मध्यस्थलस्यरेखा विषुवद्रेखेत्यर्थः, तां तथोक्ताम् । प्राप्ते याते सति । भावे सप्तमी । तदुत्तरभूमिभाग स्तस्या मध्यरेखाया उत्तरस्यामुदीच्यां यो भूमिभागः पृथ्वीभाग स्तथोक्तः । कर्तृपदमेतत् । कामसुहृदं मदनमित्रं सुरभिं वसन्तर्तुं 'वसन्ते पुष्पसमयः सुरभिः' इत्यमरः । गुञ्जद्द्विरेफवनपुष्पपरागवर्षैः-गुञ्जन्तः शब्दं कुर्वन्तो द्विरेफा भ्रमरा येषु तानि गुञ्जद्द्विरेफा-

ण्येतादृशानि यानि वनपुष्पाणि विपिनकुसुमानि तेषां परागाः पुष्परजांसि तेषां वर्षाणि वृष्टयस्तैस्तथोक्तैः । 'द्विरेफपुष्पलिड्भृङ्गषड्पदभ्रमरालय' इत्यमरः। राज्याय राज्ञोभावः कर्मवा राज्यं तस्मै राज्याय राज्यं कर्तुम् । 'राजाऽसे' इत्यनेन यक् प्रत्ययः। सिषेच' उत्तरस्यां दिशि वसन्तोदयोऽभूदित्यर्थः । वसन्ततिलका वृत्तम् 'उक्ता वसन्ततिलका तभजाजगौ गः' इतिलक्षणात्।

उद्दीपयन् मधुरकोकिलकण्ठनादै—
श्चेतोविकारमथ मान्मथमङ्गनानाम् ।
रम्यां समीरणविधूननकीर्णरेणु-
चूताटवीश्रियमृतुप्रभुरालिलिङ्ग ॥२॥

अथाऽऽविर्भावानन्तरम्। ऋतुप्रभुःऋतुराजो वसन्तइत्यर्थः। अङ्गनानां प्रमदानां मान्मथं मन्मथस्याऽयं मान्मथ स्तंमान्मथं कामजन्यं चेतोविकारं मनोविकृतिं मधुरकोकिलकण्ठनादैर्मधुराः श्रवणप्रिया ये कोकिलकण्ठनादाः पिकगलस्वराःस्तैस्तथोक्तैः। करणभूतैः । उद्दीपयन्नुत्कर्षेण वर्धयन् सन्। रम्यां रमणीयां समीरणविधूननकीर्णरेणुचूताटवीश्रियं समीरणो मारुतस्तेन यत् विधूननं विशेषेण धूननं चालनं 'धून्वोण्यन्तल्ल्युट्' 'धून्प्रीञोर्नुग्वक्तव्य' इति नुक्, तेन कीर्णाः प्रसृता रेणवः

परागा येषां त एतादृशा ये चूताः सहकारास्तेषां याऽटव्यरण्यं तस्याः श्रीः शोभा तां तथोक्ताम्। 'समीरमारुतमरुज्जगत्प्राण-समीरणाः' आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः' 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इति सर्वत्रामरः। 'शो-भासम्पत्तिपद्मासु लक्ष्मीः श्रीरपि गद्यते' इतिविश्वः। आलि-लिङ्गाऽऽश्लिष्टवान्। वसन्तसमय आम्रवणशोभाऽधिकाऽऽसी-दिति भावः।

तत्स्वागताय धरणी रमणीयकुञ्जान्
निर्माय नूतनदलव्रततिप्रतानैः।
भीमाटवीमपि नवोपवनेन तुल्यां
रम्यां व्यधाद्विलसनाय विनिर्मितेन ॥३॥

तदिति॥ धरणी पृथ्वी। तत्स्वागताय वसन्तसत्काराय। नूतनदलव्रततिप्रतानैः नूतनानि प्रत्यग्राणि दलानि पत्राणि यासु ता नूतनदला एतादृश्यो या व्रतत्यो वल्लर्यस्तासां प्रतानानि तैस्तथोक्तैः। रमणीयकुञ्जान् रम्यलतागृहान्। निर्माय विरच्य। भीमाटवीमपि भीषणवनमपि विलसनाय विलासाय विनिर्मितेन विरचितेन केनाऽपि विलासिनेति बोद्धव्यम्, उपवनेनोद्यानेन तुल्यां सदृशीं रम्यां व्यधादकरोत्।

शीतोष्णतां स्वसमये समयन् सुचारौ
नक्तं दिनं च तुलयन् सुमति र्वसन्तः ।
सञ्चारयन् मनुजचेतसि साम्यवादं
भूतिं निजामपि चकार जनोपभोग्याम् ॥४॥

शीतेति ॥ सुचारौ रुचिरे स्वसमये निजकाले पुष्पसमय इत्यर्थः। शीतोष्णतां शितोष्णयो र्भावः शीतोष्णता तां तथोक्तां शैत्योष्णत्वे समयन् समीकुर्वन् , वसन्तस्य समशीतोष्णत्वात् । नक्तं रात्रीं दिनं च तुलयन् समघटिकं कुर्वन् । सुमति र्धीमान् वसन्तः सुरभिः मनुजचेतसि मानवहृदये साम्यवादमविषमवादं 'रस्सा' रूयदेशे भूतं वादमित्यर्थः । सञ्चारयन् सन् । निजां स्वकीयां भूतिमैश्चर्यंमपि जनोपभोग्यामुपभोक्तुं योग्योपभोग्या जनानामुपभोग्या जनोपभोग्या तां तथोक्तां मनुजभोगार्हां चकार व्यधात् । साम्यवादे त्वैश्वर्यं विभज्यतेऽतएव वसन्तोऽपि निजभूतिं जनोपभोग्यां चकारेति तात्पर्यम् ।

उन्मीलयन् कुरवकस्तवकं, सशोकं
रेजे ह्यशोकमपि पुष्पधनुर्वयस्यः ।
अन्योन्यसङ्गपरिवृद्धगुणद्वयाभ्यां
ताभ्यामदर्शि महिमा सहयोगशक्तेः ॥५॥

उन्मीलयन्निति ॥ कुरवकस्तबकं कुरवकगुच्छकम्। 'स्याद्गुच्छकस्तु स्तवकः कुड्मलो मुकुलोऽस्त्रियो' मित्यमरः। सशोकं शोकेन सहितं सशोकं सविषादं वसन्ताभावे। अशोकं तदाख्यपुष्पमपि। सशोकमप्यशोकमिति विरोधाभासः। उन्मीलयन् विकासयन्। पुष्पधनुर्वयस्यः कामसुहृत् वसन्त इत्यर्थः। रेजे चकाशे। हि निश्चयत्वे। अन्योन्यसङ्गपरिवृद्धगुणद्वयाभ्यामन्योन्ययोः परस्परयोर्यः सङ्गः सम्पर्कस्तेन परिवृद्धं समेधितं गुणद्वयं वर्णद्वयं कुरवकाशोकवर्णद्वयमित्यर्थः। ययोस्ताभ्याम् श्वेतरक्तवर्णाभ्यामिति यावत्। ताभ्यां कुरवकाशोकाभ्यां सहयोगशक्तेः पारस्परिकसामर्थ्यस्य महिमा गौरवमदर्शि दृष्टः।

औपत्यकालघुपुरोपवनेषु पांसून्
यत् कौसुमान् मृदुगतिः पवनो वितेने।
तेन प्रसूनसुरभौ सुरभौ चकाशे
कान्तेव कान्तिमति कान्तिपुरी वयस्के ॥६॥

औपत्यकेति ॥ मृदुगतिर्मन्दगमनः पवनः पवमानः। औपत्यकालघुपुरोपवनेषूपत्यकाया इमान्यौपत्यकान्युपत्यकाभवानि यान्यलघूनि विशालानि पुराणि तेषां यान्युपवनान्युद्यानानि तेषु। यत् कौसुमान् कुसुमानामिमान कौसुमान्

पौष्पान् पांसून् रेणून् ' रेणुर्द्वयोः स्त्रियां धूलिः पांसु र्ना न द्वयो रजः' इत्यमरः। वितेने विस्तारयामास। तेन विस्तारणेन प्रसूनसुरभौपुष्पसुगन्धिनि सुरभौ वसन्ते। 'सुरभिश्चाम्पके", स्वर्णे जातीफलवसन्तयोः। सुगन्धौ च मनोज्ञे च वाच्यवत्' इति विश्वः। कान्तिपुरी तदाख्यनगरी राजपुरीत्यर्थः। कान्तिमति कान्तिरस्यास्तीति कान्तिमत्तस्मिन् दीप्तिमति वयस्के वयएव वयस्कं तस्मिन्। स्वार्थेकः। यौवन इत्यर्थः। कान्तेव सुन्दरीव चकाशे-रेजे। युवत्यपि वसन्ते हि पुष्परेणुपूर्णशरीरा भवति। अत एव साम्यम्। अत्र छेकानुप्रासोऽलङ्कारः।

कान्तिपुर्यां वसन्तोदयेन न किञ्चिन्नवत्वमित्याह—

साऽऽसीदजस्रमृतुराजरुचेव युक्ता

शृङ्गारपूर्णरमणीयपुरीमणि र्वा।

यच्चाम्पकं विकचितं कुसुमं पुरान्ते

तेनाऽन्वमीयत मधोरुदयो नु तत्र ॥७॥

सेति॥ वाऽथवा। शृङ्गारपूर्णरमणीयपुरीमणिः शृङ्गारेण मण्डनेन पूर्णः या रमणीया रन्तुं योग्याः पुर्यो नगर्यस्तासु मणिस्तथोक्ता। सुन्दरपुरश्रेष्ठेत्यर्थः। सा कान्तिपुरी। अजस्रं

नित्यं 'नित्यानवरताजस्र' मित्यमरः। ऋतुराजरुचा वसन्तशोभया युक्तेव सहितेवाऽऽसीत्। पुरान्ते नगरान्ते यच्चाम्पकं चम्पकसम्बन्धि कुसुमं पुष्पं वसन्तविकास्यपुष्पमित्यर्थः। विकचितं प्रफुल्लम्। तेन चम्पकपुष्पविकचनेन तत्र कान्तिपुर्यां मधो र्वसन्तस्योदय आविर्भावः। अन्वमीयताऽनुमितः। नूत्प्रेक्षायाम्। अत्रोत्प्रेक्षालङ्कारः।

आसीदियं वसुमती युवतीव भोग्या
भूपाभिषेकसमये सविशेषभूषा।
भोग्ये तदा हि भवतो वसुधायुवत्यौ
यूनो विनोदयत आत्मरुचा यदा ते ॥८॥

आसीदिति ॥ भूपाभिषेकसमये राजाभिषेककाले वसन्तसमय इत्यर्थः। वसन्ते राज्याभिषेकत्वात्। वसुमती धनसम्पन्नाऽत एव सविशेषभूषाविशेषभूषया सहिता सविशेषभूषाऽधिकालङ्करणयुक्ता। इयं कान्तिपुरी। वसुमती सविशेषभूषा युवतीव भोग्या भोक्तुं योग्या भोगार्हाऽऽसीत्। अथवा सविशेषभूषेयं वसुमती पृथ्वी युवतीव भोग्याऽऽसीत्। 'सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा' इत्यमरः। हि यतो वसुधायुवत्यौ भूतरुण्यौ तदा भोग्ये भवतो यदा ते भूतरुण्यौ। आत्मरुचा स्वकान्त्या यूनो युवकान् विनोदयतो रञ्जयतः।

आसीन्न पुष्पसमयेन समादृतः किं
राज्याभिषेकमहएष मुदे जनानाम् ।
मार्गं व्यलोक्युभयतः पथिकैः सतृष्ण-
मुद्यानराजिसुषमा कथमन्यथा चेत् ॥९॥

आसीदिति ॥ पुष्पसमयेन वसन्तेन 'वसन्ते पुष्पसमयः सुरभि' रित्यमरः । समादृतः सम्मानित एष राज्याभिषेकमहो राज्याभिषेकोत्सवः । 'क्षण उद्धर्षो । महउद्धव उत्सव' इत्यमरः । जनानां मुदे प्रीत्यै किन्नाऽऽसीत् । आसीदेवेत्यर्थः । अन्यथा यदि नासीच्चेत् पथिकैरध्वनीनैः । 'अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपी' त्यमरः । मार्गं वर्त्मोभयतः । उद्यान-राजिसुषमोपवनपङ्क्तिशोभा कथं केन प्रकारेण सतृष्णं सस्पृहं व्यलोकि दृष्टा ।

आसर्गसमाप्ते राज्याभिषेकोत्सवं वर्णयति—

अस्मिन् क्षणे नवतृणै र्हरितीकृताऽच्छा
'तृणीरखेल' समभूपटमण्डपान्ता ।
अष्टापदाङ्कविहसद्घनदश्रियाऽभा-
देकोनपञ्चमुखमञ्चनिकेतनेन ॥१०॥

अस्मिन्निति ॥ अस्मिन् क्षणेऽत्रोत्सवे राज्याभिषेकोत्सव इत्यर्थः। 'क्षण उद्धर्षो। महउद्धव उत्सव' इत्यमरः। नवतृणै नूर्तनघासै र्हरितीकृता पोलाशीकृता 'पालाशो हरितो हरि' दित्यमरः। अत एवाऽच्छा निर्मला। पटमण्डपान्ता पटानां वस्त्राणां मण्डपा जनाश्रया [पाल इति भाषायाम्] अन्तेष्वन्तभागेषु यस्याः सा। 'मण्डपोऽस्त्री जनाश्रय' इत्यमरः। तूणीरखेलसमभूस्तूणीराणां निषङ्गाणां खेलाक्रीडा यत्र तूणीरखेला [टुंडीखेल इति भाषायाम्] सा चासौ समभूरविषमभूमिः। कर्तृपदमेतत्। 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयो' रिति 'क्रीड़ा खेला च कूर्दन' मिति चामरः अष्टापदाट्टविहसद्धनदश्रियाऽष्टापदस्य सुवर्णस्याऽट्टः क्षौममष्टापदाट्टस्तस्मिन् विहसन्ती धनदस्य कुबेरस्येव श्रीर्यस्मिन् तेन तथोक्तेन। 'रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम्' 'स्यादट्टः क्षौममस्त्रियाम्' मनुष्यधर्मा धनदो राजराजो धनाधिपः' इति सर्वत्रामरः। 'शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरपि गद्यते' इति विश्वः। एकोनपञ्चमुखमञ्चनिकेतनेनैकोनपञ्चैकहीनपञ्च चत्वारीत्यर्थः। मुखानि प्रवेशनिर्गमद्वाराणि यस्यस एकोनपञ्चमुख एतादृशो यःमञ्चो भाषणाय निर्मितं स्थानं स एव निकेतनं सदनं तेन तथोक्तेन। 'हीनन्यूनावूनगर्ह्या' वित्यमरः। चतुर्मुखविधातृशय्यागृहेणेत्यपि व्यज्यते। अभादशोभत।

'राजन्, जये' त्यविरलाक्षरशब्दविद्यु-
द्दीपस्रगुज्ज्वलमहत्कनकच्छदीद्धम् ।
मञ्चं विमुच्य नयनाञ्चलमञ्जसा नु
नान्यत्र निन्युरभिनन्दितनेत्रपौराः ॥११॥

राजन्निति ॥ अभिनन्दितनेत्रपौरा अभिनन्दितान्यानन्दितानि नेत्राणि येषां तेऽभिनन्दितनेत्रास्ते च ते पौराः पुरवासिन स्तथोक्ताः । नयनाञ्चलं लोचनाञ्चलम् । राजन्जयेत्यविरलाक्षरशब्दविद्युद्दीपस्रगुज्ज्वलमहत्कनकच्छदीद्धमविरलाक्षरा अत्रुटितवर्णा ये शब्दाः 'श्रीमहेन्द्रवीरविक्रमजये' ति शब्दा स्तै युक्तो यो विद्युद्दीपो भूतडित्प्रदीपः स एव स्रङ्माल्यं तयोज्ज्वलं यन्महत् कनकच्छदिः सुवर्णपटलं तेनेद्धं समृद्धं तत् तथोक्तम् । 'पटलं छदि' रित्यमरः । मञ्चं विमुच्य त्यक्त्वाऽञ्जसा झटिति । 'स्रागझटित्यञ्जसाह्नाय द्राङ्मङ्क्षुसपदि द्रुतं' इत्यमरः । अन्यत्र मञ्चातिरिक्तं स्थलं न निन्यु र्नाऽनयन् । नु तर्के ।

तुल्याधिकारमबला पुरुषश्च तत्र
संप्रापतुः सुनगराटनलोलचित्तौ"
एकाकिनी हि तरुणी तरुणस्तथैकः
संशोभते न रजनीसमये विहर्तुम् ॥१२॥

तुल्येति ॥ तत्र तूणीरखेलसमभुवि । सुनगराटनलोलचित्तौ सुष्ठु च तन्नगरं सुनगरं तस्मिन् यदटनं तेन हेतुना लोलं चित्तं ययोस्तौ सुनगराटनलोलचित्तौ सुन्दरपुरभ्रमणचपलमानसौ । अबला स्त्री पुरुषश्च पुमांश्च । तुल्याधिकारं समानाधिकृतिं भ्रमणविषय इतिबोद्धव्यम् । संप्रापतुर्लेभाते । नु तर्के । हि यतो रजनीसमये रात्रिकाले विहर्तुं विहारं कर्तुमेकाकिन्येका तरुणी युवतिः । न शोभते रात्रिविहारजन्यानन्दोत्कर्षहानित्वात् । तथातोऽङ्गेवैकस्तरुणो युवकः । न शोभत इत्यर्थः ।

आश्लिष्य निर्मलगलं कुचचूचुकान्ते
लोलं स्थितां सुकबरीमपनीय तत्र ।
नार्यस्तथा प्रियभुजालतिकां निधाय
ह्याजग्मुरिद्धहृदयाः प्रतिसन्ध्यमत्र ॥१३॥

आश्लिष्येति ॥ नार्यः स्त्रियः । नगरस्त्रिय इति बोद्धव्यम् । निर्मलगलं श्वेतकण्ठमाश्लिष्याऽऽलिङ्ग्य वेष्टयित्वेत्यर्थः । कुचचूचुकान्ते स्तनाग्रभागान्ते 'चूचुकं तु कुचाग्रं स्या' दित्यमरः । लोलमस्थिरं यथास्यात्तथा स्थितां वर्तमानां सुकबरीं सुकेशपाश मपनीयाऽपसार्य तत्र कबरीव्याप्तस्थले प्रियभुजालतिकां दयितबाहुवल्लरीं तथा तेनैव प्रकारेण यथाकबरीस्थिताऽऽसीत्तथैवेत्यर्थः । विधायात एवेद्धहृदया प्रणयोद्दीप्तमानसाः सत्यः

संवृद्धहृद्बाधा इत्यर्थः । अत्र तूणीरखेलसमभुवि प्रतिसन्ध्य सन्ध्यायां सन्ध्याम् । 'अव्ययं विभक्ती' त्यादिना समासः । आजग्मुरcraftयायुः । हीतिनिश्चयत्वे ।

ताम्बूलसौरभयुते वदनेऽङ्गुलीभ्या-
मामोदिनीमनलधूपितधूमवर्तिम् ।
आयोज्य सायमुचितांशुकदूरदेश-
वेषा विचेरुरिह वल्लभया युवानः ॥१४॥

ताम्बूलेति ॥ इह तूणीरखेलसमभुवि । सायं सन्ध्यायाम् । उचितांशुकदूरदेशवेषा उचितान्यंशुकान्यम्बराणि येषां त उचितांशुकाः दूरदेशस्याऽनिकटस्थजनपदस्य यूरोपादिराष्ट्रस्येत्यर्थः । इव वेषो वस्त्रधारणं येषां ते दूरदेशवेषा उचितांशुकाश्च ते दूरदेशवेषास्तथोक्ताः । युवान स्तरुणाः । आमोदिनीमासमन्तान्मोदते तच्छीलेत्यामोदिनी तामामोदिनीमानन्ददायिनीमनलधूपितधूमवर्तिमनलेनाऽग्निना धूपिता धूपीकृता या धूम्रवर्तिस्तदाख्यं वस्तु (चुरोट इति भाषायाम्) तां तथोक्ताम् । 'सन्तापितसन्तप्तौ धूपितधूपायितौ च दूनश्चे' त्यमरः । ताम्बूलसौरभयुते वोटिकापत्रसुगन्धसहिते वदने मुखेऽङ्गुलीभ्यामायोज्य

नियोज्य वल्लभया दयितया सह । सहयोगे तृतीया । विचेरु-र्व्यचरन् । अत्र स्वभावोक्तिरलङ्कारः ।

द्युम्नान्विताः सदयिता निजनावृतो वा
राष्ट्रान्तरादिह य एत्य जना विजह्रुः
श्रीस्त्रीद्वयेन रहितस्य तथा विहर्तु-
मुत्कस्य मानसरुजैधत तान्निरीक्ष्य ॥१५॥

द्युम्नेति ॥ द्युम्नान्विता वित्तायुता धनिन इत्यर्थः । 'द्युम्नं वित्तं बिलेऽपि चे' ति मेदिनी । सदयिताः सवल्लभाः सस्त्रियइत्यर्थः । येजनाः पुरुषा निजनीवृतआत्मदेशान्नेपाला-न्तर्गतप्रदेशादित्यर्थः । 'नीवृज्जनपदोदेशो विषयस्तूपवर्तन' मित्यमरः । वा राष्ट्रान्तरादन्यत् राष्ट्रं राष्ट्रान्तरं तस्मात् पर-देशात् भारतादिदेशादित्यर्थः । एत्यऽऽगत्येह तूणीरखेलसमभुवि । विजह्रुर्विहारं चक्रुः । तान् तादृशान स्त्रीधनसहितान् जनानि-त्यर्थः । निरीक्ष्याऽवलोक्य श्रीस्त्रीद्वयेन श्रीश्चस्त्री च श्रीस्त्रियौ त-योर्द्वयं तेन श्रीस्त्रीद्वयेन लक्ष्मीवनिताद्वितयेन । रहितस्य वर्जितस्य स्त्रीधनवर्जितस्येत्यर्थः । अकिञ्चनस्येति यावत् । तदपि तथा तेनैव प्रकारेण स्त्रीधनसम्पन्नजनेनेवेत्येर्थः । विहर्तुं विहारं कर्तु मुत्कस्योन्मनसः । 'स्यादुत्क उन्मना' इत्यमरः । मानसरुजा

मानसोऽयथा ' स्त्रीरुग्रुजा चोपतापरोगव्याधिगदामया ' इत्यमरः । ऐधत ववृधेऽसमर्थत्वात् ।

सर्वाधिकारसहितस्य नृपस्य साधोः
सत्त्वाद् यथा जनपदोन्नतिराशु भूयात् ।
न स्यात्तथान्यनियमेन कदेति जल्पन्
मर्त्यो विवादपटुरत्र बहुर्बभूव ॥१६॥

सर्वेति ॥ जनपदोन्नति देशोन्नतिः सर्वाधिकारसहितस्य सम्पूर्णाधिकारयुक्तस्य । असीमिताधिकारयुक्तस्येत्यर्थः । साधोः कुशलस्य नृपस्य भूपस्य सत्त्वाद्विद्यमानत्वात् । यथा येनप्रकारेणाऽऽशु शीघ्रं यथा तथा भूयात् । तथा तेन प्रकारेण । अन्यनियमेनाऽपरोपायेन राजानं सोमिताधिकारं कारयन्त्या प्रजातन्त्रादिपद्धत्येत्यर्थः । कदा न स्यात् । इति जल्पन् कथयन् विवादपटुरालापकुशलो मर्त्यः पूरुषः । जातावेकचनम् । अत्र बहुः प्रचुरो बभूव ।

ज्योतिर्विदाऽथ कथितो दिवसः क्रमेण
पूर्वाद्रिराजशिखराच्च विनिर्जगाम ।
राज्याभिषेकदिनमङ्गलकामनाभिः
प्रासाद तुङ्गशिखरं रविराचुचुम्ब ।१७।

ज्योतिर्विदेति ॥ अथानन्तरम् । ज्योतिर्विदा दैवज्ञेन कथितो निर्दिष्टो दिवसो वासरश्च क्रमेण शनैः पूर्वाद्रिराजशिखरात् पूर्वाचलेशशृङ्गादुदयशृङ्गादित्यर्थः । विनिर्जगाम विनिर्गतः । राज्याभिषेकाय दैवज्ञनिर्दिष्टं दिनमुदीयायेत्यर्थः।रविः सूर्यः सद्यउदितभानुरित्यर्थः। राज्याभिषेकदिनमङ्गलकामनाभीराज्याभिषेकस्यदिनं राज्याभिषेकदिनं तस्य या मङ्गलाः शुभाः कामना इच्छास्ताभि स्तथोक्ताभिः 'श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभं' मित्यमरः। प्रासादतुङ्गशिखरं सौधोन्नतचूडामाचुचुम्ब। उदयाद्रेः सूर्ये निर्गते हि तद्रश्मयोऽत्युन्नतत्वात्प्रासादशृङ्गं प्रथममाययुरितिभावः।

मन्दं ववु र्मलयगन्धवहा निरभ्रं
चाकाशमम्बरमणेः प्रभयाऽऽस पूर्णम्।
आशा मनोहरतया सुतरां विरेजु-
र्नूनं चराचरसुखाय दिनं तदासीत ॥१८॥

मन्दमिति॥ मलयगन्धवहा मलयमारुताः ससौरभवाता इत्यर्थः। मन्दं मन्थरं यथातथा रजोरहितमित्यर्थः। ववुः। निरभ्रं मेघशून्यमाकाशं गगनंच मेघराहित्यान्निर्मलमासीदित्यर्थः। अम्बरमणेः सूर्यस्य प्रभया दीप्त्या पूर्णमासाऽऽसीत् आसेतितिङन्तप्रति-

रूपकमव्ययम् । निर्मेघमाकाशं सूर्यप्रभयोज्ज्वलमासीदिति भावः । अत एवाऽऽशा दिशः । 'दिशास्तु ककुभः काष्ठा आशाश्च हरितश्च ताः इत्यमरः । अथवाऽऽशा राज्ञो महेन्द्रस्य राज्याभिषेकः समङ्गलो भूयादित्याद्याशा जनानाम् । मनोहरतया प्रसन्नतया क्रूरातपमेघावरणराहित्यान्मनोहर तयेत्यर्थः । सुतरां नितरां विरेजुः शुशुभिरे । तत् पूर्वोक्त' दिनं दिवसो राज्याभिषेकदिनमित्यर्थः । चराचरसुखाय स्थावरजङ्गमानन्दाय देवतिर्यङ्मनुष्यसुखायेत्यर्थः । नूनं ध्रुवमासीत् ।

भूपाजिराच्च बहिरायतराजवर्त्म
वास्त्रैरथै र्बहुतुरङ्गिभिरास युक्तम् ।
तस्यैककोण उचितैश्च कुथै र्युतानां
राजिर्व्यराजत गलन्मदकुञ्जराणाम् ॥१९॥

भूपेति ॥ भूपाजिराद्राजाङ्गणात् 'अङ्गणं चत्वराजिर' मित्यमरः । च बहि र्बाह्यप्रदेशे बहिर्योगे पञ्चमी । आयतराजवर्त्म दीर्घराजपथः । बहुतुरङ्गिभि र्बहव स्तुरङ्गा अश्वाः सन्ति येषु तैः । 'घोटके वीतितुरगतुरङ्गांश्चतुरङ्गमाः' इत्यमरः । वास्त्रैर्वस्त्रेण परिवृतैः । 'परिवृतो रथ' इत्यण् । रथैः स्यन्दनैः पुष्पर-

थैरिति बोद्धव्यम् । युक्तं सहितमासाऽऽसीत् । तस्य राजमार्गस्यैककोण एकभाग उचितैरनुकूलैः कुथैरास्तरणैः । 'प्रवेण्यास्तरणं वर्णः परिस्तोम कुथो द्वयो' रित्यमरः । युतानां सहितानां गलन्मदकुञ्जराणां स्खलद्दानवारणानाम् । 'मदोदान' मिति 'मतङ्गजो गजोनागः कुञ्जरो वारणः करी' ति चामरः । राजिः पङ्क्तिः । व्यराजत विशेषेणाऽशोभत ।

धाराप्रवीणतनवश्चलवालहस्ता
रश्मिप्ररुद्धगतयश्चपलाग्रपादाः ।
आवर्तिनः किल सुलक्षितपुष्टपार्श्वा
अर्वन्त उत्तमगुणा इह रेजिरे ते ॥२०॥

धारेति ॥ इह राजवर्त्मनि । धाराप्रवीणतनवो धारासु पञ्चगतिषु । 'आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् । गतयोऽमूः पञ्चधारा' इत्यमरः । प्रवीणा निपुणा । 'प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिता' इत्यमरः । तनुः शरीरं येषां ते तथोक्ताः । चलवालहस्ताश्चलोऽस्थिरोवालहस्तो वालधिर्येषां ते तथोक्ताः । 'पुच्छोऽस्त्रीलूमलाङ्गूले वालहस्तश्च वालधि' रित्यमरः । रश्मिप्ररुद्धगतयः प्रग्रहरुद्धगमनाः । 'किरणप्रग्रहौ रश्मिश्वे' त्यमरः । चपलाग्रपादाश्चपलावस्थिरावग्रौ पादौ चरणौ

येषां ते । आवर्तिनो दशावर्तवन्तः । 'प्रशंसायाम्-' इति णिनिः । तेच 'द्वावुरस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः । एकोभाले ह्यपाने च दशावर्तध्रुवाः स्मृता' इति । सुलक्षितपुष्टपार्श्वाः सुलक्षितं सम्यक् विलोकितं पुष्टमकृशं पार्श्वं येषां ते । 'बाहु-मूले उभे कक्षौ पार्श्वमस्त्रीतयोरध' इत्यमरः । उत्तमगुणा अर्व-न्तोऽश्वाश्च । 'वाजि वाहार्वगन्धर्वहयसैन्धवसप्तय' इत्यमरः । रेजिरे शुशुभिरे । अत्र स्वभावोक्तिरलङ्कारः ।

वीथ्यां स्थिता रविशशिप्रतिमाक्षियुग्मा
नैके चतुश्चपलचक्रयुताः सुवर्णाः ।
आसंश्च तैलशकटा इह ये नवीना-
स्तैरुत्सवः सशुभ एष भृशं रराज ॥२१॥

वीथ्यामिति ॥ वीथ्यां पङ्क्तौ वीथ्यालिरावलिः पङ्क्तिः श्रेणी-लेखा स्तु राजय' इत्यमरः । स्थिता वर्तमानाः । रविशशिप्रतिमा-क्षियुग्मा रविशशिप्रतिमं सूर्यचन्द्रतुल्यं वर्णाकाराभ्यां साम्य-म् । अक्षियुग्मं नयनद्वयं येषां ते तथोक्ताः । चतुश्चपलचक्रयुता-श्चत्वारि यानि चपलानि चञ्चलानि चक्राणि तै युताः । सुवर्णाः शोभना वर्णाः पीतरक्तादिवर्णा येषां ते । नवीना नूतना नैके ब-हवो ये तैलशकटा मृत्तारा इह राजवर्त्मन्यासंश्च । तै स्तैलशकटैः

सशुभः समङ्गल एष उत्सव उद्भवो भृशमत्यर्थं रराज शुशुभे।

नानार्णवोदकणपूर्णघटाप्तपाणि-
रब्रूत ब्राह्मणगणः श्रुतिपूतवाणीः।
चन्द्रारुणारुणबृहद्ध्वजलक्षणं तद्
राजाङ्गणं गगनभेदिरवेण रेजे ॥२२॥

नानेति ॥ नानार्णवोदकणपूर्णघटाप्तपाणिर्नानार्णवानां विविधसागराणामुदकणैर्जललवैः पूर्णा भरिता ये घटाः कुम्भास्तै राप्तः पाणि र्बाहु र्यस्य सः। ब्राह्मणगणो विप्रव्रजः। श्रुतिपूतवाणी र्वेदपवित्रितवचनान्यब्रूतो च्चारयामास चन्द्रारुणारुणबृहद्ध्वजलक्षणं चन्द्रश्चाऽरुणश्च चन्द्रारुणौ तौ यस्मिन तच्चन्द्रारुणं सेन्दुसूर्यं चन्द्रारुणं चारुणं रक्तं च बृहन्महच्च यद्ध्वजं केतनं तदेवलक्षणं चिह्नं यस्यतत्तथोक्तम्। तत प्रसिद्धं राजाङ्गणं भूपाजिरम्। गगनभेदिरवेणाऽऽकाशभेदिशब्देन रेजे शुशुभे। अत्रणकारस्य बहुप्रयोगात् वृत्यनुप्रासोऽलङ्कारः।

रम्यांशुका विविधचन्दनचर्चिताङ्गा-
स्तिर्यग्विलम्बिमणिकुण्डलचुम्बिगण्डाः।
भूपाङ्गणे दरनिमीलितपक्ष्मराला
नार्यो निजग्मुरथ वासगृहात् सहासाः॥२३॥

रम्यांशुका इति ।। अथानन्तरम् । रम्याण्यंशुकान्यम्बराणि यासां ताः । विविधचन्दनचर्चिताङ्गा विविधचन्दनै र्बहुविध-चन्दनचूर्णै श्चर्चितानि लिप्तान्यङ्गान्यवयवा याभिस्ताः । तिर्यग्विलम्बिमणिकुण्डलचुम्बिगण्डा स्तिर्यग् विलम्बिनी ये मणिकुण्डले मणिकर्णवेष्टने ते चुम्बत स्तच्छीलाविति तिर्यग्विलम्बिमणिकुण्डलचुम्बिनौ गण्डौ कपोलौ यासां ताः । 'कुण्डलं कर्णवेष्टन' मित्यमरः । दरनिमीलितपद्ममाला दरमीषत् यथातथा निमीलिता मुकुलिता पक्ष्ममाला पक्ष्मपङ्क्ति र्यासां ता स्तथोक्ताः । आनन्दातिशयादिति बोद्धव्यम् । 'पद्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेप्यणोयसि' त्यमरः । सहासाः सहास्याः । नार्यः स्त्रियः । सौधाङ्गना इत्यर्थः । वासगृहात् स्ववासस्थानात् भूपाङ्गणे राजचत्वरे । निजग्मु र्निययुः ।

चामीकरातिरुचिचामरचालनाद् य-
ञ्चोलाञ्चलेन चलितेन सुलोचनानाम् ।
चित्तान्यचञ्चलधियां चपलीकृतानि
तेनाऽप्यभून्नु कुचचूचुकगौरवर्द्धिः ।।२४।।

चामीकरेति ।। चामीकरातिरुचिचामरचालनाच्चामीकरेण सुवर्णेनाऽतिरुचिरतिशोभा यस्य तच्चामीकरातिरुच्ये-

तादृक् यच्चामरं व्यजनं तस्य चालनं धूननं तस्मात् । हेत्वथ पञ्चमी । 'चामीकरं जातरूपं महारजतकाञ्चने' इत्यमरः । चलितेन स्थानादपसृतेन सुलोचनानां सुनयनानां सुन्दरीणामित्यर्थः । चोलाञ्चलेन कूर्पासकैकभागेन । 'चोलः कूर्पासकोऽस्त्रिया' मित्यमरः । यदचञ्चलधियां स्थिरबुद्धीनां चित्तानि मानसानि चपलीकृतानि चञ्चलीकृतानि । तेन हेतुनाऽपि कुचचूचुकगौरवर्द्धिः कुचचूचुकयोः स्तनाग्रभागयोर्यत् गौरवं महिमा तस्यर्द्धिः समृद्धिस्तथोक्ता । सर्वैर्विलोकनात् गौरवोत्कर्ष इति ज्ञेयः । अभूत् । नु तर्के । चकाराणां वारंवारप्रयोगात् वृत्यनुप्रासोऽलङ्कारः ।

नृत्यप्रदर्शितमनोहरबाहुमूला-
ईषच्चलज्जघनचारुबृहन्नितम्बाः ।
आलोकिलोचनविचुम्बितनाभिरन्ध्राः
पण्याङ्गना ललितभावमदर्शयंश्च ॥२५॥

नृत्येति ॥ नृत्यप्रदर्शितमनोहरबाहुमूला नृत्ये नर्तने प्रदर्शिते मनोहरे चेतोहरे बाहुमूले भुजमूले याभिस्ताः । ईषच्चलज्जघनचारुबृहन्नितम्बा ईषच्चलद्भिः सालसगमनत्वात्, जघनैश्चारवः सुन्दरा बृहन्नितम्बा महच्छ्रोण्यो यासां ताः । आलोकि-

लोचनविचुम्बितनाभिरन्ध्रा आलोकिनां दर्शकाणां लोचनै र्नय-नै विचुम्बितानि नाभिरन्ध्राणिनाभिच्छिद्राणि यासां ताः। पण्याङ्गना वेश्याः। ललितभावं सुन्दरमानसविकारं 'विकारो मानसो भाव' इत्यमरः। अदर्शयंश्च।

श्वेतातपत्रितयशोविधुरश्मिजालः
संवीज्यमानवदनः सितचामरेण
राजाऽङ्गणाद् बहिरथो सहधर्मपत्न्या
सिन्दूरशोणवरवारणमारुरोह ॥२६॥

श्वेतेति अथो तदनन्तरम्। 'मङ्गलानन्तरारम्भप्रश्न-कार्त्स्न्येष्वथो अथे' त्यमरः। श्वेतातपत्रितयशोविधुरश्मिजालः श्वेतमातपत्र श्वेतातपत्रं सितच्छत्रं यशः कीर्तिर्विधुरश्मिजाल-मिव चन्द्रकिरणसमूह इव यशोविधुरश्मिजालं श्वेतातपत्रं कृतं श्वेतातपत्रितं श्वेतातपत्रितं यशोविधुरश्मिजालं येन स तथोक्तः। 'जालं समूह आनायगवाक्षक्षारकेष्वपो' त्यमरः। सितचामरेण धवलव्यजनेन। संवीज्यमानवदनो वीजिताननः। राजा महेन्द्रः अङ्गणात् बहि र्बहिः प्रदेशे। 'अपपरिबहि' रितिसमासविधान-ज्ञापकाद्बहिर्योगे पञ्चमो। धर्मपत्न्या धर्मस्य पत्नी धर्मपत्नी तया सह। सिन्दूरशोणवरवारणं सिन्दूरेण शोणोऽरुणोयो वरः श्रेष्ठोवारणः करी तं तथोक्तम्। आरुरोहाऽऽरूढवान्।

स्पर्शेन पादकमलस्य महीश्वरस्य
धन्यं गजः स्म मनुते निजजीवितं सः ।
'योषिद्वरा हि' महिषी' ति विचिन्त्य नार्या
आरोहतोऽपि न निनिन्द विधिं वशेशः ॥२७॥

स्पर्शेनेति ॥ स नृपारूढो गजः करी । महीश्वरस्य पृथ्वीपतेः । पादकमलस्य चरणारविन्दस्य स्पर्शेन निजजीवितमात्मजीवनं धन्यं पुण्यवत् । मनुते स्म मानयति स्म । महिषी कृताभिषेका राजपत्नी 'कृताभिषेका महिषी' त्यमरः । योषिद्वरा स्त्रीश्रेष्ठा हि खलु । इति विचिन्त्य तर्कयित्वा । नार्या अबलाया आरोहतोप्यारोहणादपि । आरोहणमारोहः "भावेघञतस्मात्" तसिः । वशेशो वशायाः करिण्या ईशोभर्ता वशेशः । 'करिणी धेनुका वशे' त्यमरः । विधिं भाग्यं न निनिन्द ।

सद्बन्धवः प्रणयिनो गुरवो बुधाश्च
भूपानुजीविपुरुषा अवरोधवध्वः ।
आरूढवन्त इह चत्वर इद्धवाद्ये
वैनीतकानि विविधानि च वाहनानि ॥२८॥

सदिति ॥ सद्बन्धवः सुज्ञातयः । प्रणयिनः प्रेमवन्तः ।

गुरवो मान्यजनाः । बुधाः विद्वांसः । अवरोधवध्वोऽन्तःपुराङ्गनाः भूपानुजीविपुरुषाश्च राजदत्तवृत्तिजीविजना अपि । इद्धवाद्य इद्धं समृद्धं वाद्यं सुषिरादिवाद्यं यस्मिन् तस्मिन् । इह चत्वरेऽङ्गणे राजाङ्गण इत्यर्थः । विविधान्यनेकप्रकाराणि वैनीतकानि परम्परावाहनानि 'परम्परावाहनं यत्तद्वैनीतकमस्त्रिया' मित्यमरः । वाहनानि हस्त्यश्वादियानानि च । 'सर्वं स्याद्वाहनं यानं युग्यं पत्त्रं च धोरण' मित्यमरः । आरूढवन्त आरुरुहुः ।

अग्रे चमूर्नियमचालितपादचारु-
मध्ये विभूषितगजे नृपतिः सभार्यः ।
पश्चाद्द्विपाश्वरथमृत्तरकेषु मर्त्या-
श्चेलुस्ततो हनुमदङ्कितमन्दिराय ॥२६॥

अग्र इति ॥ नियमचालितपादचारु र्नियमेन नियन्त्रकोक्तनियमेन चालितैः पादैश्चरणैश्चारुः सुन्दरी चमूः सेना 'ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमू' रित्यमरः । अग्रे पुरस्तात् । सभार्यः सपत्नीको नृपति र्महीपालो विभूषितगजे शृङ्गारितकरिणि मध्येऽन्तरे । पश्चात् नृपारूढगजस्य पश्चात् । मर्त्याः मनुष्याः द्विपाश्वरथमृत्तरकेषु हस्तिवाजिस्यन्दनतैलशकटेषु स्थिताः सन्तः । ततस्तत्स्थानात् 'नारायणहिटीनामप्रासादा'दित्यर्थः । हनुमदङ्कितमन्दिराय हनुमता वायुसुतेनाऽङ्कितं चिह्नितं यन्म-

न्दिरं सौधस्तस्मै तथोक्ताय। (हनुमान् ढोका दर्वार इति भाषायाम्)। चेलुरगच्छन्।

रथ्योचिताध्वतटवर्तिजनान्निरीक्ष्य
तैश्चेक्षितः सनृपतिः स्वजनैः समेतः।
सम्प्राप्तवान् पुरपथेन मरुत्सुतस्य
मूर्त्याङ्कितं निजकुलादृतभव्यसौधम् ॥३०॥

रथ्येति॥ स्वजनैर्निजजनैर्बन्धुभिर्वा समेतो युक्तो नृपतिर्नरनाथो महेन्द्र इत्यर्थः। रथ्योचिताध्वतटवर्तिजनान् रथ्येभ्यो रथवाहकाश्वेभ्यः 'रथ्यो वोढा रथस्य यः' इत्यमरः। अथवा रथ्यायै रथकट्यायै 'रथ्या रथकट्या रथव्रजे' इत्यमरः। उचिता अनुकूला येऽध्वानो मार्गा स्तेषां तटयो रुपान्तयोर्वर्तिनः स्थिता ये जना स्तान् तथोक्तान्। विशालमार्गोपान्तस्थजनसमूहमित्यर्थः। निरीक्ष्य प्रसमीक्ष्य तैर्जनैरीक्षितश्चविलोकितोऽपि मरुत्सुतस्य हनूमतो मर्त्या शरीरेणाऽङ्कितं चिह्नितं निजकुलादृतभव्यसौधमात्मवंशसम्मानितभव्यराजभवनं हनुमद्द्वाराख्यं प्रासादमित्यर्थः। पुरपथेन नगरवर्त्मना नगरमध्येस्थितत्वात्। संप्राप्तवान्।

तत्राऽभिषिच्य गुरवो त्रिविधर्णवाना-
मच्छिन्नया विमलया जलधारया तम्
आशोर्मयीं सुमरलां हृदयङ्गमांश्च
पेठुः श्रुतिस्मृतिपवित्रमनुं तदानीम् ॥३१॥

तत्रेति ॥ तत्र हनुमद्द्वाराख्यप्रासादे गुरव आचार्याः । विविधार्णवानामनेकसागराणामच्छिन्नयाऽच्युतया विमलया स्वच्छया जलधारया तं महेन्द्रमभिषिच्याऽऽशोर्मयीमाशीर्युक्तां सुसरलां हृदयङ्गमां मनोहरां च श्रुतिस्मृतिपवित्रमनुं वेदशास्त्रपूतमन्त्रं तदानीं तस्मिन् क्षणे पेठुरुच्चारयामासुः ।

कार्यं समाप्य धरणीरमणोऽपराह्णे
निष्क्रम्य पूर्ववदितोऽखिलसैन्ययुक्तः ।
आसाद्य तोरणशतानि मनोहराणि
तूणीरखेलसमभूस्थितमञ्चमाप ॥३२॥

कार्यमिति ॥ धरणीरमणः पृथ्वीवल्लभो राजेत्यर्थः । कार्यमभिषेचनादिकार्यं समाप्तं कृत्वा । अपराह्णे मध्याह्नानन्तर

-पातिसमयेऽखिलसैन्ययुक्तः सन् सकलसेनासमन्वितः सन्। इतो हनुमद्द्वाराख्यप्रासादात् पूर्ववत् प्राग्वत्। अग्रे चमूः कृत्वा मध्ये स्वयं स्थित्वा पश्चादन्यान् कृत्वेत्यर्थः। निष्क्रम्य निर्गत्य मनोहराणि सुन्दराणि तोरणशतानि बहिर्द्वारशतानि 'तोरणोऽस्त्री बहिर्द्वार' मित्यमरः। स्वागतायनिर्मितानि तोरणशतानीतिबोद्धव्यम्। आसाद्यप्राप्य तूणीरखेलसमभूस्थितं मञ्चमाप प्राप्तवान्।

तूणीरखेलसमभूतटवर्त्मसंस्था
वीथ्यां गता नियमिता नृपपूरुषैश्चः
सिंहासने सह मनोरमया महिष्या
भूपं निषण्णमिह सर्वजना अपश्यन् ॥३२॥

तूणीरेति ॥ तूणीरखेल समभूतटवर्त्मसंस्थास्तूणीरखेल समभुवो ये तटाः प्रान्तभागास्तेषु भवानि यानि वर्त्मानि तेषु सम्यक् स्थिता स्तथोक्ताः। वीथ्यां पङ्क्तौ गता भवाः। नृपपुरुषैः राजभटै र्नियमिताः कृतनियमाश्च। सर्वजनाः सर्वे च ते जनाः सर्वजनानिखिलप्रजा स्तत्रत्याः सर्वजना इत्यर्थः। इह मञ्चे सिंहासने भद्रासने 'नृपासनं तु यत्तद्भद्रासनं सिंहासनं तु तत्' इत्यमरः। मनोरमया सुन्दर्या महिष्या राज्ञ्या सह साकं। सह-योगे तृतीया। वसन्तं भूपं महीपमपश्यन् ददृशुः।

सारसादिरसा नाऽन्या याऽन्नासारैः ससाहसा ॥
साहसाल्पवसावास ! सवासाऽतैस्तु सा रसा ॥३४

सारसेति ॥ सारसादिरसा सारसादिभ्यः सरसीरुहादि-पुष्पेभ्यो वा पुष्कराह्वादिपक्षिभ्यो रसो द्रवो जल मित्यर्थः, यस्यां सा तथोक्ता सजलेत्यर्थः । जलयुक्तनदीतडागादियुता कमलादिपुष्पैः सारसादिपक्षिभिश्च सुरम्येति भावश्च व्यज्यते । 'रसा' इत्यस्य विशेषणं चैतत् । 'पङ्केरुहं तामरसं सारसं सर-सीरुहम्' 'पुष्कराह्वस्तु सारसः' 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवेरसः' इति सर्वत्रामरः । अन्याऽपरा जलरहितेत्यर्थः । मरुभूमिरिति यावत् । न । या रसाऽन्नासारैरन्नाय शस्याद्य-न्नाय शस्यादिसमृद्धया इत्यर्थः, य आसारा अन्नासारा धारा-सम्पाता स्तैः । 'धारासम्पात आसार' इत्यमरः । ससाहसा सोत्साहा । जलवर्षैः ससाहसेत्यर्थः । अतएव सवासा वासै र्जन-वसतिभिः सहिता सवासा । सा यच्छब्दनिर्दिष्टा, सरित्तडाग-पुष्पपक्षिभीरम्याऽन्नसमृद्ध्यै सदा वृष्टिसम्पन्ना, जनानां घन-वसतिभिर्युतेत्यर्थः । रसा पृथ्वी । 'भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरे' त्यमरः । साहसाल्पवसावास साहसायोत्सा-हाय बलाय वाऽल्पवसाया लघुवसाया आवासः स्थिति र्यस्मि-न्स साहसाल्पवसावास स्तत्संबुद्धौ साहसा ल्पवसावास भोकृशशरीर इत्यर्थः । प्रचुरवसो नरोऽलसो भवति । अल्पवसएव साहसवान् बलवांश्च । राज्ञे बल मुत्साहं

च दातुं वसयाऽप्यहपत्वेन स्थीयत इति व्यज्यते। 'मेदस्तु वपा वसा' इत्यमरः। ते भवतोऽस्तु। भोबलवन् राजन शस्यश्यामलाया धरायाः। शासनकुरु नतु मरुभूम्या इति तात्पर्यम। पद्मबन्धत्वादत्र चित्रालङ्कारः। लक्षणं यथा साहित्यदर्पणे –'पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते'। पद्मबन्धो यथा—



साहित्य दर्पणे यथा पद्मबन्धः-

मारमा सुषमा चारु रुचामारधूत्तमा।
मात्तधूतननावाम सा वामा मेऽस्तु मा रमा॥इति॥

अत्राऽनुष्टुब्वृत्तम

इत्थं जेगीयमानं तं गन्धर्वैरिव गायकैः ॥
पुष्पवृष्टिः कृताऽऽकाशाद् दिविजैरिव भूमिजैः॥३५॥

इत्थमिति ॥ इत्थमनेन प्रकारेण गायकैर्गीतिकुशलजनैर्गन्धर्वैरिव तुम्बुर्वादिगन्धर्वैर्यथा जेगीयमानमतिशयेन गीयमानं तं महेन्द्रं भूमिजैर्मर्त्यैर्दिविजै र्देवैरिवाऽऽकाशात् गगनात् विमानेन गगनमारुह्येति बोद्धव्यम् । 'अपादाने' पञ्चमी'ति पञ्चमी । पुष्पवृष्टिः प्रसूनवर्षः । कृता विहिता ।

प्रदीप्ता विद्युतां दीपा रवावस्तमिते सति ॥
आश्वास्य जनतां राजा प्रतस्थे'राज'मन्दिरम् ॥३६॥

इति श्रीभरतराजशास्त्रिकृतौ महेन्द्रोदये महाकाव्ये
राजाङ्के राज्याभिषेकवर्णनं नाम नवमः सर्गः ॥९॥

प्रदीप्ता इति ॥ रवौ सूर्येऽस्तमितेऽस्ताद्रिंगते सति । विद्युतां तडितां दीपाः प्रदीपाः प्रदीप्ता ज्वलिताः । राजा महेन्द्रः । जनानां जनसमूहमाश्वास्य मधुरवचनैराश्वासनं दत्वा राजमन्दिरं राजभवनं प्रति नारायणहिटीनामप्रासादं प्रतीत्यर्थः । प्रतस्थे गतवान् । अत्राऽनुष्टुब्वृत्तम् ।

इति श्रीशङ्कर शास्त्रिविरचिते महेन्द्रोदयकाव्य
व्याख्याने कुञ्चिकाख्ये नवम सर्गः ॥९॥

दशमः सर्गः

'एकदाऽल्पबलैःसाकं हयारूढो बली नृपः ॥
देशाटनोत्सुकमतिः प्रतस्थे मघवद्दिशम् ॥१॥

एकदेति ॥ एकदा । हयारूढोऽश्वोपरिस्थितः । बली बलवान् पर्वतीयमार्गगमनक्षम इत्यर्थः । वा प्रशस्तं बलं सैन्यमस्याऽस्तीति बली । नृपो भूपो महेन्द्र इत्यर्थः । देशाटनोत्सुकमति निजजनपदभ्रमणोत्कण्ठितधीः सन् । अल्पबलैः परिमित सैन्यैःसाकं मघवद्दिशं शक्रकाष्ठां पूर्वां दिशमित्यर्थः । प्रतस्थे । बल्यप्यल्पबलैः साकमिति विरोधाभासः । सर्गोऽत्राऽनुष्टुब्वृत्ताम् ।

महीन्द्रं तं 'महेन्द्रं' सा महेन्द्रमिव वीक्ष्य दिक् ।
प्रसन्नाऽभून्न का वा स्त्री पत्युर्योगेन तुष्यति ॥२॥

महीन्द्रमिति ॥ सा नृपप्रस्थिता दिक् काष्ठा । पूर्वादिगित्यर्थः । ऐन्द्रीदिगिति यावत् । तं पूर्वोक्तं महेन्द्रं तदाख्यं पृथ्वीपतिं भूशक्रामित्यर्थः । महेन्द्रं महांश्चासाविन्द्रो महेन्द्रस्तं महेन्द्रमिव-

मिन्द्र वीक्ष्य हृष्टा मत्वेत्यर्थः। प्रसन्नाऽभूत् । वा कास्त्रीकानारी पत्युः स्वामिनो योगेन सङ्गमेन न तुष्यति हृष्टा न भवति। सर्वाः स्त्रियः पत्युर्योगेन तुष्यन्ती त्यर्थः । ऐन्द्रीदिङ्नार्य्यपीन्द्रस्य दर्शनात्तुष्टाऽभवदिति भावः ।

असङ्ख्यमेकसङ्ख्यं स स्वराज्यस्य प्रदेशकम् ।
गत्वा शुश्राव तत्रत्यजनताया निवेदनम् ॥३॥

असङ्ख्य मिति ॥ स नृपतिः स्वराज्यस्थात्मजनपदस्या ऽसङ्ख्यमसमीकम् । ‘ मृधमास्कन्दनं सङ्ख्यं समीकं सांपरायिक ’ मित्यमरः। एकसङ्ख्यमेका सङ्ख्या गणना यस्य तं तथोक्तम् । (पूर्व १नम्बर इति भाषायाम्) प्रदेशं स्थानं गत्वा तत्रत्यजनताया स्तत्रभवस्य जनव्रजस्य निवेदनं शुश्रावऽऽकर्णयत् । ‘ असङ्ख्य मेकसङ्ख्य ’ मित्यत्र विरोधाभासः ।

तत्रत्याः पाठशालाः स निरीक्ष्य शिक्षणप्रियः ।
साहाय्यं विदधे तासां बहुभीरूप्यकैस्तदा ॥४॥

तत्रत्या इति ॥ तदा तस्मिन् दिने शिक्षणप्रियः शिक्षा प्रेमी स नृपति स्तत्रत्या एकसङ्ख्यप्रदेशे भवाः ‘अव्ययात्त्यवि ति त्यप्प्रत्ययः। पाठशाला विद्यामन्दिराणि निरीक्ष्य । तासां

पाठशालानां बहुभिः प्रचुरै रूप्यकै रजतखण्डैः साहाय्यं सहायतां विदधे चकार।

प्रविश्याऽथ प्रदेशं स द्विलक्ष्यं गिरिसुन्दरम्।
हिमाचलासन्नवर्तिदीर्घशैलायने बभौ ॥५॥

प्रविश्येति ॥ अथ स नृपतिः। गिरिसुन्दरं द्विलक्ष्यं द्विसंख्य (पूर्व २ नंबर इति भाषायाम्) प्रदेशं प्रविश्य। हिमाचलासन्नवर्तिदीर्घशैलायने हिमाचलस्य तुषाराद्रेर्य आसन्नवर्ती निकटस्थो दीर्घशैल आयतगिरि स्तस्मिन् यदयनं वर्त्म तस्मिन् तथोक्ते। 'अयनं वर्त्ममार्गाध्वपन्थानः पदवीसृति' रित्यमरः। बभौ शुशुभे।

तद्यशोराशिमालोक्य हिमगर्वं मुहुर्मुहुः।
अपश्यत् पातयन्तं स भूभृतं भूभृदध्वनि ॥६॥

तदिति ॥ स पूर्वोक्तो भूभृत भुवं बिभर्तीति भूभृन्महीधरो राजेत्यर्थः। अध्वनि मार्गे तद्यशोराशि नृपकीर्तिराशिम्। आलोक्य दृष्ट्वा हिमगर्वं हिमस्य गर्वो हिमगर्वस्तं तुषाराभिमानं मुहुर्मुहुरसकृत् पातयन्तं नृपकीतिराशिर्हिमराशेरुन्नततर इति मत्वा हिमपातनच्छलेन स्वाभिमानं त्यजन्तमित्यर्थः। भूभृ-

तं महीधरं पर्वतमित्यर्थः। हिमालयमितियावत्। अपश्यत् ददर्श ।

क्रमेण 'दोलखां' प्राप्य नत्वा भीमेश्वरं नृपः।
मन्त्रिमण्डलविस्तारं चक्रे तत्पावनस्थलात्॥७॥

क्रमेणेति॥ नृपः क्रमेण दोलखां तदाख्यां नगरीं प्राप्य भीमेश्वरं तदाख्यैंप्रसिद्धमहादेवं नत्वा नमस्कृत्य तत्पावन स्थलात् तत्पवित्रपुण्यभूमेर्मन्त्रिमण्डलविस्तारं सचिवपरिष-द्विस्तारं चक्रे ।

द्रष्टव्यानि स्थलानोह जगामाऽऽलस्यवर्जितः।
रात्रौ च वासे शुश्राव जनवृत्तान्तमुत्सुकः ॥८॥

द्रष्टव्यानीति॥ इह दोलखानगर्य्याम्। आलस्यवर्जितो निरालस उत्सुक उत्कण्ठायुक्तो नृपतिः। द्रष्टव्यानि स्थलानि जगा-म। रात्रौ वासे निजवासस्थाने जनवृत्तान्तं प्रजोदन्तं सुखदुः-खात्मकं वृत्तान्तमित्यर्थः। शुश्राव।

अथ प्रभाते तत्स्थानात् भटवेषधरो नृपः।
प्रस्थितो वासमेकस्मिन् ग्रामे सायं चकार च ॥९॥

अथेति॥ अथ भटवेषधरः सैनिकवेषधारी। स नृपः।

प्रभाते । तत्स्थानात् दोलखानगरात् प्रस्थितः सन् सायं सन्ध्या-याम्। एकस्मिन् ग्रामे वासं चकार च।

आरोहानवरोहांश्च शैलमार्गे पदे पदे ।

उपस्थितानथाक्रम्य 'चीसापानी' मुवास सः ॥१०॥

आरोहानिति ॥ अथ पूर्वोक्तग्रामात् प्रस्थानानन्तरम् । स नृपतिः । शैलमार्गे पदे पदे प्रतिस्थानमुपस्थितान् वर्तमानान् । आरोहान् शैलशिखागामिमार्गान् । अवरोहांश्च शैलाधोगामिमार्गानपि (उकालो ओरालो इति भाषायाम्) । आक्रम्य।ल्ल-ङ्घ्य चीसापानीं तदाख्यग्राममुवास ।

हिमालयोत्तुङ्गशृङ्गगलत्तुहिनसम्भवाम् ।

ताम्राभिधां शीततोयां कौशिकीं सोऽतरत्ततः ॥११॥

हिमालयेतिते।ऽन्यस्मिन् दिने चीसापानी ग्रामात्प्रस्थानान-न्तरम्। स नृपः। हिमालयोत्तुङ्गशृङ्गगलत्तुहिनसम्भवां तुषाराच-लोन्नत शिखरस्खलद्धिमजातामतएव शीतलजलां ताम्राभिधां ताम्राख्यां कौशिकीं नदीविशेषां ताम्रकौशिकीमित्यर्थः। अतरत् ।

ग्रामं ददर्शेत्युक्तम्, कीदृश इत्यकाङ्क्षा यामेकान्वयेनाऽ-

ष्टादशश्लेकात्मकेन कुलकेन विशिनष्टि—

क्षणेन सिकतासन्ने वारिदुर्गं मनोहरम् ।
विशालं धैवरं ग्रामं 'गढवारिं' ददर्श सः ॥१२॥

स नृपः क्षणेनाऽचिरात् । सिकतासन्ने वालुकानिकटे ताम्रकौशिक्याः सिकतानिकट इत्यर्थः । वारिदुर्गं वारि जलमेव दुर्गो यस्य तम् । नौकया विना कौशिक्याः दुर्लङ्घ्यत्वात् । 'वारिदुर्ग' मिति पदं 'गढवारि' पदं सार्थकं करोति । गढवारिं तदाख्यं विशालं पृथुं धैवरं धीवराणां दाशानामयं धैवरस्तम् "तस्येद' मित्यण् । कैवर्ते दाश धीवरा' वित्यमरः । ग्रामं संवसथं 'समौ संवसथग्रामा' वित्यमरः । ददर्श ।

विस्तीर्णं समभूयुक्तं विमानोचितभूतलम् ।
'चूडा' 'भारत' योरन्तर्वर्तिदेशेन तुल्यकम् ॥१३॥

विस्तीर्णेति ॥ विस्तीर्णसमभूयुक्तं विशालसमभूमि सहितमत एव विमानोचितभूतलं विमानाय वायुयानाये।चितं योग्यं भूतलं यस्मिन स तं तथोक्तम् । चूडाभारतयो 'श्चुरे' इति शैलस्य भारतवर्षस्य च । अन्तर्वर्तिदेशेन मध्यस्थप्रदेशेन । (तराह इति भाषायाम) तुल्यकं सदृशम् ।

ताम्रकौशिक्यम्बुकणैः प्रक्षालिततटस्थलम् ।
द्विसंख्यस्य प्रदेशस्य चतुर्दिक्केन्द्रवर्तिनम् ॥१४॥

ताम्रेति ॥ ताम्रकौशिक्यम्बुकणैः ताम्रकौशिक्या जललवः प्रक्षालिततटस्थलं धौततीरप्रदेशम्। द्विसङ्ख्यस्य प्रदेशस्य चतुर्दिक्केन्द्रवर्तिनं चतस्रश्चतुः सङ्ख्यका दिशः काष्ठास्तासां यः केन्द्रवर्ती मध्यस्थितस्तं तथोक्तम्।

कुल्यानिर्मितये लक्षाधिकरौप्यव्ययोचितम्।
अथवा वस्त्रभाण्डादिनिर्माणालययोग्यकम् ॥१५॥

कुल्येति ॥ कुल्यानिर्मितये कृत्रिमसरिन्निर्माणाय ताम्रकौशिक्याः कुल्यानिर्माणायेत्यर्थः। लक्षाऽधिकरौप्यव्ययोचितं लक्षात् सहस्रशतादधिकानि यानि रौप्याणि रजतखण्डानि तेषां व्ययेऽपगमे उचितस्तम्। अथवा पक्षान्तरे वस्त्रभाण्डादिनिर्माणालययोग्यकं वस्त्र भाण्डादीनां वस्त्रपात्रप्रभृतीनां निर्माणालयेभ्यो निर्मितिगृहेभ्यः कार्यालयेभ्य इत्यर्थः। योग्यएव योग्यक उचितस्तं तथोक्तम्।

स्वास्थ्यप्रदं प्रकृत्यैव सुन्दरं नागरक्षितम्।
महानगरनिर्मित्यायुचितस्थलमुत्तमम् ॥१६॥

स्वास्थ्येति ॥ प्रकृत्यैव निसर्गेणैव स्वास्थ्यप्रदं सुन्दरं नागरक्षितं महानगर निर्मित्ये विशालपुरनिर्माणायोचितस्थं योग्यभूमिमुत्तमं श्रेष्ठम्।

तारुण्यगौरवज्ञानशून्यै श्चेतोहरस्तनैः ।
कृष्णवर्णैः समाकीर्णं सुदतीयुवतीजनैः ॥१७॥

तारुण्येति ॥ तारुण्यगौरवज्ञानशून्यै स्तरुणस्य भावस्तारुण्यं यौवनं तस्य यद् गौरवं महिमा तस्य यद्ज्ञानं बोधस्तेन शून्या रहितास्तैः । तारुण्यज्ञानयुक्तै रेव न तु तद्गौरवज्ञानयुक्तै रित्यर्थः । चेतोहरस्तनै र्मनोहरपयोधरैः । कृष्णवर्णैः श्यामलवर्णैः सुदतीयुवतीजनैः शोभना दन्ता दशना यासांताः सुदत्यः । 'वयसि दन्तस्त दतृ' इति दतृप्रत्ययः स्त्रीत्वात् ङीप् । ताश्च ता युवत्य स्तरुण्य स्ता एव जना स्तैः समाकीर्णं सम्यक् व्याप्तम् ।

कौपीनवस्त्रमात्राङ्गैः स्वास्थयुक्तै र्निरक्षरैः ।
कठोरपाणिपादैश्च सरलैर्धीवरैर्युतम् ॥१८॥

कौपीनेति ॥ कौपीनवस्त्रमात्राङ्गै र्गुह्याच्छादनाम्बरमात्रावयवैः 'अकार्यगुह्ये कौपीन' मित्यमरः । स्वास्थ्ययुक्तै निरक्षरै रपठितैः कठोरपाणिपादैः पाणी च पादौ च पाणिपादं 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गाना' मिति द्वन्द्वैकवद्भावः । कठोरं पाणिपादं येषां तैः कठोरपाणिपादैश्च कठिनभुजचरणैरपि । सरलैरुदारचित्तैर्धीवरैः कैवर्तै र्युतंयुक्तम् । अत्र कौपीनशब्दो ग्राम्योऽपि ग्रामस्यैव वर्णनात् न ग्राम्यतादोषमावहति ।

विदेशार्जितवित्तस्य विदधद्भिर्वृथा व्ययम् ।
क्वचिदाङ्गलवेषैश्च स्थितं तरुणधीवरैः ॥१९॥

विदेशेति ॥ विदेशार्जितवित्तस्य परदेशोपार्जितधनस्य व्ययमपगमं वृथाऽनौचित्येन विदधद्भिः कुर्वद्भिराङ्गलवेषै राङ्गलवस्त्रधारिभिस्तरुणधीवरैश्च क्वचित् स्थितमुषितम् ।

श्ववृत्त्या जीवितैर्नित्यं पर्युदञ्चनपूरितैः ।
कुसीदकगृहीतस्व—गृहक्षेत्रै र्जनै र्युतम् ॥२०॥

श्ववृत्त्येति ॥ श्ववृत्त्या परसेवया 'सेवाश्ववृत्ति' रित्यमरः । जीवित धृतजीवनैः । नित्यं पर्युदञ्चनपूरितै ऋणयुक्तैः । 'स्यादृणं पर्युदञ्चन' मित्यमरः । कुसीदकगृहीतस्वगृहक्षेत्रैः कुसीदकै र्वार्धुषिक गृहीतानि स्वगृहक्षेत्राणि निजभवनक्षेत्रादीनि येषां तैः । 'कुसीदको वार्धुषिकोवृद्धयाजीवश्च वार्धुषि' इत्यमरः जनैर्युतं सहितम् ।

अभुक्तेऽपि धने पत्रं भुक्त्यङ्गीकृतये जनैः ।
अङ्गुष्ठ चिह्नितं दीनैः कारयद्भि र्वशीकृतम् ॥२१॥

अभुक्त इति ॥ धने वित्तेऽभुक्तेऽप्यनुपयुक्तेऽपि भुक्त्यङ्गी-

कृतये मुक्तः सोऽग्रस्य ग्रहणस्येत्यर्थः । अङ्गीकृतिः स्वीकृतिस्तस्यै । पत्रं प्रमाणकृत् पत्रं मयैतावद्धनं निजकार्याय भवत आदत्तमत स्तत्कृते मदीयं व्रैहेयं क्षेत्रं वाऽन्यत् किमपि तन्मूल्यवाहकं वस्तु भवता मत्तो ग्रहणीयमित्यादिलिखितं पत्रमित्यर्थः । (तमसुक इति भाषायाम्)। दीनै दरिद्रै निरक्षरैः इत्यपि ज्ञेयम्। अङ्गुष्ठचिन्हितमङ्गुष्ठ रेखितम् (बूढी औंलाको सहीछाप इति भाषायाम्)। कारयद्भिर्जनै वशीकृतम्।

उत्तमर्णगृहीतात्मव्रैहेयान्नैः कृषिबलैः।
मर्कटान्नैः कोरदूषैश्चाऽपर्याप्तैः सदोषितम् ॥२२॥

उत्तमर्णेति ॥ उत्तमर्णगृहीतात्मव्रैहेयान्नरुत्तमर्णेन धन प्रयोक्त्रा गृहीतानि आत्तानि। आत्मव्रैहेयस्य निजव्रीह्युद्भवोचितक्षेत्रस्याऽन्नानि येषां तैः! 'कृषीवलै' रित्यस्य विशेषणं चैतत्। 'उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमा' दित्यमरः। 'क्षेत्रं व्रैहेय शालेयं व्रीहिशाल्युद्भवोचित'मिति चामरः। मर्कटान्नैः कटिजान्नैः (मकै इति भाषायाम्) कोरदूषैश्च कोद्रवै रपि 'कोरदूषस्तु कोद्रव' इत्यमरः। सदा सर्वदाऽपर्याप्तैरसम्पन्नैः कृषीवलै क्षेत्राजीवै। 'क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः' इत्यमरः। उषितं स्थितम्।

पापानां धनिनां सङ्गात् शोषितार्थं निरोजसम् ।
सदा तद्विहितादेशलङ्घनाशक्तमानवम् ॥२३॥

पापानामिति ॥ पापानां धनिनां पाप्मनां सङ्गात् । शोषितार्थं शोषिता अर्था वित्तानि यस्मात् स तम् । अतएव निरोजसं निस्तेजस्कं सदा सर्वदा । तद्विहितादेशलङ्घनाशक्तमानवं-तेन धनिना विहितः कृतो य आदेश आज्ञा तस्य लङ्घनेऽशक्ता असमर्था मानवा नरा यस्मिन् स तम् ।

शतसंख्याधिकैर्युक्तमेकत्र स्थितसद्मभिः ।
उत्तमर्णाधमर्णानां कलहैर्गुञ्जितं सदा ॥२४॥

शतेति ॥ शतसंख्याधिकः शतसंख्यायाः शतगणानाया अधिकानि बहूनि तैः । एकत्रस्थितसद्मभिरेकत्रस्थगृहैर्युक्तं सहितमुत्तमर्णाधमर्णानां धनप्रयोक्तृग्राहकजनानाम् । 'उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमा' दित्यमरः । कलहैः सदा गुञ्जितं शब्दितम् ।

तथाप्यज्ञातविज्ञानजन्यदुःखसुखैर्जनैः ।
श्रमस्तेनैर्हृतेऽप्यात्मश्रमे सन्तोषिभिर्युतम् ॥२५॥

तथापीति ॥ तथापि दीनतापीडितैरपि । अज्ञातविज्ञानजन्यदुःखसुखैरविदितभौतिकविज्ञानै (साइन्स् इति भाषायाम्) अज्ञातदुःख सुखैः । 'जनै' रित्यस्य विशेषणं चैतत् । श्रमस्तेनैः परिश्रमचोरै र्विना दैनिकशुल्कं कार्यं कारयद्भि धूर्तैरित्यर्थः । आत्मश्रमे निजपरिश्रमे हृतेऽपि कार्यं कारितेऽपीत्यर्थः । सन्तोषिभिः सन्तुष्टै र्जनैः कृषिकजनै र्युत युक्तम् ।

अनागते ह्युत्तमर्णे द्वारे शान्तैः स्वतन्त्रकैः ।
परस्परप्रेमबद्धबान्धवैः पुरुषैर्युतम् ॥२६॥

अनागत इति ॥ उत्तमर्णे द्वारे द्वार्यनागतेऽनुपस्थिते सति शान्तैः शन्ताचित्तैः स्वतन्त्रकैः स्वतन्त्रैरिव निश्चिन्तै रित्यर्थः । परस्परप्रमबद्धबान्धवै रन्योन्यस्नेहबद्धबन्धुभिः पुरुषै र्युतम् ।

अन्योन्यगीतिसंलापदत्तयौवनमाधुरीः
ग्रामकन्याः समाक्ष्य प्रसन्नैः पुरुषै र्वृतम् ॥२७॥

अन्योन्येति ॥ अन्योन्यगीतिसंलापदत्तयौवनमाधुरीरन्योन्ययोः परस्परयो स्तरुणीतरुणयोरित्यर्थः । यो गीति संलापो गानालापः । (जुवारीखेल्नु इति भाषायाम्) तेन दत्ता यौवनमाधुर्य स्तारुण्यमाधुर्याणि याभि स्तास्तथोक्ताः । ग्राम-

कन्या ग्रामकुमारोः समासाद्य संप्राप्य प्रसन्नैः पुरुषै वृतं व्याप्तम्।

नृत्यगीतिप्रसक्ताभि र्मदिरालसलोचनैः।
रामाभिः पुरुषैः साकं हसितं गदितं स्थितम्॥२८॥

नृत्येति ॥ नृत्यगोतिप्रसक्ताभिनर्तनगानासक्ताभो-रामाभि धीवररमणोभिर्मदिरालसलोचनैः सुरालसनयनैः पुरूषै र्युवकैः साकं 'सहयुक्तेऽप्रधाने' इति तृतोया। हसितं कृतहास्यं गदितं कृतालापं स्थितं कृतवासमेतादृशं ग्रामम्।

अल्पावश्यकतं शून्यं महत्त्वेच्छा महारुजा।
कविकल्पनयाऽदृष्टां दधानं प्रकृतेःश्रियम्॥२९॥

अल्पेति ॥ अल्पावश्यकतमल्पा लध्वी आवश्यकता यत्रतम्। महत्त्वेच्छामहारुजा महत्त्वेच्छा महत्त्वाकाङ्क्षैव महारुक् महारोगस्तया। शून्यं रहितम्। कविकल्पनया कविमनोगत्याऽदृष्टामविलोकितां प्रकृते र्निसर्गवस्तुनः श्रियं शोभां दधानं बिभ्राणम्। एतादृशं गढवारि ग्रामं स नृपो ददर्शेति पूर्वेणान्वयः। अथैकादशभिः श्लोकर्मनस्थलीं ग्रामं वर्णयति–

नात्युन्नतेनातिदीर्घे वेश्मराजिस्रुजुज्ज्वले ।
'मनःस्थली' मथाऽऽसन्ने गिरिशृङ्गे ददर्श सः॥३०॥

नात्युन्नत इति॥ अथ गढवारिग्रामदर्शनानन्तरम् । स नृप आसन्ने निकटवर्तिनि नात्युन्नतेऽत्यौन्नत्येनाऽतिलघुत्वेन च रहिते । नातिदीर्घेऽतिदर्ध्येणाऽतिह्रस्वत्वेन च रहिते । वेश्मराजिस्रजुज्ज्वले वेश्मनां गृहाणां या राजिः पङ्क्तिः सैव या स्रङ्माल्यं तयोज्ज्वलोऽवदात स्तस्मिन् । गिरिशृङ्गे शलशिखरे 'मनःस्थलीं नदाख्यग्राम (मन्थली इति भाषायाम्) ददर्श ।

क्षेत्रोपरिस्थितारम्या वाटिकाःकटिजान्नदाः ।
यस्य भित्तिद्वये रुच्ये राजन्ते सद्मनामधः॥३१॥

क्षेत्रेत । यस्य शैलस्य मनः स्थलीग्रामस्येत्यर्थः । रुच्ये सुन्दरे भित्तिद्वये भित्त्योः कुड्ययो दक्षिणोत्तर कुड्ययोः शैलस्य पूर्वपश्चिमायतित्वात्, द्वयं तस्मिन् । सद्मनां वेश्मना मधोऽधस्तान् गृहाणा मिरिशृङ्गे स्थितित्वात् । क्षेत्रोपरिस्थिता व्रैहेयक्षेत्रे परिवर्तमानाः कटिजान्नदा मर्कटाप्रदायिन्यो रम्या वाटिका (बारी इति भाषायाम्) राजन्ते । यस्यशैलस्य शृङ्गे भवनानि, तदधस्तादुभयत्र वाटिका स्तदधस्तादुभयत्र व्रैहेयक्षेत्राणिच सन्तीति भावः ।

'रणजोरा' भिधा यस्य ग्रामस्य प्राणदा सरित्।
दाक्षिणात्यं तटं रम्यं प्रक्षालयति सन्ततम्॥३२॥

रणजोरेति ॥ यस्यग्रामस्य प्राणदा जीवनदात्री यदभावे मनः स्थलीभवानी बहूनि क्षेत्राणिशस्योत्पादकानि न भविष्यतीति बोद्धव्यम्। रणजोराभिधा रणजोरनाम्नीसरिन्नदी रम्यं सुन्दरं दाक्षिणात्यं दक्षिणदिक्स्थं तटं कूलं प्रक्षालयति।

यस्य दिश्युत्तरस्यां च वहते ताम्रकौशिकी।
यच्छोभां तुहिनैश्चारुर्नित्यं पश्यति शैलराट्॥३३॥

यस्येति ॥ यस्य ग्रामस्योत्तरस्यामुदीच्यां दिशि च ताम्र-कौशिकी वहते। अतएवाऽस्य परमाशोभाऽस्तीति बोद्धव्यम्। यच्छोभां यच्छ्रियं तुहिनैश्चारुर्हिमसुन्दरः शैलराट् हिमाद्रि नित्यं पश्यति। यस्माद्धिमालयोऽपि दृश्यत इति तात्पर्यम्।

यत्राऽऽस्ते भगवान् शर्वः श्रीविश्वेश्वरसंज्ञकः।
पुण्यवान् सुन्दरः शैलः कैलास इव भासते॥३४॥

यत्रेति ॥ यत्र मनःस्थलीग्रामे भगवान्। (ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इती-

रूपा।' इति। षड़ैश्वर्यसम्पन्न इत्यर्थः। श्रीविश्वेश्वरसंज्ञकः श्रीविश्वेश्वरनामधेयः। शर्वः शम्भुः ईश्वरः शर्वईशानः शङ्करश्चन्द्रशेखर' इत्यमरः। आस्ते वर्तते। अतएव पुण्यवान् सुन्दरः शैलो गिरिर्मनस्थलीपर्वतः कैलासस्तदाख्यशिवशैल इव भासते शोभते।

यत्राऽन्योन्यसमाश्लिष्टवटपिप्पलयोरधः।
भा 'तीन्द्रलाल' विप्रेण कारितं ग्रावचत्त्वरम्॥३५॥'

यत्रेति॥ यत्र यस्मिन् शैलग्रामेऽन्योन्यसमाश्लिष्टवटपिप्पलयोरन्योन्ययो परस्परयो सम्यगाश्लिष्टावाऽऽलिङ्गितौ यौ वटपिप्पलौ न्यग्रोधाश्वत्थौ तयो स्तथोक्तयोः। 'न्यग्रोधो बहुपाद्वटः' इति, 'बोधिद्रमश्चमदलः पिप्पलः कुञ्जराशनः। अश्वत्थ' इति चोभयत्रामरः। अधोनीचैः। इन्द्रलाल विप्रण तदाख्यद्विजेन कवेः प्रपितामहेनेति बोद्धव्यम्। कारितं निर्मापितं कुशलैः श्रमिकैरित शेषः। ग्रावचत्त्वरं ग्राव्णां दृषदां चत्त्वर मजिरम् (चौतारो इति भाषायाम्) 'पाषाण प्रस्तरग्रावोपलाश्मानः शिलादृष' दित्यमरः। भाति।

यस्माच्च दृश्यतेऽप्राच्यां कौशिक्या वेष्टितंमहत्।
वटसौन्दर्यसम्पन्नं वै हेयं क्षेत्रमुत्तमम्॥३६॥

यस्मादिति ॥ यस्मात् यद्गिरे र्वा यच्चत्वरात् । अप्राच्यां कोशिक्यावेष्टितं ताम्रकोशिक्यावेष्टितं वटसौन्दर्यसम्पन्नं न्यग्रोधपादपशोभा युक्तं महत् विशालं व्रहेयं धान्योद्भवोचित मुत्तमं क्षेत्रं च दृश्यते ।

'रणजोर' 'सुकाजोर' सरिदन्तः स्थितःपृथुः।
'भैंसेसुरा' भिधोदीर्घः शैलो यन्निकटेऽस्त्यपि॥३७॥

रणजोरेति ॥ यन्निकटे यच्छैलासन्ने रणजोर सुकाजोर सरिदन्तः । स्थितो रणजोरसुकाजोराख्ये ये सरितौ तयोरन्तः स्थितो मध्यवर्ती तथोक्तः । पृथुर्विशालः भैंसेसुराभिध स्तदाख्यो दीर्घ आयतः शैलोऽप्यस्ति ।

'ढुङ्गेश्वरा' ख्यस्य शम्भो र्नीचैः 'कुण्डहरा' भिधः ।
पारे सुकाजोरजलं दृश्यते ग्रामको यतः ॥३८॥

दुङ्गेश्वरेति ॥ यतो मनः स्थलोग्रामशैलात् । ढुङ्गेश्वराख्यस्य तदभिधानस्य शम्भो र्महादेवस्य नीचैरधस्तात्, पारेसुकाजोरजलं सुकाजोरजलस्य तदाख्यगिरिसरित्तोयस्य पारे परतीरे पारे 'पारे मध्ये षष्ठ्यावा' इत्यव्ययी भावः । तत्संयोगाद्रेकारान्तत्वंच पारेशब्दस्य । कुण्डहरा भिधः कुण्डहराख्यो ग्रामको ग्राम एव ग्रामकः स्वार्थेकः । दृश्यते ।

सभ्यैः सुधीवरैर्नित्यं देवपूजनतत्परैः ।
ब्राह्मणैरुषितं ग्रामं तं प्रशंसेन्न को जनः ॥३९॥

सभ्यैरिति ॥ सभ्यैः सभायां साधुभिः । 'सभाया य' इति यप्रत्ययः । सुधीवरै विद्वद्भिर्देवपूजनतत्परैः सुरार्चनोद्यतै ब्राह्मणै विप्रै नित्य मुषितं तं यच्छब्दनिर्दिष्टं पूर्वोक्तं ग्रामं मनः स्थलीग्राममित्यर्थः । को जनो न प्रशंसेत् सर्वे प्रशंसेयुरित्यर्थः ।

तत्र पूर्वोक्तग्रामाणामासाऽन्येषां च सत्वरम् ।
विकाशार्थं पाठशालाऽङ्गलभाषानुरागिणी ॥४०॥

तत्रेति ॥ तत्र मनःस्थली ग्रामे । पूर्वोक्तग्रामाणां प्रागभिहित संवसथानामन्येषामपरेषां ग्रामाणां च सत्वरं सशीघ्रं यथातथा विकाशार्थं विकाशनायाऽऽङ्गलभाषानुरागिण्याङ्गलवाणीप्रिया पाठशाला (हा०ई० स्कूल इति भाषायाम्) आसाऽऽसीत् ।

संस्कृताङ्गलभाषावित् कश्चनाऽल्पधनो द्विजः
स्वयं सेवकरूपेण पाठितास्तेन बालकाः ॥४१॥

संम्कृतेति ॥ संस्कृताङ्ग्लादि भाषावित् सुरभारत्याङ्ग्लादि-भाषाविज्ञः। एतेन हिन्दी नेपाली भाषोल्लेखनस्य नैवाऽऽवश्य-कता दृश्यते। अत श्चतुर्भाषा विदिति बुध्यते। कश्चन कोऽपि। अल्पधनोऽल्पं धनं यस्य सोऽल्पधनः परिमितवित्तः। दैनिका-वश्यकतापूर्त्यर्थायपर्याप्तधनइत्यर्थः। द्विजो ब्राह्मणः। योऽस्ति अस्यैव काव्यस्य लेखक इतिज्ञेयः। स्वयंसेवकरूपेण परोपका-रिरूपेण। अप्राप्तेऽपि मासिकशुल्के मानवसेवकरूपेणेत्यर्थः। एतेन कवेर्देशानुरागित्वं दृश्यते। तेनः बालकाः। पाठिता अध्या-पिताः।

अगमत् पाठशालां तां ततो ऽसौपर्यटन् नृपः॥
भूपाया ऽर्पितवान्विप्रः सो ऽभिनन्दनपत्रकम्॥४२॥

अगमदिति ॥ ततो मनःस्थलीग्रामदर्शनानन्तरम्। पर्यटन् भ्रमन् मनःस्थलिग्रामे भ्रमन्नित्यर्थः। स पूर्वोक्तो नृपो-नरपति र्महेन्द्र इत्यर्थः। तां पूर्वोक्तां पाठशालामगमत् गतः स पाठशाला ध्यापकः विप्रः प्रधानाध्यापक इति बोद्धव्यः। भूपाय नृपाय अभिनन्दनपत्रकं प्रशंसापत्रमर्पितवान् सादरं दत्तवान्। पञ्चभि क्षितीशं प्रशंसति-स्वागतादिकं कृ यं समाप्येतिशेषः।

राजन्, वीक्ष्याऽत्र देशे प्रखरगिरिपथे पर्यटन्तं भवन्तं
वीराणामग्रगण्यान् वयमिह हृदये पूर्वजांस्ते स्मरामः॥
येषां कृत्याद्धि नित्यं जगति बलवतो राज्ययोर्मध्यवर्ति
नेपालाख्यं प्रसिद्धं तुहिननगतटे राष्ट्रमास्ते स्वतन्त्रम् ४३

राजन्निति॥ राजन् भो नृप। इह मनः स्थलीग्रामे। वयमस्मादृशा जनाः पर्वत वासिन इत्यर्थः प्रखर गिरि पथेऽमसृण शैलमार्गे दृषदां प्राचुर्यात् प्रखरत्वम्। अत्रदेशेऽस्मिन् प्रदेशे पूर्वदिक्स्थद्विशङ्ख्यप्रदेश इत्यर्थः। पयन्तं भ्रमन्तं भवन्तं श्रीमन्तं वीक्ष्य दृष्ट्वा। वीराण मग्रगण्यान् प्राग्गणनीयान् वीरनृपनाम ग्रहणे प्रागुच्चार्यानित्यर्थः। ते तव पूर्वजान् पृथ्वीनारायणादीनित्यर्थः। हृदये चेतसि न केवलं वचसीत्यर्थः। स्मरामः। एतादृशेष्वेव विकटेषु प्रदेशेषु पृथ्वीनारायणदयो नृपाः पुराऽन्तत आसन्। अत एव तेषां स्मरणं भवतीति तात्पर्यम। जगति संसारे बलवतोः सत्ववतोः सैन्य वतोर्वा। राज्ययो राष्ट्रयोश्चीनभारत राज्ययोरित्यर्थः। मध्यवर्ति मध्येस्थितं नेपालाख्यं नेपालभिधानं प्रसिद्धं प्रख्यातं स्वतन्त्रं न परतन्त्रं राष्ट्रं तुहि नवगतो हिमाचल दक्षिणाङ्के। आस्ते वर्तते। हीति निश्चयत्वे। स्रग्धरावृत्तम् 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेय' मितिलक्षणात्।

स्थाने स्थाने स्थितान् यः सकलजनपदानल्पसत्वान् विजित्य
तेषामैक्यादखण्डंव्यपगतकलहं राज्यमेकं शशास ॥
"पृथ्वीनारायणःसाह" इति स विदितःपूर्वजस्तेक्षितीशो--
भूयोभूयःस्मृतः सञ्जयति भुवि सदा राजनीतौमनीषी॥४४॥

स्थान इति ॥ यः स्थाने स्थाने प्रतिस्थानं स्थिता नल्पसत्त्वा नल्पबलान् अल्प सङ्ख्यान् वा सकल जनपदान् निखिल देशान् विजित्य तेषां विजित देशानामैक्यादेकतायाः। अखण्ड मक्षुण्णं व्यपगत कलहं विस्मृत पारस्परिक वैमनस्य मेकं राज्यं विशाल नेपालदेशमित्यर्थः । शशास शासनमकरोत्। राजनीतौ नृपनीत्यां मनीषी विद्वान् धीरो मनीषीज्ञः प्राज्ञः संख्यावान् पण्डितः कवि 'रित्यमरः। पृथ्वीनारायणः शाह इति विदितः पृथ्वीनारायण शाह इति नाम्ना प्रख्यातः। ते भवतः पूर्वजः क्षितीशो महीशः। भूयो भूयः पौनः पुन्येन स्मृतः सन् भुवि पृथिव्यां सदा जयति सर्वदोत्कर्षेण वर्तते।

यस्यौदार्यात् समानां शतमपिजनता वञ्चिता स्वाधिकारान् ,
मुक्ता, धन्यः पिता ते 'त्रिभुवन' इति यन्नाम गीतं त्रिलोके।
त्यक्त्वाऽम्लानं नृपत्वंनिजविमलकुलादागतं दुस्त्यजं यो
देशेह्यास्मत्प्रजाभ्यो हितकरमधिकं जानतन्त्रंव्यधाच्च ॥४५॥

यस्येति ॥ स्वाधिकारादात्माधिकृतेर्नागरिकाधिकारा दित्यर्थः। समानां वर्षाणाम् 'संवत्सरोवत्सरोको हायनोऽस्त्रि शरत् समाः' इत्यमरः। शत मेकशतमेकशताब्दोपर्यन्तमित्यर्थः। वञ्चिता पराङ्मुखीकृता जनता प्रजागणोऽपि यस्य त्रिभुवन-स्यौदार्यादुदारस्यभाव औदार्य दाक्षिण्यं। गुणवचनब्राह्मणा-दिभ्यःकर्मणिचेष्यञ् । तस्माद् हेतौ पञ्चमी। 'दक्षिणे सदलोदारा' वित्यमरः। मुक्तावस्वतन्त्रिता। प्राप्तस्वाधिकारा-ऽभवदित्यर्थः। त्रिभुवन इति त्रिभुवन इत्येतादृक यन्नामयदी-याभिधानं त्रिलोके जगत्त्रये गीतं स्वर्गमर्त्यपातालेषु देवमनुष्यो-रगैर्गीतमित्यर्थः। यस्त्रिभुवनो निजविमलकुलात् स्वपवित्रवंशा दागतं प्राप्तमम्लानममलिनं राणागृहीत राजश्रीकमपि पवि-त्रमित्यर्थः। दुस्त्यजमत्याज्य नृपत्वं राजत्वं राजलक्ष्मेत्यर्थः। त्यक्त्वाऽऽत्मप्रजाभ्यो 'हितयोगेन' इति चतुर्थी। अधिकमित्यर्थं हितकरं कल्याणकरं जानतन्त्र्यं प्रजातन्त्रतां देशे राज्ये व्यधाच्चा-ऽकरोदपि। ते भवतः पिता जनक स्त्रिभुवनवीरविक्रम इत्यर्थः। धन्यः पुण्यवान्। सुकृती पुण्यवान् धन्य' इत्यमरः। हि निश्चये-नाऽऽसीदितिशेषः।

अन्ताराष्ट्रप्रभवाद् विपदमुपगतस्य स्वदेशस्य निष्ठां
कृत्वाराज्यप्रतिष्ठामपि विमलधिया वर्धयित्वा जगत्याम् ॥
देशोन्नत्यै प्रजानामविदितसुखदुःखाद्विवृत्तान्तमाप्तुं
ग्रामे ग्रामेऽपि गच्छञ्जयतिनरवरः 'श्री महेन्द्रो' महीन्द्रः॥४६॥

अन्तरिति ।। अन्ताराष्ट्रप्रभावात् राष्ट्रान्तरसामर्थ्यात् 'अन्ताराष्ट्र' इत्यत्र ' रोरि' इत्यनेन रेफस्यलोपः 'ढ्रलोपे पूर्वस्य-दीर्घोऽण' इत्यनेन दीर्घत्वम । विपदसापद मुपगतस्य प्राप्तस्य । ऽऽपद्ग्रस्तस्येत्यर्थः। स्वदेशस्य निजजनपदस्यनिष्ठांस्थितिंकृत्वा स्वदेशमापत्तितो मोचयित्वेत्यर्थः। विमलधिया स्वच्छबुद्धया राज्य प्रतिष्ठा मपि राष्ट्रख्यातिं च जगत्यां भुवने 'त्रिष्वयो जगतीलोको भुविष्टपं वनं जग' दित्यमरः। वर्धयित्वा संवर्ध्य। देशोन्नत्यै जनपदोद्धरणाय। प्रजानामविदितसुखदुःखादिवृतान्त मविदितमज्ञातं सुखदुःखादिवृतान्तं सुखदुःखाद्यु दन्तमाप्तुं प्राप्तुं ग्रामे ग्रामेऽपि गच्छन् भ्रमन् नरवरो मनुष्यश्रेष्ठो महीन्द्रः पृथ्वीन्द्रो राजेत्यर्थः। श्री महेन्द्र स्तदाख्यया प्रसिद्धो भवान् । जयायति शयेनउत्कर्षेण वर्तते।

राज़न्, सर्वोच्चशृङ्गं हिमशिखरिशिखाभूषणं यद् विभाति
तद्वद् भूयाद् यशस्ते धवलमतिशयं चोन्नतं सुस्थिरं च
शक्तिं दत्ताद्मोघां सततमधिगुणां 'सिन्धुली शैल दुर्गो'
~~श्रीसिंहम~~ गौरीशोर्णेना ऽऽहवार्थं विरचित 'तिलकस्थानगतें'श्च तुभ्यम्।।४७।।

राजन्निति ।। राजन्। भोनृप। हिमशिखरिशिखाभूषणं हिमशिखरिणस्तुषाराचलस्य याः शिखाश्चूडास्तासां भूषण मलङ्करणमलङ्काररूपमित्यर्थः। 'महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वता' इत्यमरः। यत् सर्वोच्चशृङ्गं निखिलाग्रियशिखरं प्रधान् शृङ्ग मित्यर्थः। [सागरमाथा इतिभाषायाम] विभाति शोभते।

तद्वत् तच्छृङ्गमित्र । ते यशःकीर्ति । अतिशयमित्यर्थं धवलं शुभ्र मुन्नतं प्रांशु च सुस्थिरं सुदृढं च भूयात् । सिन्धुलीशैलदुर्गः सिन्धुलीशैलस्य सिन्धुलीनामकप्रदेशस्थगिरेर्यो दुर्गः स तथोक्तः। [सिन्धुलीगढीको किल्ला इति भाषायाम] । तुभ्यं भवतेऽमोघाम-निस्फलामधिगुणामधिको गुणो यस्याः साऽधिगुणा तां तथो-क्ताम् शक्तिं सामर्थ्यं सततं नित्यं दत्तात् दद्यात् । श्री सिंहेन भवत्पूर्वजेन प्रतापसिंहाख्येन नृपेण । आहवार्थं युद्धाय विरचित तिलकस्थानगर्तश्च निर्मिततिलकस्थानाख्यावरोऽपि । तद्गर्त एव तिलकं दत्वाराज्ञा सैन्यं रणायाऽयुङ्क्त । अतएव तिलकस्थानगर्त इतिख्यातिरभवत्तद्गर्तस्य । सगर्तो मनःस्थलोग्रामासन्ने विद्यते । 'गर्तावटौभुवी' त्यमरः । तत्रत्यशिलालेखाक्षरेषु तद्गर्त निर्मा-यकः प्रतापसिंहो दृश्यते । तुभ्यं शक्तिं दत्तादिति पूर्वेणान्वयः। श्लोकपञ्चकंचैतत् राजाज्ञयाशब्दभृद्यन्त्ररज्जुके [टेपरिकार्ड इति भाषायाम्] निर्धारितमासीत् ।

अगच्छदाश्वास्य दिशं शतक्रतो

महीप विद्यार्थिगणं यदा भवान् ।

[B]तदा मयाऽऽरब्धमिदं यथामति

समर्पये ते नृप'**राज**'काव्यकम्॥४८॥

A(२६ माघः २०१३ आरम्भकालोऽस्यग्रन्थस्य समाप्ति कालस्तु B मार्गः २०१४)

इति श्री भरतराजशास्त्रिकृतौ महेन्द्रोदये महाकाव्ये राजाङ्के राजदेशानैकभागवर्णनं नाम दशमः सर्गः ॥१०॥

अगच्छदिति ॥ महीप भोराजन्, यदा यस्मिन् दिने विद्यार्थि गणं छात्रवर्गमाश्वास्याऽऽश्वासनं दत्वा शतक्रतोरिन्द्रस्य दिशं काष्ठां पूर्वां दिशमित्यर्थः । भवान् श्रीमान् । अगच्छदयात् । तदा तस्मिन् दिने मया यथामति यथाबुद्धि यथा तथाऽऽरब्धं कृतारम्भमिदं काव्यकं काव्यमेवकाव्यकम् । स्वार्थेकः । अथवा राजकाव्यकं राजशब्देन प्रतिसर्गान्तमङ्कितं काव्यकं राजकाव्यकं वा राज्ञः काव्यकं राजकाव्यकम् । नृपराज, काव्यकमित्येन पदे गृहीते नृपराजेत्यन्वयः । 'राजकाव्यक' मिति पठिते तु नृप इत्यन्वयः । ते भवते समर्पये समर्पयामि । सर्गान्ताद्वृत्तभेदः । वंशस्थवृत्तलक्षणं तूक्तमेव ।

इति श्री शङ्करशास्त्रिविरचिते महेन्द्रोदये काव्य व्याख्याने कुञ्चिकाख्ये दशमः सर्गः ॥१०॥

समाप्तोऽयं ग्रन्थः ।

—०※०—

पृथ्वीदिव्योपदेशसारानुवादात्मकं

परिशिष्टम्

पूर्वार्धः

त्रिपत्तनां मल्लनृपामुपत्यकां विजित्य यो हिन्दुपतेश्च राज्यकम् ।
यदा 'नुवाकोट' मयात्तदाऽवदत् स पृथिवनारायण ईदृशं जनान्॥
॥१॥

मृते हि वृद्धे सरतोह गो'रिति कथाऽस्ति,युष्मान् कथयामि चाखिलम्
मदुक्तिविन्त्वत्कुल बोधितोऽन्वयः स्थिरं प्रकुर्यान्मम राज्यकं यतः ॥
॥२॥

त्रिमातृजाः पञ्च वयं हि पाण्डवो-पमाश्च, माकन्दपुरे विवाहकः।
समाभवत् , किन्तु नवा वधूरपि स्थिता तदासीज्जनकस्य सद्मनि ॥
॥३॥

गतोऽत्रनेपाल विलोकनोत्सुको नवात्मदारानयनोद्यतोऽप्यहम्।
ततः स दिग्बन्धनसेन ईदृशं निजाङ्गनापूर्वज ईरितो मया ॥
॥४॥

तमेकदन्तं करिणं, वधूधृतं सुचन्द्रहारं नवलक्षमूल्यकम्।
त्वमद्य मे देहि तत स्तवानुज्ञामपि प्रणेष्यामि मुदाऽऽत्मसौधकम् ॥
॥५॥

ददासि न त्वं यदि, तद्द्वयं मया प्रगृह्यते, त्वां समरे विजित्य हि"।
इतीरयित्वा प्रमृधाय हुङ्कृतो ध्रुवं स दिग्बन्धनसेन उद्भटः ॥
॥६॥

ततः स नेपालनृपोऽवगम्य मां निधास्यते द्राग्दृढ वन्धने' न्विति
विचार्य चाच्छाद्य दलातपत्रत-स्तनुं स्वकीयां सखिभिः सहाव्रजम्
॥७॥
सहाऽनुगैराशु च रापतीतटा-दुपेत्य चन्द्रागिरिशृङ्गकं मया।
व्यलोकि नेपालमही त्रिपत्तना जयाय तस्या उदिताश्च भावनाः ॥
॥८॥
ममाऽनुगौ ज्योतिषिकौ मनीषिणा- वतिप्रियौ 'भानुकुलौ' तथापरे।
अदर्शयन्मां 'ललितं' च 'भक्तकं' क्षणेन तत् 'कान्तिपुरं' च सुन्दरम्॥
॥९॥
जयाशया स्नशुकगे मदिङ्गित-विदात्मदैवज्ञयुगेन नोदितः।
विलङ्घ्य 'थान्कोट गिरिं' च 'कल्लरी'-मयामहं तैःसह 'धादिङं' ततः
॥१०॥
मदाज्ञया 'लुग्लुग कोट' दुर्गके य एव 'चम्पा' सरिदन्तिके स्थिताः॥
त्रिसङ्ख्यकान् तान् 'रण' 'मान' 'वीर' कानद्रुतागमाय प्रहितं चपत्रकम्
॥११॥
अथागतास्तेऽदुरदम्यसाहसं तथापि शङ्का हृदये ममोत्थिता।
गतेऽन्यदेशाक्रमणाय किं मयि न मेऽपिराज्याक्रमणं भवेदिति॥
॥१२॥
अतोहिपृष्टा नरपुङ्गवत्रयी वचांसि सन्देहहराणि साऽगदत्॥
इमां नु चम्पामरिशोणशोणितां न किं विधास्याम इहागते रिपौ॥
॥१३॥
दशाधिकद्वादशराज्यपालका-स्तथा चतुर्विंशतिराज्यरक्षकाः।
"तृणोपमाः सन्तिजयाय केवलं यतस्व निशाङ्क मपेतभी" रिति॥
॥१४॥

ततः समुत्थाय रहःस्थलाद्द्वयं । गताः स्वदेशं प्रति, चाऽत्र मातुलः।
सु'देवघाट'स्य पथा गतः पुरा । निवृत्त आसीत् पशुपं प्रणम्य यः॥
प्रवृत्तिमेतामवगम्यमन्मुखा- च्छ्रुतिप्रियां वाच मवोचदच्युताम्।
"मयाऽनुभूतै रजनीषु पञ्चसु सुलक्षणैः स्वप्नभवैर्वदाम्यहम् ॥
अतो मतौ मे प्रतिभान्ति पञ्चका-भवन्त ऊर्ध्यां नव पाण्डवा इव।
तथा कुरुक्षेत्ररणोपमे मृधे कृते हि नेपालजयो भवेदि"ति ॥
॥१५॥ ॥१६॥॥१७॥

समीरितं तेन च 'लंजुङ'भिधः प्रदेश आस्ते खगराजसन्निभः ।
त्वदीयदेशोऽस्ति भुजङ्गमोपम-स्तथा च नेपाल इवाऽस्ति दर्दुरः ॥
॥१८॥

नवञ्चयित्वा गरुडेक्षणं किमु क्षमोऽहिरत्तुं प्लवमस्ति कुत्रचित् ।
तथा कुरुष्वोद्यतसेनकः पुनः स्वभागिनेयं मधुरं वचोऽवदत् ॥
॥१९॥

वृषोपमा विप्रचमू रघप्रदा न 'ठाकुरी' सिंह समा हिताय वा ।
विलम्बशीलं 'मगर'स्य सैन्यकं हयो यथा मन्दगतिः कुजातिजः॥
॥२०॥

अतः परित्यज्य वरूथिनीरिमाः खशाढ्यसेनां प्रगृहाण सत्वरम् ।
रणोद्भटा सत्वरगामिवाजिभा सचातुरीयं समराय कल्पते ॥
॥२१॥

यदुक्तिमाकर्ण्य हि गच्छता मया स लंजुङेशो 'रिपुमर्दनो'बली ।
अवाप्त आश्वध्वनि, राष्ट्रियो नयस्तथा च वैदेशिक नीतिरीरितेति।
॥२२॥

ततोऽनुगामी य उदात्तवृत्तकः स'कालुपाँडे'ऽवददीप्सितं मम ।
"विभातु 'गोरक्षक' 'लजुङ' द्वयी । विशुद्धसौहार्दरसप्लुतेति तम् ॥
॥२३॥

नृपेण तेनौमिति भाषितं ततो दृढाऽभवन्मैत्र्युचिताद्वयोश्चिरम् ।
स कालुपाडेंऽपि सुकर्मणा सदा प्रियोऽभवत्तेन हृदीप्सितेन मे ॥
॥२४॥

'विराज' पूर्वो हि वखेति' रीरितो मयाऽऽस मन्त्रित्वपदाय किन्त्वहो
पदं तदेत्याऽधिकलोकसम्मतिं गतः स'कालुः' स्मृतिरीतिपूर्वकम् ॥
॥२५॥

तदात्मजाया शिवरामसूनुना ह्यकारयं पाणिनिपीडनं च यत् ।
तदेव 'पाँड़े' 'बसनेत'कौ मम व्यधाच्च नेपालमृधे सहायकौ ॥
॥२६॥

नियुज्यलिग्लिग् निकटेभटोत्कटान् 'रणं' च मानं ह्यथवीरभद्रकम्
शुभेदिने दर्शनकाङ्क्षया वरामयांश्चशल्यानमहेश्वरीमहम् ॥
॥२७॥

विधाय वाट्यां तृणसद्म पृष्टवान् जनांश्च देव्यन्तरदर्शनाय वै ।
अवाप्तमन्त्रोत्तरकूर्चकादयः नवै निषिद्धा हि भवन्ति चेदृशम् ॥
॥२८॥

निरोधितो ऽभ्यन्तरदर्शनादपि तदीरितां स्वीकृतिसूचिकां गिरम् ।
उपेत्य सायं च विभातकेऽप्यहं दिनेदिने द्वारि जपादिकं व्यधाम् ॥
॥२९॥

कृपाणयुग्मं दधती भुजद्वये निशिक्वचित् साष्टसमा कुमारिका।
सुताऽस्मि 'राना मगर'स्य वादिनी ह्यदादसौ स्वप्नगताय मे वरौ॥

॥३०॥

त्वदीयःकामःपरिपूरितोऽधुना ददातु किञ्चिच्च ममाधिकंभवान्।
इतीरयित्वैव पदानि कानिचित् ययादियं स्वापमथाहमत्यजम्॥

॥३१॥

दुतंहि 'राना' 'कुल' 'भानवस्त्र'यो मयाऽथपृष्टाःकिमिदंभवेदिति।
अहोनिशि स्वप्नगतेन दुर्लभा व्यलोकि देवी भवतेति तेऽवदन्॥

॥३२॥

समर्च्यदेवो मथ सप्त सैरिभा-नजांश्च भक्त्यैव समर्प्य सप्त हि।
प्रदातु मायं खलु 'बोर्लघाटजं' तथा च सङ्कल्पितमुन्नतं स्थलम्॥

॥३३॥

शुभे मुहूर्त्ते चलितं च तत्स्थला- दितः 'सिमल्चौर', मथाह मेककम्।
विधाय पर्णैश्च कुटीरकं नवं स्थितोऽभवंतत्र कियद्दिनं ध्रुवम्॥

॥३४॥

स्पृहा 'नुवाकोट' जयाय कर्म तु खिंचेतकुल्यामथ बप्रनिर्मितौ।
ध्रुवं तदामेऽभवतां जपादये दिने दिनेऽयांश्च शचीनिकेतनम्॥

॥३५॥

'ततो महामण्डलमण्डलेश्वरो जयप्रकाशानुगतो जयन्तकः।
मदीयपक्षं भज सम्प्रतोदृशीं स्थितस्तिरस्कृत्य गिरं मदीरिताम्॥

॥३६॥

कदाचिदैन्द्र्यालयमेत्यतन्द्रया श्रुतं युधेऽहः शुभमस्ति सप्तमम् ।
ततः शनेर्वासर एव वै मया शुभे मुहूर्त्ते चलितं रणेच्छया ॥
॥३७॥

अभून्महामण्डलके विभीषणो युधुद्भटैः सार्धमरातिभी रणः ।
ममाऽनुजो द्वादश हायनो'दला-दिमर्दनो'ऽसिं रिपुशीर्षके व्यधात्॥
॥३८॥

ततो नुवाकोटमहीं विजित्य तै- र्बलैर्मदीयैः शिवपूः समाश्रिता ।
विधाय गुल्मानिह कार्यसत्त्वणान् व्यतर्कि नेपालजयो मया ध्रुवः॥
॥३९॥

नेपालाक्रमणाय मां परशुथापा' ऽऽहूय, चात्मानुजं-
मत्पृष्ठाक्रमणाय पश्चिमनृपव्युत्थापनार्थं च यत्
व्याजेनैव च लक्षकादिकविधेः संप्रेषयामास तज्-
ज्ञात्वा,' भाग्ल'को गतोऽस्य मम निर्देशात् परीक्ष्यै द्रुतम् ॥
॥४०॥

आयात् स सन्धिसमये समयानुकारी
व्यापाद्य तं, परमसंहतया मयाऽपि
शक्त्याऽऽश्रिता ह्युदयपश्चिम दिग्जनानां-
नेपालभूरथ पराजितमल्ल'**राजा**' ॥

इतिश्री भरतराजशास्त्रिकृते पृथ्वीदिव्योपदेश-
-सारानुवादात्मके परिशिष्टे पूर्वार्धः ।

उत्तरार्धः

इदं हि राज्यं सुदृढं सुरक्षितं विभाति कन्दंदृषदोरिवान्तरे।
नेयः स चीनाधिपतिर्विशेषतः सचाऽधिभूर्दाक्षिण आत्ममित्रताम्।।

॥२॥

कूटः स पारेजलधिक्षितीश्वरो वशीकृता येन च भारतक्षमा।
ज्ञात्वैक्यमाशङ्क्य नु तान्निवासिनां गवेषयन् दुर्गमिहागमिष्यति

॥३॥

अतः प्रकृत्या रचितं प्रतिस्थलं निर्माय दुर्गं स्वसपत्न दुर्गमम्।
महाशतघ्नी-ज्वलदग्नि-सारिणी निवेशनीया रिपुगर्व हारिणी॥

॥४॥

न घात आदौ करणीय आत्मना नसह्यमस्त्र प्रहितं च शत्रुणा
अतो हि चूडाचल सन्निधौ मृधे सेना विपक्षे भवेद्विवक्षता॥

॥५॥

अवाप्यतेऽस्त्रं प्रचुरं सपत्नतो गङ्गैव सीमानिजनीवृतो भवेत्।
इहाऽजयेऽप्यात्मन उद्भटारयो वार्या प्रवेशाद्विनयादिभिः सदा।

॥६॥

येनाप्यते देवविनिर्मितंवरं सुदुर्गमं दुर्गमिदं च तेन हि।
चतुर्महादेशनृपा रणोद्भटा अपि क्षणान्न स्युर्गमिता पराभवम्।

॥७॥

अत्युच्चचन्द्राचल फुल्लचोकिनौ तथा महादेवतडाग- पालुकौ।
शिवापुरी काहुलदापचाचलौ सदा विधेया दृढ दुर्गकार्यदा।
॥८॥

अथोमहाद्वारदृढं च दुर्गकं विधाय तस्मिन् सहपञ्चभि र्भटैः।
संस्थापनीयं च शतघ्निकास्त्रकं भीतिर्निभूयात्ततएव दुर्हृदाम्।
॥९॥

न 'रामसाहस्थिति' रेव केवला 'महेन्द्रमल्ल' स्य 'जयस्थिते'रपि।
व्यलोकि भूशासनपद्धतिर्मया विधातुमिच्छामि तदुत्तमांस्थितिम्।
॥१०॥

निरुध्यपूर्वापरदेशयो' सृती वाञ्छाऽस्ति नेपालपथप्रवर्तने।
स्वजातिधर्मः करणीय इत्यपि प्रवन्धकं कर्तु मभीप्सितं मया॥
॥११॥

इदं हि राज्यं त्रिपुरं जडात्मकं बलेन शून्यं सुधिया च वर्जितम्।
अत्राऽस्ति षड्यन्त्रकमेव, शुद्धधी र्बलं च कूपोदकपायिनां कुतः॥
॥१२॥

निकेतनैर्नूतननिर्मितैर्यदि स्वी राजधानी 'न्द्रसरोवरे' भवेत्।
तदाकदाचिद्भ्रमणाय केवलं ममाऽगमोऽस्मिन् भविता त्रिपत्तने॥
॥१३

अवाच्यसीमोत्तरवर्तिनि स्थले कदापि वेश्या न विदेशिनैगमाः।
तदा गमेनन् स्वजना दर्शितां द्रागेव यास्यन्ति यतो ध्रुवंचिरम्॥
॥१४॥

अशेषस्वदेशोद्भववस्त्रधारिभिः पुरत्रयीयं विजिता पुराऽस्मभिः ।
काष्ठां च पूर्वां नवलक्षलक्षितां विजित्य हिन्दुप्रभुराज्यमर्जितम् ।।

।।१५।।

नित्यं निषेध्यं वसनं विदेशिनां स्वदेशवस्त्रोन्नतिरुत्तमा खलु ।
स्वदेशवस्त्वौषधविक्रयक्रिया ह्यनुत्तमा नीतिरितीह दृश्यते ।।

।।१६।।

प्रजाधनाढ्या यदि सर्वदाऽखिला तच्चैव राज्यं बलवद्दृढंस्थिरम् ।
प्रजाधनं राजधनं हि सञ्चितं (प्रजाप्रजैव क्षितिपस्य भूतले) ।।

।।१७।।

राजप्रजामध्यमलाभभाग्जनो नजातुकार्यो, नृपकर्मचारिभिः ।
प्रमाणपूर्वं प्रतिवर्षमुत्तमं परीक्षणीयं गणितं हितैषिभिः ।।

।।१८।।

भटाश्च सेनापतयश्च बन्धवो न वा विधेया अधिकैर्धनैर्युताः ।
यतो भविष्यन्ति विलासिनो, रणे मर्तुं न वा मारयितुं रिपून्क्षमाः ।।

।।१९।।

ततः सपत्नाक्रमणेनसम्भवेद् दुःखार्जितं राज्यमिदं च निर्जितम् ।
अनन्त्वतस्तेन विलासिनोऽलसा, न मामकीनं त्विदमस्ति केवलम् ।।

।।२०।।

समस्तवर्णेभ्य इदं सदर्जितं विस्तीर्णराज्यं खलु पुष्पवाटिका ।
नकोऽपि मर्त्यो लभतां तिरस्क्रियां नकोऽपि धैर्यं त्यजतात् कुलागतम् ।।

।।२१।।

(आर्यस्य वासस्थलमेतदुत्तमं ह्यादिस्थलं वा हिमवत्सुसंस्कृतेः।)
अतः सदैवाऽखिलदेशवासिनां स्वस्वामिकार्योद्धरणेऽस्तुधीः खलु ॥
॥२२॥

कदा न कार्याः शिवरामवंशजा अवाच्य दूत्येन पदेन वञ्चिताः।
न'कालु''खड्गामगर' न्वयोद्भवाः कार्याश्च राट्कोषपदेन वर्जिताः॥
॥२३॥

कार्या न पाँडेकुलजन्समानवा कौबेर दिग्दूत्य पदापसारिताः।
बस्नेत पाँडे मगरादिवंशजा निवेशनीयाः क्रमतः पदे वरे ॥
॥२४॥

ते सन्ति मे शुद्धधियः सुसेवका अतस्तदीयान्वयजाश्च मत्प्रियाः।
प्राणापराधे विहितेऽपि जातु तैः स्वयं नवध्या हि मदन्वयोद्भवैः ॥
॥२५॥

ते प्राणदण्ड्या यदि, तत्पदोन्नतिं विधाय प्रेष्याः समरे भयङ्करे।
यतो न वध्याः स्वयमेव, तद्वरं रणान्निवृत्ता यदि ते सजीविताः॥
॥२६॥

गृहे न वध्याः प्रभुणा स्वसेवका विलोकनीयाश्च नयः स्वचक्षुषा।
अन्याय्यकार्याणि भवन्तु नात्मनो राष्ट्रे कदापीति सदा विचिन्त्यताम्॥
॥२७॥

उत्कोच भोजी भुवि तत्प्रदोऽपिवा द्वावेव नाशाय प्रतिकूलवर्त्मगौ।
तौ भूपशत्रू हि धने च जीविते हृते तयो र्नो कलुषं च वर्तते ॥
॥२८॥

भटा विशिष्टाः क्षितिपाय ते गृह-क्षेत्रादियुक्ता यदि सन्ति राष्ट्रके।
उत्पादनं सर्व मुपेत्य वप्रतो मुदा भवन्त्यध्यवसायिनः सदा ॥
॥२९॥

अपेतचिन्ताः स्वजनस्यपालने ससाहसा द्वारि च मण्डलादिषु।
भवन्ति, सेनानवपञ्चकेष्वपि कार्या दधाना सुभुशुण्डिकाशतम् ।।
।।३०।।

चतुःसु वा पञ्चसु संयुगेषु ये लब्धप्रतिष्ठाः सुपरीक्षिता नराः।
ते संविधेया सभुशुण्डिकाशता गुल्माधिपाख्या बलनायकाः सदा।।
।।३१।।

गुल्माधिपेन प्रधनेषुभूरिषु गता जनाः सप्तपदी विभूषिताः।
कार्याश्च,तैः षड्भटनायका अपि स्थाप्या वराः षोडशङ्ख्यकाःपुनः
।।३२।।

मतुं,रिपून् मारयितुं क्षमान् भटान् 'गुरुङ्''खशान्'वै मगरांश्चठाकुरान्
नियोज्य तैः षड्भटनायकै रपिदृढा विधेया निजपट्टिका ततः।।
।।३३।।

गुरुङ् खशैर्वा मगरैश्च ठाकुरै रिपोः कथा का पुरुहूत पीठकम्।
विधीयते भीतमशंसयं यत स्ते शस्त्रसंचालन कर्मणि क्षमाः।।
।।३४।।

दृषत्प्रयोग्याश्च भुशुण्डिकावराःस्तोभान् कृपाणांश्च सहस्रतोधिकान्
संप्राप्नुवन्ति प्रधनेषु चेदमी ध्रुवं जयेयु स्त्रिदशेश्वरासनम् ।।
।।३५।।

रणेप्रहर्ता सहयोगदोऽप्युभौ तुल्यौ हितौ, राजपदाभिषेचने।
वा वीरतायाः पृथिवी प्रदानके तयोः समानो नय एव शोभनः।।
।।३६।।

दिवङ्गते राजपदस्थितेभटे दातव्य मस्यैव सुताय वित्तकम्।
तस्मिन् गते द्वादश सङ्ख्यकाब्दकं स राजकीये सुपदे खलूचितः
।।३७।।

विवेकवान् भूमिपतिर्भवेद्यदि धनाशया नैकभटा विदेशतः।
अत्राऽऽगमिष्यन्ति ततः स्वराष्ट्रकं सदाभवेत् संयुगदक्षसैन्यकम् ॥
॥३८॥

सारो महीपस्य भटाः प्रजा अतः करोति भूपश्चतुरो वशे च तान्।
ततः परस्याऽऽक्रमणं भवेत् कथं नवा कदाचित् कलहश्च राष्ट्रियः॥
॥३९॥

उत्तेजिता एव भटावरा, यतः कुर्वन्ति पक्षं स्वजनस्य तेन हि।
स्वकर्म सिद्धिश्च भवेदतोनृप उत्तेजितात् तान् हि करोतु सन्ततम्
॥४०॥

पुरातना एव जनाः सुदुर्गके निवेशनीयाः सुधिया महीभृता।
खशा द्विजास्तेन विशन्तु सौधकं स्वराष्ट्रबाह्ये निवसन्ति ये सदा॥
॥४१॥

सौधस्थितिर्बाह्यजनैरशंसयं विधीयते पूर्णतया मलीमसी।
राज्ञा च शिष्टैरधिकार आत्मनो हस्ते विधेयः खलुसन्ततं निजे॥
॥४२॥

मयेन्द्रबज्रेणसमा स्वमानवाः कृताश्चराष्ट्रध्वजकैः समन्विताः।
तेभ्यो हि वै द्वादशविंशसङ्ख्यकैर्ग्रन्थिर्निबद्धः किल रूप्यकैरिह॥
॥४३॥

अतो हि शल्यानक लिग्लिगादिषु गत्वाव्यकुर्वन् सफलं च कर्मते।
अहं विभूतिं तत एव लब्धवान्, पुराण भृत्यस्थितितो गृहंस्थिरम्।
॥४४॥

राष्ट्रं दृढं स्यात्तत एव तीक्ष्णधीः करोतु भूपः स्ववशेऽखिलान् भटान्
कस्याऽपि ते यान्तु न पक्षपातकं सत्ये हि मार्गे विचरन्तु सन्ततम्॥
॥४५॥

मुद्रास्तु शुद्धा नगरा विचारिणो भवन्तु, निःस्वार्थधियश्च ठाकुराः-
न्यायालये सन्तु समुन्नते पदे नीतिस्मृतिज्ञैः प्रवरैर्बुधैः सह ॥
॥४६॥

न्यायालयादागतमर्थमालये न सज्जनो रक्षतु, तेन सन्ततम् ।
सन्यासिनो योगिन आतुरा द्विजास्तृप्ता विधेया वसनादिदानतः।
॥४७॥

ग्रामोऽपि सार्थः खनिभूर्भवेद्यदि ग्राह्याः सुवर्णादिपदार्थका स्ततः।
धान्योचितस्थानभवान् गृहानपि प्रसार्य कार्या किलवप्रनिर्मितिः।
॥४८॥

निमन्त्र्य मां, येन विधाय पृष्ठकाऽऽक्रमाय मे यत्न मदायि यातना
अपास्य नेपालजयाय तामहं व्यधां च गुल्मं समये पुरातने ॥
॥४९॥

जयप्रकाशस्य हितैषिणा पुरा ह्यामन्त्रितान् दक्षिणतो दिगम्बरान् ।
इह प्रवेशादवरुध्य सप्तसु ग्रामेष्वहं पूर्वदिशः स्थिरोऽभवम् ।
॥५०॥

मिर्जासिमोम्लेच्छकआययौ पुरा माकन्दके ह्याक्रमणाय देशकम् ।
गुण्या मम द्वादशभिः सुखड्गिनो भटा दशाऽमुं सफला व्यपोहितुम्।
॥५१॥

हार्डिश्चमूभिः प्रचुराभिरेकदा प्रारूढवान् सिन्धुलीशैलशेखरम् ।
विजित्य तं तस्य द्दषच्चलास्त्रकाण्यह्नो गृहीतानि पुरा मया किल ॥
॥५२॥

भुशुण्डिका चालनदक्षपाणयो भेषासिङो मस्तकिशेखजर्वरौ ।
मत्सेवनार्थं लखनौप्रदेशतो म्लेच्छा नुबाकोटमयुश्च मामनु ॥
॥५३॥

निरीक्ष्य तेषां गुणमात्मनो भटान् तत्संनिभान्कर्तुमभीप्सितं ततः
मुख्ये पदे सैनिकशिक्षणाय तान् नियोज्य भूताश्च भटाःसुशिक्षताः॥
॥५४॥

नवप्रकृत्या रुचिरेऽत्रदेशके तुर्काक्रमो वै मगरस्यचाक्रमः ।
तथाऽऽक्रमःस्युर्मुगलस्यचेदृशं नेपालवृत्तान्तमधीत्य बुध्यते ॥
॥५५॥

तुर्काक्रमोऽभूत्समयेपुरातने स्वयं महीपो मगरस्य चास्म्यहम् ।
सञ्चाल्यतेऽस्त्रि मुगलस्ययद्भटैस्तेनैव दोषो मुगलाक्रमस्यनो ॥
॥५६॥

सेनार्धसंख्या करवालधारिणी शेषा भुशुण्डीपरिचालनोद्यता ।
समाप्ति, शोभेत भुशुण्डिकाशतं चमूर्दधाना च सहस्रघातिनी ॥
॥५७॥

प्रतिप्रदेशं प्रतिदुर्गमात्मनः सेना निवेश्या प्रचुरं विभज्य हि ।
तथाऽतिरिक्ता च विभाजनाच्चमूःस्वराजधान्यां भवतात् सहायकैः॥
॥५८॥

आसन्ने तरुणैर्विलासकुशलैः संगीतनृत्यप्रियै
राक्रान्तं यवनस्य राष्ट्रमलघु ह्यास्ते ततोऽस्मज्जनाः ।
चित्राचित्रितवेश्मसु प्रतिदिनं तौर्यत्रिकप्राप्तये
गत्वा राष्ट्रधनव्ययं किमु विधास्यन्तीति शङ्काऽस्ति मे ॥
॥५९॥

संगीतेन विदेशिना जनमनो ह्याकृष्यते सत्वरम्
द्रव्याणां भवति व्ययः परजनैर्ज्ञातं रहस्यं भवेत्।
देशस्याऽऽक्रमणाय साहस मरिर्धत्ते मनस्यात्मन
स्तस्मात् कोऽपि विदेशकस्य कुरुतात् तौर्यत्रिके नो मतिम् ॥
॥६०॥

नो जानन्तु गतागताद्रिसरणीं वैदेशिकाः फाल्गुने
कांश्चित् स्वे विषये निमन्त्र्य च परावर्त्याञ्जसा गायकान्।
हृष्टाः सन्त्वथवा त्रिपत्तनभवं शास्त्रानुसारं सदा
नेवारैर्विहितं हि नृत्यमिह मे पश्यन्तु सर्वे जनाः ॥
॥६१॥

स्वदेशस्य हि संगीते व्ययेभूते धनस्यतत्।
न गच्छति विदेशे स्वौदेशोऽज्ञेयोवि'राज'ते ॥

इति श्री भरतराजशास्त्रिकृते पृथ्वीदिव्योपदेशसारानुवादात्मके परिशिष्ट उत्तरार्धः।